श्री मेघविजयगणिकृतवृत्ति
श्रीकनककुशलगणिकृतव्याख्या
श्री गुणाकरसूरिकृतविवृत्तिविभूषितम्
पू. आचार्य श्री मानतुंगसूरि विरचितम्

श्री भक्तामरस्तोत्र महाकाव्यम्

-: પ્રેરક :-
પરાર્થપરાયણ વાત્સલ્યનિધિ
પૂ. પંન્યાસપ્રવર **શ્રી વજ્રસેનવિજયજી ગણિવર્ય**

-: સંપાદક :-
સિદ્ધહસ્તલેખક પૂ. આચાર્યદેવ શ્રીમદ્
વિજય પૂર્ણચન્દ્રસૂરીશ્વરજી મહારાજના શિષ્યરત્ન
હૃદયસ્પર્શી પ્રવચનકાર પૂ.પંન્યાસપ્રવર
શ્રી યુગચન્દ્રવિજયજી ગણિવર

-: લાભાર્થી :-
શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈન સંઘ
માંડવી (કચ્છ)

-: પ્રકાશક :-
શ્રી ભદ્રંકર પ્રકાશન
૪૯/૧, મહાલક્ષ્મી સોસાયટી, સુજાતા ફ્લેટ પાછળ,
શાહીબાગ, અમદાવાદ-૩૮૦૦૦૪.

-: લાભાર્થી :-
શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈન સંઘ
માંડવી (કચ્છ)

દ્વિતીયાવૃત્તિ
૧૦૦૦

મૂલ્ય :
રૂા. ૬૫-૦૦

પ્રાપ્તિસ્થાન

શ્રી ભદ્રંકર પ્રકાશન
૪૯/૧, મહાલક્ષ્મી સોસાયટી,
શાહીબાગ, અમદાવાદ-૪.
ફોન : ૦૭૯-૨૨૮૬૦૭૮૫

સરસ્વતી પુસ્તક ભંડાર
હાથીખાના, રતનપોળ, અમદાવાદ.
ફોન : ૦૭૯-૨૫૩૫૬૬૯૨

પંચપ્રસ્થાન પુણ્યસ્મૃતિ પ્રકાશન
સુમંગલમ્ કાર્યાલય
૧૦-૩૨૬૮-એ, યાત્રિકભવન પાસે, કાજીનું મેદાન,
ગોપીપુરા, સુરત-૩૯૫૦૦૧.

આ પુસ્તકનું પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવ્યું હોવાથી આનો ઉપયોગ કરતા પૂર્વે ગૃહસ્થો ઉચિત નકરો અર્પણ કરે એ જ વિનંતી.

પ્રકાશન વર્ષ

વિ.સં. ૨૦૬૬ • વીર સંવત-૨૫૩૬ • ઈ.સ. ૨૦૧૦

મુદ્રક : ભરત ગ્રાફિક્સ
ન્યુ માર્કેટ, પાંજરાપોળ, રિલીફ રોડ, અમદાવાદ-૧.
ફોન : ૨૨૧૩૪૧૭૬, મો : ૯૯૨૫૦૨૦૧૦૬

સંપાદકીય

(પૂર્વાવૃત્તિમાંથી)

ભગવાન શ્રી મહાવીર મહારાજાના શાસનની ઉજ્જવળ પાટ પરંપરામાં અનેક ધુરંધર આચાર્ય ભગવંતોની ઝળહળતી તારક શ્રેણિમાં થયેલા લઘુશાન્તિસ્તવના રચયિતા મહાન ગુરુદેવ આચાર્ય ભગવાન્ **શ્રીમદ્ માનદેવસૂરીશ્વરજી** મહારાજના પ્રભાવક શિષ્ય પૂ. આચાર્ય ભગવાન્ **શ્રીમદ્ માનતુંગસૂરીશ્વરજી** મહારાજાએ પરમાત્મ ભક્તિ સ્વરૂપ ભક્તામર સ્તોત્રની અદ્ભુત રચના કરેલ છે. જૈન સંઘમાં હોંશે હોંશે આ સ્તોત્રનું સ્મરણ થાય છે. આ સ્તોત્ર પર અનેક મહાપુરુષોએ વૃત્તિઓ-ટીકાઓ રચી છે, એ ઉપરથી પણ આ સ્તોત્રની મહાપ્રભાવકતાનો ખ્યાલ આવી શકે છે. પૂ. **ઉપાધ્યાયજી શ્રી મેઘવિજયજી ગણિવર** વિરચિત વૃત્તિ સંસ્કૃત અભ્યાસીઓને કાવ્ય તરીકેની ગરજ સારે એમ છે.

સંસ્કૃત બુકનો અભ્યાસ કરીને કાવ્ય ભણાવવામાં આવતાં હોય છે. છેલ્લા વર્ષોમાં શ્રી સિદ્ધહૈમવ્યાકરણના આધારે રચાયેલી શ્રી સિદ્ધહૈમ સંસ્કૃત પ્રવેશિકા જૈન સંઘમાં ખૂબ જ આદરણીય બનવા પામી છે. તેની જેમ આપણા સંઘમાં અન્ય દર્શનના કાવ્યો ભણાવવાને બદલે જૈન કાવ્યો જ અભ્યાસક્રમમાં ગોઠવાય તેમ કેટલાક જ્ઞાનપ્રેમીઓ ઈચ્છતા હતા. એ અંગે તપાસ કરતાં શ્રી ભક્તામર સ્તોત્ર પર કાવ્યપદ્ધતિએ પૂ. **ઉપાધ્યાયજી શ્રી મેઘવિજયજી ગણિવર** વિરચિત વૃત્તિ પ્રાપ્ત થતાં અને ઘણાં વર્ષો પૂર્વે એ છપાયેલ હોવાથી વર્તમાનમાં અપ્રાપ્ય જણાતાં આજે વૃત્તિ સહિત શ્રી ભક્તામર સ્તોત્ર મહાકાવ્ય પ્રસિદ્ધ કરવામાં આવી રહ્યું છે. જેનો અભ્યાસ કાવ્ય પદ્ધતિએ ખૂબ જ સરળતાથી કરી શકાય તેમ છે. ઉપરાંત પૂ. **શ્રી કનકકુશલ ગણિ** વિરચિત વૃત્તિ તેમજ **પૂ. શ્રી ગુણાકરસૂરિજી** વિરચિત વૃત્તિનો પણ આ પુસ્તકમાં પાછળ સંગ્રહ કર્યો છે, જે કાવ્ય સમજવામાં ખૂબ જ ઉપયોગી બનશે એવો વિશ્વાસ છે.

પૂ. પરમોપકારી પ્રગુરુદેવ આચાર્ય શ્રીમદ્ **વિજયજયકુંજરસૂરીશ્વરજી** મહારાજના શુભાશિષથી અને પૂ. પરમોપકારી ગુરુદેવ આચાર્યદેવ શ્રીમદ્ **વિજય પૂર્ણચન્દ્રસૂરીશ્વરજી** મહારાજા તથા પૂ. આચાર્યદેવ શ્રીમદ્ **વિજય મુક્તિપ્રભસૂરીશ્વરજી** મહારાજાની પ્રેરણાથી પ્રારંભેલું આ કાર્ય સારી રીતે પૂર્ણાહુતિને પામ્યું છે, તેમાં પૂજ્યોની કૃપા જ કારણ છે.

આ ગ્રંથના પ્રુફવાંચન આદિમાં વિનીત શિષ્ય બાલમુનિરાજ **શ્રી મુક્તિશ્રમણવિજયજી મહારાજ** તથા પંડિત શ્રી જયકરભાઈ તથા મુમુક્ષુ પ્રભુભાઈએ આપેલો સહકાર ભૂલી શકાય તેમ નથી. તેવી રીતે શ્રી ભક્તામર સ્તોત્રની વૃત્તિવાળું ''શ્રી भक्तामरकल्याणमन्दिरनमिउणस्तोत्रत्रयम्'' પુસ્તક મેળવી આપનાર ડુવાતીર્થ પ્રેમી **લક્ષ્મીચંદ ભીખાભાઈ શાહ** - (શ્રી ચિંતામણિ પાર્શ્વનાથ જૈન પુસ્તકાલય ગોરેગાંવ - મુંબઈના સંચાલક) ને પણ કેમ ભૂલી શકાય ? તેમજ શ્રી હીરાલાલ રસિકલાલ કાપડિયા (એમ.એ.) દ્વારા સંપાદિત અને શેઠ દેવચંદ લાલભાઈ જૈન પુસ્તકોદ્ધાર સંસ્થા દ્વારા પ્રકાશિત ''ભક્તામર - કલ્યાણમંદિર - નમિઉણ સ્તોત્રત્રયમ્'' પુસ્તકને નજર સમક્ષ રાખીને આ પુસ્તકનું સંકલન - સંપાદન કરવામાં આવેલ છે.

કાવ્યપદ્ધતિએ આ ગ્રંથનું વાંચન ચતુર્વિધસંઘમાં થતું રહે, એ આશયથી દંડાન્વય અને ગુજરાતી અર્થ સહિત સંપાદન કરવામાં કંઈપણ ક્ષતિ રહી જવા પામી હોય તો ત્રિવિધિ ત્રિવિધિ મિચ્છા મિ દુક્કડમ્ !

જ્ઞાનપંચમી, વિ.સં. ૨૦૫૧
મોતીશા લાલબાગ
જૈન ઉપાશ્રય
મુંબઈ-૪.

- સમર્થ સાહિત્યકાર વિદ્વદ્વર્ય પૂજ્યપાદ
આચાર્યદેવ શ્રીમદ્ વિજય
પૂર્ણચન્દ્રસૂરીશ્વરજી મહારાજનો
ચરણ સેવક મુનિ યુગચન્દ્રવિજય

પ્રકાશકીય

સંસ્કૃતના અભ્યાસીઓ માટે કાવ્યોનું પઠન-પાઠન અતિજરૂરી ગણાય, એવા કાવ્યોમાં ‘ભક્તામર’નું અનુપમ સ્થાન-માન હોવાથી ‘**શ્રી ભક્તામરસ્તોત્રમહાકાવ્યં**’ હાથમાં આવતાં જ આનંદ અનુભવ્યો. આનું સંપાદન-પ્રકાશન વિ.સં. ૨૦૫૧ માં થયું હતું. પ્રકાશક-સંપાદકનો સંપર્ક સાધતાં વધુ નકલો મળવી શક્ય ન જણાતાં અધ્યાત્મમૂર્તિ પૂ. પંન્યાસપ્રવર **શ્રી ભદ્રંકરવિજયજી ગણિવર્ય**ના પ્રશિષ્ય પરાર્થપરાયણ પૂ. પંન્યાસપ્રવર **શ્રી વજ્રસેનવિજયજી ગણિવર**ની પ્રેરણાથી ઓફસેટ-ઝેરોક્ષ દ્વારા આ કાવ્યના પુનઃ પ્રકાશનનો અમે નિર્ણય લીધો. સિદ્ધહસ્તલેખક સૂરિમંત્ર પ્રભાવક પૂ. આચાર્યદેવ શ્રીમદ્ **વિજયપૂર્ણચન્દ્રસૂરીશ્વરજી મહારાજા**ના પ્રભાવક શિષ્યરત્ન હૃદયસ્પર્શી પ્રવચનકાર પૂ. પંન્યાસપ્રવર **શ્રી યુગચન્દ્રવિજયજી ગણિવરે** પૂર્વ સંપાદક તરીકે પુનઃ પ્રકાશન અર્થે અમને ઉદારભાવે અનુમતિ આપવા બદલ અમે તેઓશ્રીના ખૂબ ખૂબ ઋણી છીએ.

પૂજ્ય પંન્યાસજી મહારાજની પ્રેરણાથી આના પ્રકાશનનો લાભ **શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈન સંઘે** (માંડવી, કચ્છ) પોતાના જ્ઞાન-દ્રવ્યમાંથી લીધો છે. તે બદલ ધન્યવાદને પાત્ર છે.

રઘુવંશ આદિ કાવ્યોના પઠન-પાઠનની વર્ષોથી પ્રણાલિકા ચાલતી આવે છે. એના બદલે ભક્તામર જેવા ભક્તિપ્રધાન જૈન કાવ્યોના પઠન-પાઠનની પરિપાટી પ્રારંભાય એ વધુ ઈચ્છનીય છે. આવા પ્રારંભ માટેનું પીઠબળ ‘**શ્રી ભક્તામરસ્તોત્ર મહાકાવ્યં**’ના પ્રકાશન દ્વારા મળી રહેશે એવો અમારો વિશ્વાસ છે.

લિ. ભદ્રંકર પ્રકાશન

श्री भक्तामरस्तोत्र महाकाव्यम्

: रचयिता :

पू. आचार्यवर्या श्री मानतुंगसूरीश्वराः



॥ श्री ऋषभनाथाय नमः ॥

॥ श्री मानदेवसूरिगुरुभ्यो नमः ॥

॥ श्री आत्मकमल-वीर-दान-प्रेम-रामचन्द्रसूरिगुरुभ्यो नमः ॥

श्रीमन्मानतुङ्गसूरिवर्यविरचितं

महोपाध्यायश्रीमेघविजयकृतवृत्तिविभूषितम्

॥ भक्तामरस्तोत्रम् ॥

अथ कविराद्यवृत्तद्वयेन सम्बन्धमाह —

भक्तामरप्रणतमौलिमणिप्रभाणा-
मुद्द्योतकं दलितपापतमोवितानम् ।
सम्यक् प्रणम्य जिनपादयुगं युगादा-
वालम्बनं भवजले पततां जनानाम् ॥

— वसन्ततिलका

यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-
दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः ।
स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ १-२ ॥

— युग्मम्

दण्डान्वय :- भक्तामरप्रणतमौलिमणिप्रभाणाम् उद्द्योतकं दलितपापतमोवितानम् भवजले पतताम् जनानाम् युगादौ आलम्बनम् जिनपादयुगम् सम्यक् प्रणम्य सकलवाङ्मयतत्त्वबोधात् उद्भूतबुद्धिपटुभिः सुरलोकनाथैः जगत्त्रितयचित्तहरैः उदारैः स्तोत्रैः यः संस्तुतः तम् प्रथमम् जिनेन्द्रम् किल अहम् अपि स्तोष्ये ॥१-२॥

श्रीशङ्खेश्वरपार्श्वं, नत्वा भक्तामर(स्तव)स्यार्थम् ।
श्रीविजयप्रभसूरे-र्लिखामि वचनात् सुशिष्यार्थम् ॥१॥ — आर्या

इह हि भगवान् श्रीमानतुङ्गसूरिः श्रीमज्जिनशासनसू(भू)रिप्रभावनाभावनयाऽनेकलोकानैहिकामुष्मिकदुःखेभ्यो रिरक्षिषुः सप्रभावं श्रीप्रथमप्रभुस्तोत्रं कुर्वन् प्रथमं मङ्गलार्थमाह-भक्तामरप्रणतेति, (यः संस्तुतेति) युग्मम्।

अनयोः संहितादिक्रमेण सुखावबोधाय व्याख्या --

'किल' इति संभावनायाम्। अहमपि तं प्रथमं जिनेन्द्रं स्तोष्ये' इत्यन्वयः। कर्तरि उक्तिः । 'अहं' मानतुङ्गनामा आचार्यः, 'अपि' इति असामर्थ्यद्योतने, 'तं प्रथमं जिनेन्द्रं' वृषभजिनं 'स्तोष्ये' स्तवनविषयीकरिष्य इत्यर्थः। असमर्थस्य तादृक्प्रभोः स्तवनकरणे उद्यममात्रमेव, न तु सामर्थ्यम्, तेन स्तवनं भविष्यति न वेति हीनकोटिसंशयस्वरूपा सम्भावना भाव्या ।

'स्तोष्ये' इति क्रियापदम्। कः कर्ता? 'अहम्'। कं कर्मतापन्नम्? 'तं जिनेन्द्रं'। किंविशिष्टम्? 'प्रथमम्'। तच्छब्दो यच्छब्दमपेक्षते। तं कम्? 'यः सुरलोकनाथैः संस्तुतः' यो भगवान् इन्द्रैः स्तुतिविषयीकृत इत्यर्थः । देवाधिदेव इति भावः।

'संस्तुतः' इति क्रियापदम्। कैः कर्तृभिः? 'सुरलोकनाथैः'। कः कर्मतापन्नः? 'यः'। कर्मणि उक्तिः। कैः करणैः? 'स्तोत्रैः'। किंविशिष्टैः?'जगत्त्रितयचित्तहरैः' आधारे आधेयस्य ग्रामश्चलित इत्यादिवदुपचारात् जगत्त्रितयस्थजीवानां चित्तस्य-मनसः अभिरञ्जकैः। पुनः किं.? 'उदारैः' प्रधानैः विविधार्थयुक्तैः। किंविशिष्टैः सुरलोकनाथैः?'उद्भूतबुद्धिपटुभिः'। कस्मात्? 'सकलवाङ्मयतत्त्वबोधात्' सर्वशास्त्राणां तत्त्वं-रहस्यं भावार्थः तस्य ज्ञानात् प्रादुर्भूता या बुद्धिस्तया पटवो-विदग्धा इत्यर्थः। *''विज्ञवैज्ञानिकाः पटुः छेको विदग्धे'' इति हैमकोषः (का. ३, श्लो. ७) ।*

किं कृत्वा स्तोष्ये? 'प्रणम्य' भक्तिश्रद्धातिशयलक्षणः प्रकर्षस्तेन नत्वा। कथम्? 'सम्यक्' मनोवाक्कायोचितप्रकारेण। क्रियाविशेषणमेतत्। किं कर्मतापन्नम्? 'जिनपादयुगं' जिनस्य अत्र प्रस्तुतत्वात् प्रथमार्हतश्चरणयुगलं, श्री सिद्धाचले राजादनतरोस्तले स्थापनारूपं तदिति सम्प्रदायः । किंविशिष्टं जिनपादयुगम्? 'भक्तामरप्रणतमौलिमणिप्रभाणां उद्द्योतकं' भक्ता-भक्तिभाजो

ये अमरा-देवास्तेषां प्रणता-विनयेन अवनता ये मौलयः-शिरो मुकुटानि तेषु मणयः-चन्द्रकान्ताद्याः सामान्येन रत्नानि च तेषां प्रभाःकान्तयः तासां उद्दीप-(द्योत)कं-उद्द्योतकारकम्। यथा सूर्यकिरणैः सूर्यकान्ततेजांसि प्रोद्भाव्यन्ते तथा जिनपादयुगं प्रकाशकं मणिप्रभाणाम्, ततोऽधिकतेजस्त्वमत्र व्यङ्ग्यम्। पुनः किं? 'दलितपापतमोवितानम्' क्षिप्तपापरूपान्धकारजालम्। पुनः किं? 'आलम्बनं' अवष्टम्भरूपम् । केषाम्? 'जनानां' लोकानाम्। किं कुर्वतां जनानाम्? 'पततां' ब्रुडताम्। क्व? 'भवजले' संसाररूपे जले, दुस्तरत्वात्, लक्षणया जलधौ। आलम्बनं, कस्मिन् काले? 'युगादौ' एतदवसर्पिणीतृतीया-रकपर्यन्ते, चतुर्थारकस्यादौ इति॥

अथ समासाः - भक्ताश्च ते अमराश्च भक्तामराः *पुंलिङ्गकर्मधारयः*, प्रणताश्च ते मौलयश्च प्रणतमौलयः *कर्मधारयः*, भक्तामराणां प्रणतमौलयः भक्तामरप्रणतमौलयः *षष्ठीतत्पुरुषः*, भक्तामरप्रणतमौलिषु मणयः भक्तामरप्रणतमौलिमणयः *सप्तमीतत्पुरुषः*, भक्तामरप्रणतमौलिमणीनां प्रभाः भक्तामरप्रणतमौलिमणिप्रभाः *षष्ठीतत्पुरुषः*, तासां भक्तामरप्रणतमौलिमणिप्रभा-णाम्। उद्द्योतयतीति उद्द्योतकम्। पापान्येव तमांसि पापतमांसि, *'समासश्चान्वये नाम्नाम्' (सा. सू. ४६६) इति समासः, रूपी तत्पुरुषोऽयमिति प्रसिद्धिः*, तमांसीव तमांसि, पापानि च तानि तमांसि पापतमांसि, *'उपमेयं व्याघ्राद्यैः०' (अ. ३, पा. १, सू. १०२) इति हैमवचनात् उपमितसमास इति वृद्धाः*, पापतमसां वितानं पापतमोवितानं, *षष्ठीतत्पुरुषः*, दलितं पापतमोवितानं येन तत्, पुनर्द्वितीयाज्ञाप-नाय तदिति वक्तव्यं, *तृतीयाबहुव्रीहिः*। सम्-सम्यग् अञ्चतीति सम्यक्, *'सम्' इत्यव्ययस्य 'सहादेः' (सा० सू० ५०६) इति सूत्रेण समित्यादेशः*। प्रकर्षेण नत्वा प्रणम्य, *'समासे क्यप्' (सा० सू० १४८३), 'क्त्वाद्यन्तं च' (सा० सू० ३५८) इत्यव्ययत्वाद् विभक्तिलोपः*। जयति रागादीन् जिनः, पादयोर्युगं - पादयुगं *षष्ठीतत्पुरुषः*, जिनस्य पादयुगं जिनपादयुगं *षष्ठीतत्पुरुषः, कर्मणि द्वितीया*। युगस्य आदिः युगादिः, तस्मिन् युगादौ। आलम्बयतीति आलम्बनम्। *बहुलत्वात् साधुः*। भव एव जलं भवजलं, तस्मिन् भवजले, *'समासश्च.' (सा० सू० ४६६) इति समासः*। पतन्तीति पतन्तस्तेषाम्। संस्तूयते स्म संस्तुतः। सह

कलाभिर्वर्तते यत् तत् सकलं, वाचां विकारोऽवयवो वा वाङ्मयं, *'एकस्वरात् (अ० ६, पा० २, सू० ४८) इति हैमसूत्रात् मयट्, कश्चित् तु वाचा निर्वृत्तं वाङ्मयमित्युक्त्वा तत्पुरुषोऽयमित्याख्यत्*, तथा तस्य भावस्तत्त्वं, सकलं च तद् वाङ्मयं च सकलवाङ्मयं, सकलवाङ्मयस्य तत्त्वं सकलवाङ्मयतत्त्वं, तस्य बोधः सकलवाङ्मयतत्त्वबोधस्तस्मात्, *हेतौ पञ्चमी ।* उद्भूता चासौ बुद्धिश्च उद्भूतबुद्धिः *स्त्रीलिङ्गकर्मधारयः*, उद्भूतबुद्ध्या पटवः उद्भूतबुद्धिपटवः। सुराणां लोकाः सुरलोकाः, सुरलोकानां नाथाः सुरलोकनाथास्तैः, *कर्तरि तृतीया।* स्तूयते एभिरिति, *'नीदाम्वृशसू०' (अ. ५, पा. २, सू. ८८) इति हैमसूत्रेण त्रट्प्रत्ययः, करणे तृतीया ।* त्रयोऽवयवा अस्य त्रितयं, जगतां त्रितयं जगत्त्रितयं, जगत्त्रितयस्य चित्तानि जगत्त्रितयचित्तानि, तानि हरन्तीति जगत्त्रितयचित्तहराणि, *सर्वत्र तत्पुरुषः। स्तोष्ये इत्यत्र स्तवनजन्यपुण्यस्य आत्मगामित्वादात्मनेपदम् ।* जिनाः- सामान्यकेवलिनस्तेषु इन्द्र इव इन्द्रो जिनेन्द्रः-तीर्थंकरः, *स तेषामपि प्रदक्षिणादिरूपोपचारविनयविषय इति भावः ॥*

ननु स्तोत्रस्यैव मङ्गलत्वात् तदारम्भे मङ्गलाचरणेऽनवस्थेति चेत्, न, स्तोत्रस्य भावमङ्गलत्वेन ततोऽपि स्थापनारूपजिनपादप्रणामस्य शिष्यादीनामपि तथा प्रवर्तकत्वेन शिष्टाचाररक्षणस्यावश्यकत्वाच्च वैशिष्ट्यख्यापनेन अदुष्टत्वात्, न च अनवस्था, तीर्थकृतां भावमङ्गलरूपव्रताङ्गीकारे 'काउण नमोक्कारं, सिद्धाणमभिग्गहं तु सो गिण्हे' (आवश्यक-निर्युक्तौ) इत्यागमान्नमोमङ्गलस्यावश्यकत्वेन दर्शनात्, विवाहप्रज्ञप्त्यादिधर्मशास्त्रेषु अपि आदौ मङ्गलसद्भावाच्चेति ॥ नन्वेवमपि 'त' गणग्रहणमादौ कथं? तस्य कविसमये निषिद्धत्वात् ।

'उर्वी मस्त्रिगुरुः श्रियं वितनुते नः स्वस्त्रिलो जीवितं
रोऽग्निर्मध्यलघुर्मृतिं स पवनो देशभ्रमं चान्त्यगुः।
यो वार्यादिलघुर्धृतिं दिनमणिर्मध्येगुरुर्जो रुजं
द्यौस्तो मूर्तिधनक्षयं गुरुमुखो भस्तारकेशो यशः ॥१॥'

— शार्दुल०

इति गणाष्टकविवरणे, तथा 'भः प्रभुक्षोभकारकः' इत्युक्तत्वात् भकारोऽपि नादौ ग्राह्य इति चेदुच्यते-

"मनौ मित्रे भयौ भृत्या- वुदासीनौ जतौ स्मृतौ।
रसावरी नीचसंज्ञौ, द्वौ द्वावेतौ मनीषिभिः ॥ १ ॥" –अनु०

मित्रगणात् द्वितीये मित्रगणे चापरमिति, तथा उदासीनाद् भृत्यगणे द्वितीये परे सति शुभजयश्च, अन्येषु सर्वगणयोगेषु न शुभमित्युक्तत्वात्, वर्णशुद्धावपि ***भामट****वचनाद् भकारस्य संयुक्तस्यैव निषेधेन केवलस्य भगवद्वाचकत्वाच्च न दोषः, अयं च विमर्शो* ***वृत्तरत्नाकर****वृत्तौ* ***नारायणभट्ट****कृतायां बोध्यः। तथा मरेत्यपशब्दे दोषो न चिन्त्यः, आं इति मन्त्रबीजस्य आदावन्ते च काव्यस्य प्रक्षेपणेन स्तोत्रसंहितोद्भावनकारित्वात्, आं इत्यक्षरं* ***चक्रेश्वरी****मन्त्रबीजमित्याम्नायिका, अत एव* ***रघुवंशादिकालिदास****कृतौ एतद् बीजमेवाङ्कः। छन्दस्त्वत्र वसन्ततिलका। तल्लक्षणं च-"उक्ता वसन्ततिलका तभजा जगौ गः"॥ इति काव्यद्वयार्थः॥ १-२॥*

અર્થ :- ભક્ત એવા દેવોના નમેલા મુગુટના મણિઓની પ્રભાને પ્રકાશિત કરનાર, પાપરૂપી અંધકારના સમૂહનો નાશ કરનાર, ભવ સાગરમાં પડતા પ્રાણીઓના યુગની શરૂઆતમાં આધારભૂત એવા જિનેશ્વરના ચરણ યુગલને સારી રીતે નમીને, સર્વશાસ્ત્રોના રહસ્યનો બોધ થવાથી ઉત્પન્ન થયેલ બુદ્ધિની પટુતાવાળા ઇન્દ્રો દ્વારા ત્રણે જગતના ચિત્તને આકર્ષિત કરનારા, ઉદાર સ્તોત્રો વડે જે જિનેશ્વર સ્તુતિ કરાયા છે તે પ્રથમ જિનેન્દ્રને (શ્રી ઋષભદેવને) હું પણ જરૂર સ્તવીશ.

❊ ❊ ❊

अथ कविना किलेति संभावनाविधानेन जिनस्तवनकरणेऽसामर्थ्यं व्यञ्जितं, तर्हि कथं स्तुतौ प्रवृत्त इत्याह -

बुद्ध्या विनाऽपि विबुधार्चितपादपीठ!
स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम्।
बालं विहाय जलसंस्थितमिन्दुबिम्ब-
मन्यः क इच्छति जनः सहसा ग्रहीतुम्? ॥३॥

दन्डान्वय: - हे विबुधार्चितपादपीठ ! विगतत्रप: अहम् बुद्ध्या विना अपि स्तोतुम् समुद्यतमति: (अस्मि), जलसंस्थितम् इन्दुबिम्बम् सहसा ग्रहीतुम् बालम् विहाय अन्य: क: जन: इच्छति।

हे विबुधार्चितपादपीठ ! अहं त्वां स्तोतुं समुद्यतमतिरस्मि इत्यन्वयः। कर्त्रुक्तिः। हे देवपूजितचरणन्यासस्थान ! हे भगवन् ! अहं - स्तोत्रकर्ता त्वां वर्णयितुं तत्परमना वर्ते इत्यर्थः।

'अस्मि' इति क्रियापदम्। कः कर्ता? 'अहम्'। अकर्मको धातुः। किं कर्तुम्? 'स्तोतुम्'। कं कर्मतापन्नम्? 'त्वाम्'। कथम्?' विनाऽपि'। कया? 'बुद्ध्या' मत्या। कथंभूतः? 'विगतत्रपः' लज्जारहितः। अत्रायं हेतुहेतुमद्भावः-यतोऽहं विगतत्रपः, अतस्त्वां बुद्ध्या विनाऽपि स्तोतुं समुद्यतमतिरस्मि, बुद्धिहीनो देवार्चनीयं भगवन्तं कथं स्तोष्ये इति भावः।

उक्तार्थे अर्थान्तरन्यासमाह - अन्यः को जनो जलसंस्थितं इन्दुबिम्बं सहसा ग्रहीतुं इच्छति-वाच्छति इत्यन्वयः।

'इच्छति' इति क्रियापदम्। कः कर्ता? 'अन्यो जनः' अपरो लोकः। किं कर्मतापन्नम्? 'इन्दुबिम्बं' चन्द्रमण्डलम्। किं कर्तुम्? 'ग्रहीतुं' लातुम्। कथम्? 'सहसा'। कथंभूतं इन्दुबिम्बम्? 'जलसंस्थितं' जले प्रतिबिम्बितम्। किं कृत्वा? 'बालं विहाय' कुमारं अव्यक्तं त्यक्त्वा। बालो हि कदाचिज्जले प्रतिबिम्बितं चन्द्रमण्डलं दृष्ट्वा लातुं करं प्रसारयति, न पुनर्व्यक्तज्ञानवान् पुरुषः, प्रतिबिम्बे छायामात्रस्यैव भावात्, कदाचिदाकाशगतं चन्द्रमण्डलं देवादिप्रयोगाद् ग्रहीतुं शक्यते, न पुनः प्रतिबिम्बगतमित्यनेन स्वस्य बालविलसितता भगवत्स्तोत्रस्याशक्यकार्यता च उक्ता भवति। *अत्र इषेः कर्तुर्जहतेश्च कर्तुर्नैवैकत्वं, तथापि विहायेतिल्यबन्तरूपो निपातो विनार्थे द्रष्टव्यः, 'बलात्कारे प्रसह्य' इति वत्। तद्योगे च ततोऽन्यत्रापि दृश्यत इति द्वितीया ॥*

अथ समासा :- पादयोः पीठं पादपीठं, विबुधैः अर्चितं पादपीठं यस्य स तत्संबोधने हे विबुधार्चितपादपीठ ! अनेन तक्षशिलापुर्यां तथा हस्तिनागपुरे

भगवदवस्थानभूमौ बाहुबलिना श्रेयांसेन कारितं पीठं सूचितम्। बुद्ध्या इत्यत्र विनायोगे तृतीया। सम्-सम्यक् प्रकारेण उद्यता मतिर्यस्य सः, तथा विशेषेण गता विगता 'नाम्नश्च०'(सा० सू० ५३९) इति तत्पुरुषः, विगता त्रपा यस्य स विगतत्रपः। जले संस्थितं जलसंस्थितम्। इन्दोर्बिम्बं इन्दुबिम्बं तत्, कर्मणि द्वितीया। ग्रहीतुमित्यत्र 'ईटो ग्रहाम्' (सा० सू० ८२१) इति दीर्घः॥ इति तृतीयकाव्यार्थः ॥३॥

અર્થ :- જેમના પગ મૂકવાના આસનની પણ દેવોએ પૂજા કરેલી છે એવા હે જિનેન્દ્ર ! લજ્જારહિત એવો હું બુદ્ધિ વિના પણ સ્તવન કરવા માટે સજ્જ મતિ (તૈયાર) થયો છું ! ખરેખર, પાણીમાં પડેલા ચન્દ્રના પ્રતિબિંબને એકદમ ગ્રહણ કરવા માટે બાળકને છોડીને બીજો કયો માણસ ઇચ્છે?

* * *

अथ पूर्वोक्तमेव भङ्ग्यन्तरेण समर्थयति -

वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्
कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ? ।
कल्पान्तकालपवनोद्धतनक्रचक्रं
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ?॥४॥

दण्डान्वयः - हे गुणसमुद्र ! बुद्ध्या सुरगुरुप्रतिमः अपि कः शशाङ्ककान्तान् ते गुणान् वक्तुम् क्षमः?, वा कः भुजाभ्याम् कल्पान्तकालपवनोद्धतनक्रचक्रम् अम्बुनिधिम् तरीतुम् अलम्।

हे गुणसमुद्र ! ते-तव गुणान् वक्तुं कः पुरुषः क्षमः स्यात्? इत्यन्वयः। क्षमः-समर्थो भवेत् इत्यर्थः।

'स्यात्' इति क्रियापदम्। कः कर्ता:? 'कः' पुरुषः। किं कर्तुम्? 'वक्तुं' वाङ्मात्रेण पठितुम्। कान् कर्मतापन्नान्? 'गुणान्'। कस्य? 'ते' तव। कथंभूतान् तान् गुणान्? 'शशाङ्ककान्तान्' चन्द्रवन्मनोहरान्। कथंभूतः कः

पुरुषः? 'बुद्ध्या सुरगुरुप्रतिमः' बृहस्पतिप्रतिबिम्बः। कथमपि।

अत्राप्यर्थान्तरं न्यस्यति - वा - अथवा अम्बुनिधिं भुजाभ्यां तरीतुं कः पुरुषः अलं-समर्थः स्यात्? इत्यन्वयः । 'स्यात्' इति क्रियापदम्। कः कर्ता ? 'कः' पुरुषः। कथंभूतः कः 'अलं' समर्थः। किं कर्तुम्? 'तरीतुं' पारं प्राप्तुम्। कं कर्मतापन्नम्? 'अम्बुनिधिं' समुद्रम् । काभ्याम् ? 'भुजाभ्याम्' । कथंभूतं अम्बुनिधिम्? 'कल्पान्तकालपवनोद्धतनक्रचक्रं' युगान्तसमयवायुना उद्धता-अत्यन्तभीषणा उच्छलन्तो नक्रा-मत्स्याः चक्राः - चक्राकारजीवविशेषा यस्मिन् स तथाभूतं, यद्वा नक्राणां चक्राणि-समूहा यस्मिन्नित्यपि योज्यम्।

यथा समुद्रो भुजाभ्यां तरीतुं दुष्करस्तथा तव गुणा अप्यपारत्वाद् वर्णयितुं दुःशकाः, अत एव गुणसमुद्र इति संबोधनं युक्तमिति भावः।।

अथ समासा :- गुणानां समुद्र इव समुद्रो गुणसमुद्रः, तत्संबोधनं हे गुणसमुद्र ! कर्मधारयः उपमितसमासः। शशः अङ्के-उत्सङ्गे यस्य स शशाङ्कः, कविप्रसिद्धिरियं, शशाङ्कवत् कान्ताः शशाङ्ककान्तास्तान्, मध्य-पदलोपी समासः। सुराणां गुरुः सुरगुरुः, सुरगुरोः प्रतिमेव सुरगुरुप्रतिमः। कल्पस्य अन्तः कल्पान्तः, कल्पान्तश्चासौ कालश्च कल्पान्तकालः, कल्पान्त-कालस्य पवनः कल्पान्तकालपवनः, कल्पान्तकालपवनेन उद्धताः कल्पान्त-कालपवनोद्धताः, नक्राश्च चक्राश्च नक्रचक्राः कल्पान्तकालपवनोद्धता नक्रचक्रा यत्र स तम्। अलमित्यव्ययं सामर्थ्ये। अम्बूनि नितरां धीयन्ते अस्मिन्निति अम्बुनिधिस्तं, 'नाम्नश्च.'(सा. सू. ५३९) इति समासः। भुजाभ्यामित्यत्र करणे तृतीया। प्रवहणादिना अम्बुनिधिः सुतरः, न पुनर्भुजाभ्यां इत्यति-शयालंकारः। तरीतुमित्यत्र 'ईटो ग्रहाम्' (सा. सू. ८२१) इति दीर्घः।। इति चतुर्थ काव्यार्थः ।।४।।

અર્થ : હે ગુણ સમુદ્ર ! ચન્દ્ર જેવા ઉજ્જવલ આપના ગુણોને બુદ્ધિ વડે બૃહસ્પતિ જેવો પણ બોલવા માટે કોણ સમર્થ થાય? અથવા કલ્પાન્તકાળના પવનથી ઉછળતા મગરના સમૂહવાળા સાગરને બે હાથ વડે તરવા માટે કોણ સમર્થ થાય?

❊ ❊ ❊

अथैवमशक्यकार्यतां दृढीकृत्य प्रवृत्तिहेतुमाह -

सोऽहं तथापि तव भक्तिवशान्मुनीश !
कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।
प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं
नाभ्येति किं निजशिशोः परिपालनार्थम् ॥५॥

दण्डान्वयः- तथापि मुनीश! सः अहम् विगतशक्तिः अपि तव भक्तिवशात् स्तवम् कर्तुम् प्रवृत्तः मृगः आत्मवीर्यम् अविचार्य प्रीत्या निजशिशोः परिपालनार्थम् किम् मृगेन्द्रम् न अभ्येति?।

हे मुनीश ! तथापि सोऽहं स्तवं कर्तुं प्रवृत्तोऽस्मि इत्यन्वयः। *कर्तरि उक्तिः।* 'यत्रान्यत् क्रियापदं न श्रूयते तत्र अस्तिर्भवन्त्यादिपरः प्रयुज्यत' इति न्यायादत्र 'अस्मि' इति क्रियापदम्। कः कर्ता ? 'सः' 'अहं विगतत्रपः' इत्यादिविशेषणविशिष्टः। कथंभूतः अहम्? ' प्रवृत्तः' कृतारम्भः। किम्? 'कर्तुम्'। कं कर्मतापन्नम्? 'स्तवं' स्तोत्रम् । *'स्तवः स्तोत्रं स्तुतिर्नुतिः' (अभि. का. २, श्लो.१८३) इति हेमसूरयः।* कथम्? 'तथापि'। सुरगुरुणाऽपि दुष्करस्तवने मादृशमन्दधियः सर्वथा असमर्थत्वेऽपि। तत्र हेतुमाह। कस्मात् हेतोः? 'भक्तिवशात्' आन्तरप्रीतिबलात्। कस्य? 'तव'। कथंभूतः अहम्? 'विगतशक्तिरपि' निश्चितस्वकीयासामर्थ्योऽपि। अत्रान्वये द्वावपिशब्दौ अत्यन्तासङ्गत्यदर्शनेन वक्ष्यमाणां बहुश्रुतोपहसनीयतां प्राहतुः।

असमर्थस्यापि प्रवृतौ हेतुं सूचयन्नर्थान्तरमाह-मृगो मृगेन्द्रं किं नाभ्येति? इत्यन्वयः। कर्तरि उक्तिः। 'अभ्येति' इति क्रियापदम्। सन्मुखं यातीत्यर्थः। कथम्? 'न', काक्वा अपितु अभ्यत्येव। कः कर्ता ? 'मृगः' हरिणः। कं कर्मतापन्नम्? 'मृगेन्द्रं' सिंहम्। किं कृत्वा? 'प्रीत्या' स्नेहेन 'आत्मवीर्यं' स्वबलम् 'अविचार्य' अविमृश्य। किमर्थम्? 'निजशिशोः परिपालनार्थं' स्वबालकरक्षणाय। अत्रार्थे यथा सर्वथा मृगस्य सामर्थ्यं नास्ति तथापि स

मृगः स्नेहपरवशस्तद्रक्षणाय प्रवर्तते, तथाऽहमपि त्वद्भक्तिवशात् प्रवृत्तोऽस्मीति भावः ॥

अथ समासा :- तेन प्रकारेण तथा इत्यव्ययम्। भक्तेर्वशः भक्तिवशः, तस्मात् भक्तिवशात्। मुनीनामीशः मुनीशः, तत्संबोधने हे मुनीश!। स्तवनं स्तवः, तं स्तवम्। विशेषेण गता विगता, *'नाम्नश्च.' (सा. सू. ५३९) इति समासः*, विगता शक्तिर्यस्य स विगतशक्तिः। प्रवर्तते स्म इति प्रवृत्तः। आत्मनो वीर्यं आत्मवीर्यं, तद् आत्मवीर्यम्। न विचार्य अविचार्य। मृगाणामिन्द्र इव इन्द्रः मृगेन्द्रस्तम्। अभ्येतीत्यत्र *'इण् गतौ' धातुः अभिपूर्वः अदादिः।* निजश्चासौ शिशुश्च निजशिशुः *कर्मधारयः*, तस्य निजशिशोः, निजस्य शिशुरिति *तत्पुरुषः कौशल्याम्। 'निजः पुनः' (अभि. का. ३, श्लो. २२५) 'आत्मीयः स्वः स्वकीयश्च' (अभि. का. ३. श्लो. २२६) इति हेमसूरयः।* परिपालनस्य अर्थः- प्रयोजनं यस्य क्रियायां तत् परिपालनार्थम्। *क्रियाविशेषणत्वात् नपुंसकत्वं अत एव ईशार्थमिति किरातार्जुनीयायां काव्यवृत्तौ घण्टापथमध्ये ईशार्थं यथा तथेति क्रियाविशेषणं, अर्थेन नित्यसमासः सर्वलिङ्गता च वाच्या इति,* परिपालनायेति परिपालनार्थं, *'तदर्थार्थेन' (सिद्ध. अ. ३, पा. १, सू. ७२) इति हैमवचनात्, अर्थशब्देन समासस्तत्पुरुषः॥ इति पञ्चमकाव्यार्थः॥ ५॥*

અર્થ : હે મુનીશ ! તે હું (સ્તુતિ કરવા માટે અશક્ત છું) તો પણ ભક્તિના વશથી શક્તિ રહિત એવો પણ સ્તુતિ કરવા માટે પ્રવૃત્ત થયો છું, કેમકે પોતાના બચ્ચાના પરિપાલન માટે સ્નેહવડે આત્મબળને વિચાર્યા વિના હરણ સિંહની સામે નથી થતું શું?

* * *

अथ भगवद्भक्तिप्रवृत्तत्वादेव मत्कृतावपि पण्डितप्रवृत्तिहेतुरिदं भविष्यति इत्याह -

अल्पश्रुतं श्रुतवतां परिहासधाम
त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्।
यत् कोकिलः किल मधौ मधुरं विरौति
तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥

स्त्वत्पादपङ्कजवनाश्रयिणः 'तत्पुरुषः'। पुनर्जनाः किंभूताः? 'विजितदुर्जयजेयपक्षाः' पराभूतोत्कटशत्रुगणाः। जेतुं योग्या जेयाः, जेयानां पक्षो जेयपक्षः 'तत्पुरुषः', दुःखेन जयो यस्य स दुर्जयः 'बहुव्रीहिः', दुर्जयश्चासौ जेयपक्षश्च दुर्जयजेयपक्षः 'कर्मधारयः', विजितो दुर्जयजेयपक्षो यैस्ते विजितदुर्जयजेयपक्षाः 'बहुव्रीहिः'। युद्धे किंभूते? 'कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधभीमे' कुन्ताग्रैर्भिन्नानां-पाटितानां गजानां-हस्तिनां शोणितं-रुधिरं तदेव वारिवाहो-जलप्रवाहस्तस्मिन् वेगावतारात्-त्वरितप्रवेशात् तरणे-प्लवने आतुरैः-व्याकुलैर्योधैर्भीमं-भयानकं तस्मिन्। कुन्तानां अग्राणि कुन्ताग्राणि 'तत्पुरुषः', कुन्ताग्रैर्भिन्नाः कुन्ताग्रभिन्नाः 'तत्पुरुषः', कुन्ताग्रभिन्नाश्च ते गजाश्च कुन्ताग्रभिन्नगजाः 'कर्मधारयः', कुन्ताग्रभिन्नगजानां शोणितं कुन्ताग्रभिन्नगजशोणितं 'तत्पुरुषः', वारिणो वाहो वारिवाहः 'तत्पुरुषः', कुन्ताग्रभिन्नगजशोणितमेव वारिवाहः कुन्ताग्रभिन्नगजशोणितवारिवाहः 'कर्मधारयः', वेगेनावतारो वेगावतारः 'तत्पुरुषः', कुन्ताग्रभिन्नगजशोणितवारिवाहस्य वेगावतारः कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारः ('तत्पुरुषः'), तरणे आतुराः तरणातुराः 'तत्पुरुषः', कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारात् तरणातुराः कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुराः 'तत्पुरुषः', कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुराश्च ते योधाश्च कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधाः 'कर्मधारयः', कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधैर्भीमं कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधभीमं तस्मिन् 'तत्पुरुषः'। इत्येकोनचत्वारिंशत्तमवृत्तार्थः ।।३९।।

* * *

अथ जलापदं प्रशमयन्नाह — अम्भोनिधावित्यादि

व्याख्या - हे भवोदधिपोत ! अम्भोनिधौ- समुद्रे अम्भो निधीयतेऽ-

स्मिन्नित्यम्भोनिधिस्तस्मिन् 'तत्पुरुषः', सांयात्रिका जना भवतः स्मरणात् त्रासम्-आकस्मिकं भयं विहाय - त्यक्त्वा व्रजन्ति-क्रमेण स्वस्थानं यान्ति। जनाः किंलक्षणाः? 'रङ्गत्तरङ्गशिखरस्थितयानपात्राः' उच्छलत्कल्लोलाग्रवर्तिवाहनाः। रङ्गन्तश्च ते तरङ्गाश्च रङ्गत्तरङ्गाः 'कर्मधारयः', रङ्गत्तरङ्गाणां शिखराणि रङ्गत्तरङ्गशिखराणि 'तत्पुरुषः', रङ्गत्तरङ्गशिखरेषु स्थितानि रङ्गत्तरङ्गशिखरस्थितानि 'तत्पुरुषः', रङ्गत्तरङ्गशिखरस्थितानि यानपात्राणि येषां ते रङ्गत्तरङ्गशिखरस्थितयानपात्राः 'बहुव्रीहिः'। अम्भोनिधौ कथंभूते? 'क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नौ' क्षुभिताः - क्षोभं गताः भीषणानि-रौद्राणि नक्रचक्राणि- दुष्टजलजन्तुवृन्दानि पाठीनपीठौ-मत्स्यभेदौ च भयदो-भयोत्पादक उल्बणः-प्रकटो वाडवाग्निः-वडवानलश्च यत्र स तस्मिन्। नक्राणां चक्राणि नक्रचक्राणि 'तत्पुरुषः', भीषणानि च तानि नक्रचक्राणि च भीषणनक्रचक्राणि 'कर्मधारयः', पाठीनाश्च पीठाश्च पाठीनपीठाः 'द्वन्द्वः', वाडवश्चासावग्निश्च वाडवाग्निः 'कर्मधारयः', उल्बणश्चासौ वाडवाग्निश्च उल्बणवाडवाग्निः 'कर्मधारयः', भयं ददातीति भयदः 'तत्पुरुषः', भयदश्चासावुल्बणवाडवाग्निश्च भयदोल्बणवाडवाग्निः 'कर्मधारयः', भीषणनक्रचक्राणि च पाठीनपीठाश्च भयदोल्बणवाडवाग्निश्च भीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नयः 'द्वन्द्वः', क्षुभिता भीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नयो यत्र स क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्निस्तस्मिन् 'कर्मधारयः'। इति चत्वारिंशत्तमवृत्तार्थः ॥४०॥

* * *

अथ रोगभयं भिन्दन्नाह — उद्भूतेत्यादि

व्याख्या - हे कर्मव्याधिविध्वंसनधन्वन्तरे ! मर्त्या-नरा उद्भूतभीषणजलोदरभारभुग्नाः-उत्पन्नरौद्रोदरवृद्धिभारवक्राः, भग्ना इति पाठे तु

भग्ना-मोटिताः । जलेन युक्तमुदरं जलोदरं 'तत्पुरुषः', भीषणं च तज्जलोदरं च भीषणजलोदरं 'कर्मधारयः', उद्भूतं च तद् भीषणजलोदरं चोद्भूतभीषणजलोदरं 'कर्मधारयः', उद्भूतभीषणजलोदरस्य भार उद्भूतभीषणजलोदरभारः 'तत्पुरुषः' उद्भूतभीषणजलोदरभारेण भुग्नाः उद्भूतभीषणजलोदरभारभुग्नाः 'तत्पुरुषः', शोच्यादीनां दशाम्-अवस्थाम् उपगताः -प्राप्ताः। 'च्युतजीविताशाः' गलितजीवितवाञ्छाः। जीवितस्याशा जीविताशाः 'तत्पुरुषः', च्युता जीविताशा येभ्यस्ते 'बहुव्रीहिः'। एवंभूताः सन्तो मर्त्याः त्वत्पादपङ्कजरजोऽमृतदिग्धदेहाः - भवच्चरणकमलरेणुसुधालिप्तवपुषः। तव पादौ त्वत्पादौ 'तत्पुरुषः', पङ्के जायेते इति पङ्कजे 'तत्पुरुषः', त्वत्पादावेव पङ्कजे त्वत्पादपङ्कजे 'कर्मधारयः', त्वत्पादपङ्कजयो रजः त्वत्पादपङ्कजरजः 'तत्पुरुषः', त्वत्पादपङ्कजरज एव अमृतं त्वत्पादपङ्कजरजोऽमृतं 'कर्मधारयः', त्वत्पादपङ्कजरजोऽमृतेन दिग्धं त्वत्पादपङ्कजरजोऽमृतदिग्धं 'तत्पुरुषः', त्वत्पादपङ्कजरजोऽमृतदिग्धं देहं येषां ते त्वत्पादपङ्कजरजोऽमृतदिग्धदेहाः 'बहुव्रीहिः'। मकरध्वजतुल्यरूपाः - काममूर्तयः। कमनीयकान्तय इत्यर्थः। मकरो ध्वजे यस्य स मकरध्वजः 'बहुव्रीहिः', मकरध्वजस्य तुल्यं मकरध्वजतुल्यं 'तत्पुरुषः', मकरध्वजतुल्यं रूपं येषां ते मकरध्वजतुल्यरूपाः 'बहुव्रीहिः'। 'भवन्ति' स्युः। यथा सुधापानात् सर्वरोगनाशः, तथा भगवत्पादपद्माश्रयणादपि सकलव्याधेरुपशमः। इत्येकचत्वारिंशत्तमवृत्तार्थः ।।४१।।

* * *

अथ बन्धनभयं भिन्दन्नाह – आपादेत्यादि

व्याख्या - हे चक्रेश्वरीचर्चितचरण ! मनुजाः-मनुष्या भवन्ति। मनुजाः किंलक्षणाः? 'विगतबन्धभयाः' विध्वस्तबन्धनकभीतयः। बन्धस्य भयं

बन्धभयं 'तत्पुरुषः', विगतं बन्धभयं येभ्यस्ते विगतबन्धभयाः 'बहुव्रीहिः'। कथम्? 'स्वयम्' आत्मनैव। कथम्? 'सद्यः' शीघ्रम्। मनुजाः किं कुर्वन्तः? 'स्मरन्तः' ध्यायन्तः। कं कर्मतापन्नम्? 'त्वन्नाममन्त्रं' 'ॐ 'श्रीऋषभाय नमः' इति पदम्। तव नाम त्वन्नाम 'तत्पुरुषः', त्वन्नामैव मन्त्रस्त्वन्नाममन्त्रस्तं 'कर्मधारयः'। कथम्? 'अनिशं' सदा। मनुजाः कथंभूता अपि? 'उरुशृङ्खलवेष्टिताङ्गाः' गुरुलोहदामव्याप्तवपुषः। उरवश्च ते शृङ्खलाश्च उरुशृङ्खलाः 'कर्मधारयः', उरुशृङ्खलैर्वेष्टितानि उरुशृङ्खलवेष्टितानि 'तत्पुरुषः', उरुशृङ्खलवेष्टितानि अङ्गानि येषां ते उरुशृङ्खलवेष्टिताङ्गाः 'बहुव्रीहिः'। कथम्? 'आपादकण्ठं' पादगलं यावत्। पादौ च कण्ठश्च पादकण्ठं 'समाहारद्वन्द्वः'। 'प्राणितूर्यसेनाङ्गानां द्वन्द्वैकवद्भावः' इति । पादकण्ठं मर्यादीकृत्य आपादकण्ठम् 'अव्ययीभावः'। मनुजाः पुनः किंभूताः? 'बृहन्निगडकोटीनिघृष्टजङ्घाः' विकटान्दुकाग्रपीडितजङ्घाः। बृहच्चासौ निगडश्च बृहन्निगडः 'कर्मधारयः', बृहन्निगडस्य कोटिर्बृहन्निगडकोटिः 'तत्पुरुषः', बृहन्निगडकोट्या निघृष्टे बृहन्निगडकोटिनिघृष्टे 'तत्पुरुषः', बृहन्निगडकोटिनिघृष्टे जङ्घे येषां ते बृहन्निगडकोटिनिघृष्टजङ्घाः 'बहुव्रीहिः'। कथम्? 'गाढं' निबिडम्। इति द्विचत्वारिंशत्तमवृत्तार्थः ॥४२॥

* * *

अथाष्टभयनाशेन स्तवं सङ्क्षिपन्नाह - मत्तेत्यादि

व्याख्या - हे अमेयमहिमन् ! तस्य-प्राणिनो भयं-भीतिराशु-तत्कालं नाशं-क्षयम् उपयाति-गच्छति इवोत्प्रेक्षते भिया-भयेन, यो मतिमान्-प्राज्ञः, मतिरस्यास्तीति मतिमान् तावकं-भवदीयं तवायं तावकस्तं इमं - प्रयुक्तस्वरूपं स्तवं - स्तोत्रमधीते-पठति । भयं किंविशिष्टम्? 'मत्तद्विपेन्द्र १ मृगराज २ दवानला ३ ऽहि ४ सङ्ग्राम ५ वारिधि ६ महोदर

७ बन्धनो ८ त्थम्'। द्विपानामिन्द्रो द्विपेन्द्रः 'तत्पुरुषः', मत्तश्चासौ द्विपेन्द्रश्च मत्तद्विपेन्द्रः ('कर्मधारयः'), मृगाणां राजा मृगराजः 'तत्पुरुषः', दवश्चासावनलश्च दावानलः 'कर्मधारयः', वारीणि धीयन्तेऽस्मिन्निति वारिधिः, महच्च तदुदरं च महोदरं 'कर्मधारयः', मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च सङ्ग्रामश्च वारिधिश्च महोदरं च बन्धनं च मत्तद्विपेन्द्रमृगराजदवानलाहिसङ्ग्रामावारिधिमहोदरबन्धनानि 'द्वन्द्वः', मत्तद्विपेन्द्रमृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनेभ्यः उत्थं मत्तद्विपेन्द्रमृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनोत्थं 'तत्पुरुषः'। गजेन्द्र १ सिंह २ दावाग्नि ३ सर्प ४ रण ५ समुद्र ६ जलोदर ७ बन्धनो ८ त्पन्नम्। इति त्रिचत्वारिंशत्तमवृत्तार्थः ।।४३।।

* * *

अथ स्तवप्रभावसर्वस्वं कविराह - स्तोत्रेत्यादि

व्याख्या - हे 'जिनेन्द्र' ! केवलिपते !। जिनानामिन्द्रो जिनेन्द्रस्तस्य सम्बोधनं 'तत्पुरुषः'। इह जगति यो जनो-लोकोऽजस्रम्-अनवरतं तव-भवतः स्तोत्रस्रजं-स्तवनमालां, स्तोत्रमेव स्रक् स्तोत्रस्रक् तां 'कर्मधारयः', बहुपदगर्भितत्वात् स्तोत्रस्य मालोपमानं, कण्ठगतां - निजकण्ठलुण्ठितां धत्ते-करोति पठतीत्यर्थः। स्तोत्रस्रजं किंभूताम्? 'निबद्धां' रचिताम्। कैः? 'गुणैः' पूर्वोक्तज्ञानदर्शनचारित्ररूपैः दवरकैः । केन ? 'मया' श्रीमानतुङ्गसूरिणा। कया? 'भक्त्या' भावपूर्वम्। स्तोत्रस्रजं किंलक्षणाम्? 'रुचिरवर्णविचित्रपुष्पां' रुचिरा-मनोहरा वर्णा-अकाराद्या द्विपञ्चाशदेव विशेषणाद् भूतानि(?) स्पृहणीयानि विचित्राणि यमकश्लेषानुप्रासद्व्यर्थादीनि तान्येव च पुष्पाणि यस्यां सा रुचिरवर्णविचित्रपुष्पा (ताम्)। रुचिराश्च ते वर्णाश्च रुचिरवर्णाः 'कर्मधारयः', रुचिरवर्णाश्च विचित्राणि च रुचिरवर्णविचित्राणि 'द्वन्द्वः', रुचिरवर्णविचित्राण्येव पुष्पाणि

यस्यां सा रुचिरवर्णविचित्रपुष्पा तां 'बहुव्रीहिः'; अथवा रुचिरवर्णा एव विचित्राणि - पञ्चवर्णतया मनोज्ञानि पुष्पाणि यस्यां सा (ताम्), कुसुमानां पञ्चवर्णत्वं प्रसिद्धमेव, अतो विचित्रेतिपदं पुष्पस्यैव विशेषणम्। तं-पुरुषं लक्ष्मी - राज्यस्वर्गोपवर्गसत्का श्रीः अवशा-तद्गतचित्ता । पुरुषं किंलक्षणम्? 'मानतुंगं' पूजोन्नतम्। मानेन तुङ्गो मानतुङ्गस्तं मानतुङ्गं 'तत्पुरुषः'। मानतुङ्गमिति विशेषणं कथयता स्तोत्रकर्त्रा कविना मानतुङ्ग इति स्वनाम बन्धननिगडाद्युपद्रवनाशो राजप्रसादश्चासूचि। 'समुपैति' समन्तात् पार्श्वमायातीति मङ्गलम्॥४४॥

॥ इति भक्तामरस्तोत्रवृत्तिः समाप्ता ॥

श्रीमत्तपगणगगना - ङ्गणदिनमणिहीरविजयसूरीणाम्।
शिष्याणुना विरचिता, वृत्तिरियं कनककुशलेन ॥१॥
नयनशररसेन्दु (१६५२) मिते, वर्षे वैराटनाम्नि वरनगरे ।
बालजनविबोधार्थं, विजयदशम्यां हि स(सा) समास (प्ता?)
॥२॥ - युगलम्

श्लोकानां षट्शती षोडशोत्तरा समजायत प्रत्यक्षरं गणनया वृत्तौ संख्या निवेदिताऽत्र, अङ्कतोऽपि ६१६, सूत्रसहितवृत्तेर्ग्रन्थाग्रं ६९६ समाप्तम्॥

सकलपण्डितशिरोमणिपण्डितश्रीश्रीकेसरसागरगणिशिष्यगणि अनन्तसागरलिपीकृतं संवत् १७६३ वर्षे मृगशिरवदि ४ (दि) दिने श्रीआयुपुरनगरे श्रीशान्तिजिनप्रसादात्॥ श्रीरस्तु॥ कल्याणमस्तु ॥ शुभं भवतु ॥ छ ॥ छ ॥

* * *

श्री गुणाकरसूरिविरचिता

।। भक्तामरस्तोत्रविवृत्तिः ।।

पूजाज्ञानवचोऽपाया - पगमातिशयाद्भुतम् ।

श्रीनाभेयं नमस्कुर्वे, सर्वकल्याणकारकम् ।।१।। - अनुष्टुप्

महारजतसद्वर्णं, महानन्दविभूषणम् ।

महावीरं जिनं वन्दे, महामोहतमोऽपहम् ।।२।।

श्रुतदेवीप्रसादेन, भक्तामरवरस्तवे ।

वार्ताः काश्चिच्चमत्कार--कारिणीः सार्थिका प्रथे ।।३।।

भक्तामर० यः संस्तुत० इत्यनयो र्व्याख्या -

तद्यथा - पुराऽमरावतीजयिन्यां श्रीउज्जयिन्यां पुरि वृद्धभोजराज-पूज्योऽधीतशास्त्रपूरो मयूरो नाम पण्डितः प्रतिवसति स्म, तज्जामाता बाणः, सोऽपि विचक्षणः। द्वयोरन्योऽन्यं मत्सरः। उक्तं च -

''न सहन्ति इक्कमिक्कं, न विणा चिट्ठन्ति इक्कमिक्केण ।

रासहवसहतुरङ्गा, जूआरा पण्डिया डिम्भा ।।१।।'' - आर्या

अन्येद्युर्विवदमानौ तौ भूपेनोक्तौ-भो पण्डितौ! युवां काश्मीरान् गच्छतम्, तत्र भारती[१] यं पण्डितमधिकं मन्यते स एवोत्कृष्टः। तौ सपाथेयौ चेलतुः माधुमतान्[२] । पथि व्रजन्तौ सभरणप्रष्ठौहां पञ्चशतीं दृष्ट्वा बालीवर्दिकान् पप्रच्छतुः-अत्र किम्?। त ऊचुः-ओमकारवृत्तिपुस्तकानि। पुनर्वृषभपञ्चशतीं दृष्ट्वा यावद् द्विसहस्रीं ददृशतुः, सर्वेष्वोंकारविवरणमपूर्वं मत्वा गतगर्वौ बभूवतुः। तौ क्वाप्येकत्र सुषुपतुः। जागरितो मयूरो वाण्या[३] ''शतचन्द्रं नभस्तलम्'' इति समस्यापदं वदन्त्या, अर्धोत्थितेन तेन -

१. सरस्वती। २. काश्मीरान्। ३. सरस्वत्या।

दामोदरकराघात - विह्वलीकृतचेतसा।

दृष्टं चाणूरमल्लेन, शतचन्द्रं नभस्तलम्।।१।।

इति पूरिता समस्या। बाणोऽपि तथैव पृष्टः, हुंकारं कृत्वा तेनापि कथिता -

यस्यामुत्तुङ्गसौधाग्र - विलोलवदनाम्बुजैः।

विरराज विभावर्यां, शतचन्द्रं नभस्तलम्।।१।।

देव्योक्तम् - द्वावपि कवी, शास्त्रज्ञौ च, परं बाणो हुंकारकरणेन न्यूनः, इयमोंकारवृत्तिपुस्तकावली मया दर्शिता, गीर्देवीकोशस्य कः पारं प्राप्तः? उक्तं च -

''मा वहउ कोइ गव्वं, इत्थ युगे पण्डिओ अहं चेव।

आ सव्वन्नाओ पुण, तरतमजोगेण मइविहवा।।१।।'' - आर्या

इति, तयोः सख्यं कारितं सरस्वत्या, बहिर्वृत्त्या मिलितौ तौ चलितौ, स्वगृहं प्रति क्रमेण प्राप्तौ, राजानमसेविषातां प्राग्वत्। उक्तं च -

''मृगा मृगैः सङ्गमनुव्रजन्ति

गावश्च गोभिस्तुरगास्तुरङ्गैः।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः

समानशीलव्यसनेषु सख्यम् ।।१।। '' - उपजातिः

एकदा बाणस्य स्वस्त्रिया सह प्रणयकलहः सञ्जज्ञे। सा कामिनी मानिनी मानं नामुञ्चत्। रजनी बहुरगमत्। मयूरः शरीरचिन्तार्थं व्रजन् तं भूभागमागमत्, वातायने दम्पत्योर्ध्वनिं श्रुत्वा तस्थौ। पतिव्रते! क्षमस्वापराधमेकम्, न पुनः कोपयिष्ये त्वामित्युक्त्वा बाणः पत्नीपादयोरपतत्। सा सनूपुरेण चरणेन तं जघान। [१]तुलाकोटिक्वणश्रवणान्नम्ररमणापमाननाद् दूनो गृहगवाक्षाधोभागस्थो मयूरोऽभवत्। बाणस्तु नव्यं पद्यमपाठीत्

१. तुलाकोटिः-नूपुरम्।

गतप्राया रात्रिः कृशतनुशशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तो मानस्त्यजसि न यथा त्वं क्रुधमहो !
कुचप्रत्यासत्या हृदयमपि ते सुभ्रु ! कठिनम् ॥१॥ - शिखरिणी

इति श्रुत्वा मयूरो बाणमभाणीत्-सुभ्रुपदं मा वादीः, सकोपनत्वाच्चण्डि ! कठिनमित्थं पठेत्याकर्ण्य सा सती मुखस्थताम्बूलरसक्षेपात् कुष्ठी भवेति पुत्रीचरित्रप्रकाशकं तं शशाप। तत्क्षणं कुष्ठमण्डलान्यभवंस्तत्तनौ। बाणः प्रातः पूर्वमेव नृपपर्षदं यातो वरकवस्त्रं परिधाय समेतं मयूरं प्रति 'आविउ वरकोढी' इति श्लिष्टं वच उवाच। राज्ञा तद् ज्ञात्वा दृष्ट्वा च कुष्ठं निर्गमय्यागन्तव्यमित्यवादि मयूरः। स सूर्यप्रासादे स्थिरीभूयैकमना उपविश्य -

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्ता तुल्यकालं कमलवनरुचेर्वारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥१॥ - स्रग्धरा

इत्यादिवृत्तशतेन सूर्यं तुष्टाव।

शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्ते -
र्दत्तार्थाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम् ॥१॥ - स्रग्धरा

इत्येतस्मिन् षष्ठे वृत्ते पठिते प्रत्यक्षीभूतो जगत्कर्मसाक्षी। मयूरो नत्वा (तं) उवाच-देव ! कुष्ठं निर्गमय। सूरः प्राह-हे भद्र ! अहमपि वडवारूपरत्नादेव्या अनिच्छाभिगमाच्छापकुष्ठमनुभवाम्यद्यापि पदयोः, तव तु सतीशापकुष्ठमेककिरणदानादाच्छादयिष्यामीत्युक्त्वाऽगान्नभो नभोमणि। स चैककरस्तदङ्गमावृत्य कुष्ठमनीनशत्, जनो रञ्जितः, राजा तमपूजयत्। मयूरमहिममत्सरी बाणः पाणिचरणौ वर्धयित्वा कृतप्रतिज्ञः-

मा भाङ्क्षीर्विभ्रमं भूरधरविधूरता केयमस्यास्यरागं
प्राणे प्राण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूलम् ?
इत्युद्यत्कोपकेतून् प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नंह्रिरंहः ॥१॥

इत्यादिकाव्यशतेन चण्डिकां नुनाव। आद्यवृत्तस्य षष्ठे वर्णे साक्षाद्भूता चण्डी तच्चतुरङ्गानि पुनर्नवीचकार। ततस्तस्यापि महती पूजा राज्ञा चक्रे। तयोर्महिमानं महीयांसमालोक्य किं शिवदर्शनं विनाऽन्यत्राप्येतादृक्षसप्रभावकवित्वशक्तिकलितः कोऽप्यस्ति? इति पार्षद्यानपृच्छत् श्रीभोजः। राजमन्त्री श्रावकोऽवक् - देव! शान्तिस्तवविधातृश्रीमानदेवाचार्यपट्टमुकुटाभयहरभक्तिभरस्तवादिकरणप्रकटाः श्रीमानतुङ्गसूरयः श्वेताम्बराः सन्ति। आनायिता नृपेण, प्राप्ताः पर्षदं, राजदत्तासनासीनाः -

जटाशाली गणेशार्च्यः, शङ्करः शाङ्कराङ्कितः।
युगादीशः श्रियं कुर्याद्, विलसत्सर्वमङ्गलः ॥१॥

इत्याशिषं प्रोचुः, पृष्टाश्च काञ्चन कवित्वकलां वित्थेति। ते ऊचुः - महाराज! यदि निगडबद्धमात्मानं मोचयित्वा निस्सरामि तदा कोऽप्यादिदेवप्रभावो ज्ञेयः। ततो राज्ञा लोहभारशृङ्खलनद्धसर्वाङ्गाः सतालकद्विचत्वारिंशन्निगडनियन्त्रिता उत्पाट्य प्राज्यकपाटसम्पुटयुक्तगृहान्तः क्षिप्ताः, एकैकेन वृत्तेनैकैकान्दुकतालकभञ्जनाङ्गीकारं कारिताश्च। मुक्ताःप्राहरिका बहिः। प्रभुभिर्भक्तामरेत्यादिस्तवं चक्रे। बन्धनानि तुत्रुटुः क्रमेण। एके वदन्ति द्विचत्वारिंशता वृत्तेनैकेन निगडाः पेतुः, तालकभङ्गोऽजनिष्ट, कपाटसम्पुटः स्वयमेवोदघटिष्ट, प्राहरिकैः सह बहिरागताः सूरयः, नमस्कृता भोजेन, सिंहासनमारोपिताश्च। [१]अदमुयङ्भूद् भूपः, जैनदर्शनं सकलमिति मेने॥

॥ इति स्तवमूलप्रबन्धः ॥

१. अमुं अञ्चतीति अदमुयङ् एतत्पूजकः।

दण्डान्वयः - श्रुतवताम् परिहासधाम अल्पश्रुतम् माम् बलात् त्वद्भक्तिः एव मुखरीकुरुते किल मधौ कोकिलः यत् मधुरं विरौति तत् चारुचूतकलिकानिकरैकहेतुः।

हे मुनीश ! मां त्वद्भक्तिरेव मुखरीकुरुते इत्यन्वयः। 'मुखरीकुरुते' इति क्रियापदम्। वाचालं कुरुते इत्यर्थः। का कर्त्री? 'त्वद्भक्तिः' तवानुरागः कं कर्मतापन्नम्? 'माम्'। कस्मात् ? 'बलात्' हठात्। कथंभूतं माम्? 'अल्पश्रुतं' न बहुशास्त्रज्ञम्। पुनः किंवि० माम्? 'श्रुतवतां' शास्त्रज्ञानां 'परिहासधाम' हास्यस्थानम्। उक्तार्थे युक्तिमाह- 'किल' इति सत्ये।

कोकिलः यत् मधौ मधुरं विरौति इत्यन्वयः। 'विरौति' इति क्रियापदम्। जल्पतीत्यर्थः। कः कर्ता? 'कोकिलः' पिकः। किं कर्मतापन्नम्? 'यत्'। 'मधुरं' प्रियम्। कस्मिन्? 'मधौ'वसन्ते। यत्तदोर्नित्याभिसम्बन्धात् तदिति ।

'तत्र चारुचूतकलिकानिकरैकहेतुः',। 'भवति' इति शेषः। 'भवति' इति क्रियापदम्। कः कर्ता? 'चारुचूतकलिकानिकरैकहेतुः' मनोहर आम्रमञ्जरीसमूह एव एकः- अद्वितीयो हेतुः-कारणमित्यर्थः। आम्रमञ्जरीकवलीकरणेनैव तत्कूजने माधुर्यं भवति इति भावः। तथापि (थैव) ममापि स्तवनप्रवृत्तौ मुख्यो हेतुस्त्वद्भक्तिरेवेति हृदयम्॥

अथ समासा :- अल्पं श्रुतं यस्य स तम्। प्रशस्तं बहु श्रुतं येषां ते श्रुतवन्तस्तेषाम्, *'भूम्नि प्रशंसायां वा मतुप्'। यदुक्तं (श्रीकात्यायनवार्तिकपाठे ३१८३)*

> **"भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने।**
> **संसर्गेऽस्ति विवक्षायां, प्रायो मत्वादयो मताः ॥१॥"** --अनु०

श्रुतं विद्यते येषां ते श्रुतवन्तः, तेषाम्। परिहसनं-परिहासः, परिहासस्य धाम परिहासधाम *तत्पुरुषः*। तव भक्तिस्त्वद्भक्तिः। एवेति निश्चये। मुखं-वाग् अस्यास्तीति मुखरः, *'मध्वादिभ्यो रः' (सिद्ध. अ. ७, पा. २, सू. २६) इति हैमवचनात् अस्त्यर्थे रप्रत्ययः*, अमुखरं मुखरं कुरुते इति मुखरीकुरुते, *च्विप्रत्ययः*। चारुश्चासौ चूतश्च चारुचूतः चारुचूतस्य कलिकाः चारुचूतकलिकाः, चारुचूत-

अथ स्तवार्थ उच्यते, यथा -

सम्यग् जिनपादयुगं प्रणम्य किल अहमपि तं प्रथमं जिनेन्द्रं स्तोष्ये इति सम्बन्धः। जिनस्य-प्रथमतीर्थकृतः पादौ-चरणौ तयोर्युगं-युग्मं जिन-पादयुगं, सम्यक्-त्रिकरणशुद्ध्या नत्वा। किम्भूतम्? भक्ताः -परिचर्या-युक्ता येऽमरा - देवास्तेषां नमस्कारवशात् प्रणता-नम्रा ये मौलयो मुकुटानि शिरांसि वा तेषु तेषां वा ये मणयः - चन्द्रकान्तादयस्तेषां प्रभा-रुचयस्तासां भक्तामरप्रणतमौलिमणिप्रभाणां, उद्द्योतयतीत्यद्द्योतकं-प्रकाशकं तत्; दलितं-क्षिप्तं पापमेव तमोवितानं-ध्वान्तजालं येन तत्; ऋजुजडन-राणां शिल्प-नीति-लिपि-कलादर्शनात् च चतुः-पुरुषार्थप्रकटनात् (चतु-ष्षष्टिमहिलागुणदर्शनात्) द्विविधधर्मप्रकाशनाद् वा भगवता सुषमदुष्षमा-प्रान्तेऽपि युगादिः कालः कृतः, अतो युगादौ, भवो-जन्मजरामरणरूपः संसारः, स एव जलं, तत्र भवजले पततां -मज्जतां जनानां-भव्यसत्त्वानामालम्बनम्-आधारः सदुपदेशात्। अथ सामान्यजिनपादयुगं प्रणम्य युगादौ प्रथमसमवसरणे तीर्थप्रवर्तनाद् यथा जले पततां द्वीपं यानपात्रं वाऽऽलम्बनं तथा भवे निमज्जतां जिनपादारविन्दमेवाधारः। किलेत्यव्ययं सत्यागममङ्गलार्थवाचि। अहमपि-मानतुङ्गाचार्योऽज्ञोऽपि अनौद्धत्ये सुरेन्द्राद्यपेक्षया जडधीः, नान्येषामपेक्षयेति हृदयम्, स्तोष्ये-गुणोद्भासनेन कीर्तयिष्यामि, तं प्रथमं-श्रीनाभेयं जिनेन्द्रं - जिनप्रभुम्। अथ प्रथमं-प्रसिद्धं आदौ वा सामान्यतीर्थकरम्। यत्तदोर्नित्याभिसम्बन्धाद् यो भगवान् स्तोत्रैः- शक्रस्तवाद्यैः सुष्ठु राजन्ते इति सुरास्तेषां लोको-जगत्स्वर्ग-स्तस्य नाथैः-प्रभुभिः सुरलोकनाथैः संस्तुतः-सम्यग् नुतः। अथवा सुरश्चासौ लोकश्च सुरलोको-देवसमूहस्तस्य नाथैः- इन्द्रैः। किम्भूतैस्तैः? सकलं-सम्पूर्णं यद् वाङ्मयं - शास्त्रजातं तस्य तत्त्वं - रहस्यं तस्य बोधाद्-ज्ञानात् - परिच्छेदाद् उद्भूता-उत्पन्ना या बुद्धिः-प्रज्ञा तया

पटुभिः-कुशलैः। स्तोत्रैः किम्भूतैः? जगतां भूर्भुवः (स्वः) स्वरूपाणां त्रितयं, तस्य चित्तं हरन्तीति ते तथा तैः उदारैः महार्थैः ॥

अत्राद्यवृत्तेऽतिशया यथा - उद्द्योतकमिति 'पूजातिशयः', दलितपापतमोवितानमिति 'अपायापगमातिशयः', आलम्बनमिति 'ज्ञानवचनातिशयौ', यतो ज्ञानी सद्वाक्यश्च जनाधारो भवति ॥

अत्र चाम्नायः - श्रीऋषभस्वामी वर्षसहस्रं विहृत्य विनीतायाः शाखापुरे पुरिमतालाख्ये शकटमुखोद्याने न्यग्रोधतरोरधः केवलभागभूत्, यमकेन भरतो वर्धितः, तदैव शस्त्रशालायां चक्रप्रादुर्भावात् शमकेनापि, समकं द्वयोर्मुखाद् वर्धापनमाकर्ण्य क्षणं विमृश्य पितामह्या सह गजेन्द्रारूढो (भरतः) सर्वगुणं तातं वन्दितुमगात्। मरुदेवी देवदुन्दुभिं जयजयारवं च श्रुत्वा भरतमाह स्म-वत्स ! कोऽयं कोलाहलः?। भरतोऽवदत् - वृद्धमातः ! त्वत्पुत्रपुण्याकृष्टानां सुराणां जयजयक्वणो दुन्दुभिध्वनिः प्रभुदिव्यध्वनिश्च वर्तते। तस्या अमन्दानन्दाश्रुजलं गलितं, नीलपटलमक्ष्णोर्गतम्। प्राकारच्छत्रत्रयचैत्यद्रुमेन्द्रध्वजादिविभूतिं पश्यन्ती चेतसीत्यचिन्तयत् स्वामिनी-धिङ् मोहविह्वलान् प्राणिनः, स्वार्थे स्निह्यन्ति जन्तवः, मोहः क्लेशहेतुर्मयाऽनुभूतः। अहमहरहः[१] शीतातपवर्षापीडासहमनुपानहं निर्यानं निरशनं निर्वसनं गिरिकन्दरादिष्वटन्तं मत्सुतं संमान्यानयेति भरतं भणामि, शोकदुःखेन दृशौ गते, एष एवंविधामृद्धिं प्राप्तो मन्नामापि न पृच्छति, मद्दुःखं च न वेत्ति, स्वास्थ्यहेतुं सन्देशमात्रं न दत्ते, अहो वीतरागत्वमस्य ! नीरागे कः प्रतिबन्धः? समस्तवस्तुषु निर्ममतां गता भगवती, दध्यौ च -

यत्रैवाहमुदासे, तत्र मुदाऽऽसे स्वभावसन्तुष्टः ।
यत्र च वस्तुनि ममता, मम तापस्तत्र तत्रैव ॥१॥ - आर्या

इति, क्षीणमोहा ध्वस्तसमस्तकर्मा अन्तकृत्केवली सिद्धो मरुदेवी-

१ प्रतिदिनम् ।

जीवः। देवैर्महिमा चक्रे, क्षीराब्धौ क्षिप्तं वपुः। भरतः पितामहीवियोगभगवद्दर्शनाभ्यां शोकानन्दयुक् (ग्रन्थाग्रं १००) पञ्चविधाभिगमेन जिनं नत्वोपाविशत् सदसि।

''अपारे संसारे कथमपि समासाद्य नृभवं
न धर्मं यः कुर्याद् विषयसुखतृष्णातरलितः।
बुडन् पारावारे प्रवरमपहाय प्रवहणं
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते ॥१॥'' - शिखरिणी

- सिन्दूरप्रकरे, श्लो. ७

इत्यादि भगवद्धर्मदेशनां श्रुत्वा ऋषभसेनादयः साधवः, ब्राह्म्याद्याः साध्व्यः, भरतप्रमुखा उपासकाः, सुन्दरी-सुभद्राप्रभृतयः श्रमणोपासिका, सुराः सम्यक्त्वधरा अभवन्। ततस्तीर्थं प्रववृते। भरतवर्षे सिद्धिपन्थोद्घाटितः प्रभुणा, अतो युगादावालम्बनं जिनेश्वरः ॥

अत्र मन्त्राम्नायो यथा -

ॐ नमो वृषभनाथाय, मृत्युञ्जयाय, सर्वजीवशरणाय, परमपुरुषाय, चतुर्वेदाननाय, अष्टादशदोषरहिताय, अजरामराय, सर्वज्ञाय, सर्वदर्शिने, सर्वदेवाय, अष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयसहिताय, श्रीसमवसरणे द्वादशपर्षद्वेष्टिताय, दानसमर्थाय, ग्रह-नाग-भूतयक्ष-राक्षस-शङ्कराय, सर्वशान्तिकराय। मम शिवं कुरु कुरु स्वाहा। इति मन्त्रजापाद् विपत्प्रलयो हेमवत् ॥

एकदा जैनमतद्वेषिभिर्द्विजैर्भोजराजस्य पुरोऽजल्पि-नरेश्वर ! यद्यपरः कोऽपि स्तवमाहात्म्यं दर्शयति तदा सत्यः स्तवप्रभावः, श्रीमानतुङ्गाचार्यैस्तदा कयाचिन्मन्त्रशक्त्या देवतासान्निध्येनौषधीबलेन वा निगडभञ्जनं विदधे, इति श्रुत्वा पृष्टाः पार्षद्याः पृथ्वीपालेन - अस्ति स्तोत्रस्मर्ता कश्चिन्नरः?। एकेनोक्तं-स्वामिन्! वर्तते हेमश्रेष्ठी यो

वर्णमात्राशुद्धं भक्तामरस्तवमधीयानो जपति च। आकारितः कौतुकिना काश्यपीकान्तेन । आयातो हेमः, प्रणतो भोजः । नृपेणोक्तः - स्मरसि स्तवम्?। तेनोचे-बाढं स्मरामि। (भूपो जगौ -) तर्हि त्वया स्तवप्रभावाद-न्धावटान्निःसरणीयम्। नागपाशैर्बद्ध्वा क्षिप्तो हेमोऽन्धकूपे, प्राहरिकाः स्थापिताः, दिनत्रयं चावधीकृतम्। प्रथमेऽहनि रजनीप्रथमयामे प्रथमजिन-स्तवनप्रथमवृत्तद्वयजपनात् प्रत्यक्षीभूतया चक्रेश्वर्याऽन्धकूपान्तरालमुद्द्योत्योक्तो हेमः - वत्स ! प्रातर्भूपपुरस्त्वां नेष्यामि, जपितस्तवाद्यपद्यद्वयाद् राजा मत्कृतनागपाशेभ्यो मोचनीयः पानीयच्छटया । ततो देव्या नागपाशैर्बद्धो भूपो यथा शयनीयादप्युत्थातुं न शशाक । अथ नभः-स्थयाऽप्रतिचक्रयोचे-रे रे दुष्ट ! हेमं समानय यथा तद्भणितस्तवमन्त्राभि-मन्त्रितजलच्छटया त्रुटन्ति तव बन्धनानि। भूभुजोक्तम् - भो सेवकाः ! शीघ्रं कूपान्निष्कासनीयो हेमः, निर्बन्धनोऽत्रानेतव्यश्च भवद्भिः । यावते-त्यलपद् भूपस्तावद् देवीप्रभावात् तत्रोर्ध्वस्थो दृष्टो हेमः, विस्मितः सपरिकरो नृपवरः, प्रथमवृत्तद्वयजपिताम्भःसेकात् सज्जीकृतश्च। तर्जितो देव्या नृदेवः- किं पुनः सर्वसुरार्चितस्य श्रीऋषभस्य स्तोत्रप्रभावं पश्यसि ?। एतदज्ञानचेष्टितं सह्यं ममेति जजल्प निर्विकल्पः प्रभुर्भुवः, (अप्रति)- चक्राचरणयोरपतच्च। तिरोऽधाद् देवी। (राज्ञा) बन्धुवन्मानितो हेमः स्वासनमारोपितश्च, स्तवचिन्तामणिर्हृदि रक्षामणिः कृतः। परमजैनो जातो राजा, (जिनशासनस्य) महती प्रभावना प्रससार, सर्वत्र परमानन्द-श्चाजनि ॥

॥ इति हेमकथा प्रथमा ॥१॥

* * *

अथ कविरात्मौद्धत्यं परिजिहीर्षुराह - बुद्ध्येत्यादि -

हे विबुधार्चितपादपीठ ! - हे दैवतव्रातपूजितपदासन ! जिन! बुद्ध्या-

प्रज्ञया विनाऽप्यहं-मानतुङ्गाचार्यः स्तोतुं समुद्यतमतिः-स्तवाय कृतमति-व्यापारो वर्ते, अत एव विगतत्रपः - अशक्यवस्तुनि प्रवर्तनान्निर्लज्जः। दृष्टान्तमाह-बालं - शिशुं विहाय-मुक्त्वा कोऽन्यः - अपरो जनः सचेतनो जलसंस्थितं - नीरकुण्डमध्यप्रतिबिम्बितमिन्दुबिम्बं-चन्द्रमण्डलं ग्रहीतुं-लातुं सहसा-तत्कालमिच्छति-अभिलषति? बालस्तद्ग्रहणाग्रहग्रहिलो भवति, नापरः, अहमपि बालरूपो ज्ञेय इति। औद्धत्ये त्वहं तादृशमति-शक्तिविकलो दुष्करकवित्वधुरोद्धरणाङ्गीकरणनिर्वहणात् प्राज्ञधुरन्धरेषु प्राधान्यं प्राप्स्यामीति, यतस्तद्विदः- कवित्वश्रमविदः । उक्तं च -

"विद्वानेव हि जानाति, विद्वज्जनपरिश्रमम् ।

न हि वन्ध्या विजानाति, गुर्वीं प्रसववेदनाम् ॥१॥ " -- अनु.

इत्याशयः ॥३॥

* * *

अथ जिनेन्द्रस्तुतावन्येषां दुष्करतां दर्शयन्नाह - वक्तुमित्यादि

हे गुणसमुद्र ! - स्थैर्यगाम्भीर्यधैर्यादि गुणरत्नरत्नाकर! को बुधस्ते - तव शशाङ्ककान्तान् - निर्मलकलाभृत्कमनीयान् शान्ततादीन् गुणान् वक्तुं-जल्पितुं क्षमः-समर्थः ? किंभूतोऽपि ? बुद्ध्या-प्रतिभया सुरगुरुप्र-तिमोऽपि - वाचस्पतिसमोऽपि। अत्र दृष्टान्तः - वा उपमितौ । कस्तरणकलाकुशलो नरो भुजाभ्यां - बाहुभ्यामम्बुनिधिं - सागरं तरीतुं - पारं प्राप्तुमलं-शक्तः? अपितु न कश्चिदित्यर्थः। किंभूतमम्बुनिधिम्? कल्पान्तकालस्य पवनेनोद्धतानि-अविनीतानि दुर्दर्शानि उद्धतान्यूर्ध्वं चलितानि वा नक्रचक्राणियादोवृन्दानि यत्रेति समासः। प्रलयमरुत्प्रेरितदुष्टजन्तुजा-तमित्यर्थः। यथा युगान्तक्षुब्धाब्धितरणं दुःशकं तथाऽर्हत्कीर्तनं गीर्पतेरपि दुर्घटम्, तत्राहं प्रवृत्तः समर्थ इवाभास्यामि विद्वज्जने, इत्यौद्धत्यम् ॥

अत्रापि मन्त्रः प्राक् कथित एव ॥

प्रभावे कथा यथा -

वार्धिर्बाहुफलकेन, तीर्णश्चक्राप्रसादतः।

पुराऽभूत् सुमतिः श्रीमान्, स्तवचिन्तामणिस्मृतेः ।।१।। – अनु.

पुरोज्जयिन्यां पुरि दारिद्र्यवसतिर्भद्रकप्रकृतिः सुमतिर्वणिगभूत्। स च कञ्चन जैनमुनिमवन्दत । तस्याग्रे मुनिर्देशनामित्थमकृत -

''धणओ धणत्थियाणं, कामत्थीणं च सव्वकामकरो ।

सग्गापवग्गसङ्गम-हेऊ जिणदेसिओ धम्मो ।।१।। '' -- आर्या

किञ्च -

''धम्म विहूणउ न सुक्ख वियाणहिं परघरि पाणिउ इंधणु आणहिं।

खण्डहिं दलहिं करहिं विलोडणु तहवि न पावहिं किंचिवि भोयणु ।।२।।

अधमजातिरनिष्टसमागमः प्रियवियोगभयानि दरिद्रता ।

अपयशोऽखिललोकपराभवो भवति पापतरोः फलमीदृशम् ।।३।।

- द्रुतविलम्बितम्

तं पुन्नह अहिनाणु जं गहिलाणवि रिद्धडी।

तं पुणु पावह माणु जं गुणवंतह भिक्खडी ।।४।।''

अहो ! श्वेताम्बरमहर्षिणा मदुचितो धर्मोपदेशो दत्त इति मत्वा मुनिवचः श्रुत्वा जिनधर्मं प्रपन्नो धनार्थी भक्तामरस्तवमध्यैष्ट। भक्त्य-वन्ध्यं त्रिसन्ध्यं शश्वज्जपति स्म । एकदा -

'' अत्थविहूणो पुरिसो, सुवंसजाओवि लहइ लहुअत्तं ।

पावइ परिभवठाणं, गुणरहिओ धणुहदंडुव्व ।।१।।'' - आर्या

इति विमृश्य सुमतिर्धनार्जनचिकीः समुद्रतटपुरं गत्वा पोतमारुरोह । क्रमेण बोहित्थेऽम्बुधिमध्यगे कल्पान्तवाता इव दुर्वाता ववुः। पूर्वं कादम्बिनीतिमिरपटली प्रबलदावानलधूमावलीव नभोमण्डलमरौत्सीत् । राक्षसीनेत्रकान्तकीलेव विद्युल्लता घनमध्ये नामांसीत् । नाविकजनश्रवो-

दुःश्रवं [१]स्तनयित्नुस्तनितं निर्घातपातसममभूत् । पीतमद्या इव सागरोर्मिष्वितस्ततश्चरन्तस्तिमि - तिमिङ्गिलपाठिनपीठनक्रचक्रमकरकूर्मशिशुमारादिदुष्टजलचरजन्तुवाराश्चुक्षुभुः। तलगता अपि वालुकाकणाः कर्ममुक्ता इवोर्ध्वं जग्मुः । जगज्जिग्रसिषुराक्षस इवोन्मुमूर्च्छोर्मिमाला । धाटीक्षुभिता इव सांयात्रिकाः कान्दिशीकाः कोलाहलं चक्रुः स्वाभीष्टदेवान् सस्मरुश्च। नाङ्गरः सागरोपर्यतिष्ठन् दुर्जन इव क्वापि स्थितिं न लेभे । सितपटः पोतवणिग्मनोरथवत् खण्डशोऽभूत्। कृतघ्नस्नेहा इव सज्जा अपि रज्जवस्तुत्रुटुः। सुवंशा अपि पोतविध्वंसरक्षणेऽक्षमा अभूवन्। तत्र क्षणे केऽपि मुनय इव कर्मग्रन्थिमिव कूपकस्तम्भं चिच्छिदुः। केऽपि कान्ताङ्गमिव फलकं कराभ्यां गाढं जगृहुः। केऽपि गुरुवाक्यमिव साररत्नादि हृन्मध्ये दधुः। अत्रान्तरे भूतार्त इव कालज्वरार्त इव पापीव पोत इतस्ततो भ्रान्त्वा भग्न उपकार इव कृतघ्ने । सर्वोऽपि वस्तुस्तोमोऽम्भोधिमध्ये मग्नः सुमतिस्तुर्यं वृत्तं स्मरन् चक्रेश्वर्यनुभावाद् बाहुभ्यां तटिनीशं तरंस्तटे लग्नः। प्रत्यक्षीभूय देवी तस्मै पञ्चाक्षसमं रत्नपञ्चकं ददौ, नगरमानीतश्च राजमान्यो वदान्यो धन्यो धर्मी धनं विललास, काशप्रकाशयशाः सुमतिर्दृष्टधर्मातिशयः परमश्रावकोऽभूत् ॥ ४ ॥

॥ इति द्वितीया कथा ॥२॥

❊ ❊ ❊

अथ स्तवकरणप्रवृत्तौ कारणमाह - सोऽहमित्यादि

हे मुनीश ! - सकलयोगीश ! तथापि तव स्तोत्रकरणासामर्थ्ये सत्यपि सोऽहं क्षीरकण्ठकुण्ठप्रज्ञोऽपि स्तवारम्भे विगतशक्तिरपि-क्षीणबलोऽपि। डमरुकमणिन्यायेनोभयत्रापि तव प्रयोगः। तव-भवतो भक्तिवशात्-सेवाग्रहात् तव स्तवं-स्तुतिं कर्तुं विधातुं प्रवृत्तः - कृतोद्यमो जातः।

१. मेघनादम् ।

अत्रोपमानम्-मृगो-हरिण आत्मवीर्यं-निजबलम् अविचार्य-अविचिन्त्य निजशिशोः-स्वीयबालस्य प्रीत्या-प्रेम्णा परिपालनार्थं-परिरक्षणाय मृगेन्द्रं-सिंहं किं नाभ्येति-किं न युद्धायाभिमुखो व्रजति? अपितु व्रजत्येव। अनौद्धत्ये यथा मृगः सिंहाभिगमे भग्नविक्रमो हास्यास्पदं तथाऽहं त्वत्स्तोत्रकरणे इति। औद्धत्ये तु यथा कुरङ्गो मृगेन्द्राभिमुखोत्थाने अबलोऽपि स्वबालपालनाय व्रजन् श्लाघां लभते । केसरिणस्तु मृगेण सह युद्धं लज्जायै। उक्तं च -

''मृगारिं वा मृगेन्द्रं वा, सिंहं व्याहरतां जनः ।

तस्य द्वयमपि व्रीडा, क्रीडादलितदन्तिनः ॥१॥'' -- अनु.

तथापि मतिमन्दोऽहं त्वद्भक्तिपारवश्यात् स्तवनप्रवृतौ कृतयत्नः कृतिनां कीर्तिपात्रं भवितेति वृत्तगर्भार्थः ॥५॥

❊ ❊ ❊

अथ कविरसामर्थ्येऽपि वाचाटताहेतुमाह - अल्पश्रुतमित्यादि

हे विश्वविश्रुत ! श्रुतधरवरिवसितचरण ! त्वद्भक्तिरेव - त्वच्छुश्रूषैव बलात् हठादतिशयात् मां-मानतुङ्गाचार्यं मुखरीकुरुते-अबद्धमुखीकरोति, वाचालं विधत्ते इत्यर्थः। मां किंभूतम्? अल्पानि-स्तोकानि श्रुतानि-शास्त्राणि यस्येति विग्रहस्तम्। अथाल्पशब्दोऽभाववाची । अल्पश्रुतमश्रुतमित्यनौद्धत्यम्। (ग्रन्थाग्रं २००) अत एव श्रुतवतां - दृष्टशास्त्राणां विदुषां परिहासधाम - हास्यास्पदम्। अत्र दृष्टान्तदृढता - किलेति सत्ये। यत् कोकिलः - कलकण्ठो मधौ-वसन्ते मधुरं - मृदुकण्ठं विरौति - कूजति तदहं मन्ये चारुचूतकलिकानिकरैकहेतुरस्ति। चार्व्यश्च ताः सकषायरसाश्चूतकलिकाः - सहकारस्य विकस्वरमञ्जर्यश्च (चारुचूतकलिकाः), चारूचूतकलिकानां निकरः-समूहः स चासौ एकहेतुश्चेति कर्मधारयः। तिक्तसुरभिसहकारस्मेरमञ्जरीपुञ्ज एव एकः कारणं विद्यते

इत्यर्थः। औद्धत्ये तु यथाऽऽम्रमञ्जरीकृतभोजनः पुंस्कोकिलो मधुरस्वरो भुवि मनोहरः स्यात् । उक्तं च -

''उत्कूजन्तु वटे वटे बत बकाः काका वराका अपि
क्रां कुर्वन्तु सदा निनादपटवस्ते पिप्पले पिप्पले ।
सोऽन्यः कोऽपि रसालपल्लवनवग्रासोल्लसत्पाटवः
क्रीडत्कोकिलकण्ठकूजनकलालीलाविलासक्रमः ॥१॥'' - शार्दूल०

तथाऽहं स्तोकग्रन्थोऽपि त्वदुक्त्या स्तवं कुर्वाणः प्रवीणश्रेणौ लब्धवर्णो भावीति वृत्तभावार्थः ॥६॥

* * *

हेतुमुक्त्वा स्तवकरणे यो गुणस्तमाह - त्वत्संस्तवेनेत्यादि

हे सकलपातकनाशन ! जिन ! त्वत्संस्तवेन-भवद्गुणोत्कीर्तनेन शरीरभाजां-प्राणिनां भवसन्ततिसन्निबद्धं-जन्मकोटिसमर्जितं पापम्-अष्टविधं कर्म क्षणाद् घटिकाषष्ठांशेन स्तोककालाद् वा क्षयमुपैति-नाशमुपयाति। भगवत्स्वरूपध्यानाद् देहिनां साम्यं भवति। साम्यादुक्तपापक्षयो युक्तः । उक्तं च -

''प्रणिहन्ति क्षणार्धेन, साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्र - तपसा जन्मकोटिभिः ॥१॥'' - अनु०

अमुमेवार्थमुपमिमीते-पापं किमिव ? अन्धकारमिव। यथा शार्वरं-कृष्णपक्षरात्रिजं तिमिरं सूर्यांशुभिन्नं - सहस्रकररोचिर्विदारितं आशु-शीघ्रं क्षयं गच्छति यतः । किंभूतमन्धकारम्? आक्रान्तलोकं-व्याप्तविश्वं अलिनीलं-मधुकरकुलकृष्णं अशेषं-सकलं न तु स्तोकम् । पापविशेषणान्यप्यौचित्येन कार्याणि । यथा दुरितक्षयहेतुर्जिनस्तवः, तथा तिमिरनाशहेतुः सूर्योदय इति । उक्तं च -

'' रवेरेवोदयः श्लाघ्यः, किमन्यैरुदयान्तरैः ।
न तमांसि न तेजांसि, यस्मिन्नभ्युदिते सति ॥१॥'' - अनु०

इति वृत्तभावार्थः ॥७॥

अत्र मन्त्रोऽपि यथा -

ॐ ह्रां ह्रीं ह्रूं ऋषभशान्तिधृतिकीर्तिकान्तिबुद्धिलक्ष्मीह्रीं अप्रतिचक्रे ! फट् विचक्राय (यै) स्वाहा। शान्त्युपशान्तिसर्वकार्यकरी भव देवि ! अपराजिते ! ॐ ठः ठः। राजकुले विवादे कटकादिषु स्मर्यते।

एतन्माहात्म्ये सुधनोदाहरणम् -

"दिवाऽपि तमसाऽऽकीर्णाः, श्रेष्ठिभूपजिनालयाः।

धूलीपावैष्णवावासौ, रजोव्याप्तौ स्तवस्मृतेः ॥१॥" - अनु०

पाटलीपुरे पत्तने परमजैनः सुवासनः सधनः सुधननामा श्रेष्ठी बभूव। स स्वकारितप्रासादे श्रीआदिदेवस्यार्चामानर्च। तत्सम्पर्काद् राजा भीमः श्रावकोऽभूत्।

उक्तं च (नीतिशतके श्लो० १९)-

"जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्?॥१॥" -- वसन्त०

अन्यदा तत्र पुरोद्याने वैष्णवो धूलीपा नाम योगी आगात्। स च सिद्धक्षुद्रचेटकः सेवकीकृतपाषण्डिपेटकः पाटलीपुरीयं सर्वजनमाचकर्ष निजकलया। ततोऽसौ चित्ते जहर्ष कञ्चन जनं पप्रच्छ च मत्सेवनाय को नायाति नागरः? सोऽवदत् - श्वेताम्बरदर्शनभक्तिदृढौ राजश्रेष्ठिनौ नायाताम्। धूलीपाश्चेटकशक्त्या जिनराजश्रेष्ठिगृहेषु धूलीवृष्टिमकरोत्। प्रातः श्रेष्ठी पांसुपङ्क्तिपातेन प्रसृतं तमो दृष्ट्वा भक्तामरस्तवसप्तम-वृत्तगुणनावसरे प्रकटीचक्रे चक्रेश्वरीम्। सा चार्हच्छासनप्रभावनाचिकीः सुधनवचसा जिनभूपश्रेष्ठिगृहगतां धूलिं निरस्य वैष्णवमन्दिरे धूलीपा-

कलिकानां निकरः चारुचूतकलिकानिकरः, एकश्चासौ हेतुश्च एकहेतुः, चारुचूतकलिकानिकर एव एकहेतुः चारुचूतकलिकानिकरैकहेतुः, *'समासश्चान्वये नाम्नाम्' (सा. सू. ४६६) इति समासः। यदित्यत्र द्वितीयैकवचनं, वाक्यार्थमात्रवाचित्वे तु प्रथमाऽपि सम्भवति, तच्छब्दाग्रे चूतस्य पूर्वोक्तपरामर्शित्वेन प्रथमा, व्याख्यानान्तरेण सप्तम्यपीति, यत्तच्छब्दावव्ययावनव्ययौ च वर्तेते इति श्रीविजयसेनसूरिप्रश्नोत्तरग्रंथे। विरौतीत्यत्र 'रु शब्दे' धातुः 'युतुरुस्तुभ्य ईर्वा उर्वा' विरौति विरवीति इति रुपद्वयम्।। इति षष्टकाव्यार्थः।।६।।*

અર્થ : વિદ્વાનોના હાસ્યસ્થાન અને અલ્પશ્રુતવાળા મને બળાત્કારે તમારી ભક્તિ જ વાચાળ કરે છે, ખરેખર વસંતઋતુમાં કોયલ જે મધુર ટહુકાર કરે છે તેમાં સુંદર આંબાના મોર નો સમૂહ જ એક કારણભૂત છે !

* * *

अथ प्रवृत्तिहेतुमाख्याय सर्वजनदिव्यताहेतुमाह -

त्वत्संस्तवेन भवसन्ततिसन्निबद्धं
पापं क्षणात् क्षयमुपैति शरीरभाजाम्।
आक्रान्तलोकमलिनीलमशेषमाशु
सूर्यांशुभिन्नमिव शार्वरमन्धकारम्।। ७ ।।

दण्डान्वयः- शरीरभाजाम् भवसंततिसन्निबद्धम् पापम् त्वत्संस्तवेन क्षणात् क्षयम् उपैति इव आक्रान्तलोकम् अलिनीलम् शार्वरम् अशेषम् अन्धकारम् सूर्यांशुभिन्नम् आशु (क्षयम् उपैति)।

हे मुनीश ! त्वत्संस्तवेन पापं क्षणात् क्षयं उपैति इत्यन्वयः।

'उपैति' इति क्रियापदम्। किं कर्तृ? 'पापं' कल्मषम्। कं कर्मतापन्नम्? 'क्षयं' प्रलयं विनाशमितियावत्। केषाम्? 'शरीरभाजां' प्राणिनाम्। कस्मात्? 'क्षणात्' घटिकाषष्ठांशात्। केन? 'त्वत्संस्तवेन'। करणे तृतीया। किंविपापम्? 'भव(सन्तति) सन्निबद्धं' जन्मश्रेणिसञ्चितम्। अतिबहुलमित्यर्थः।

स्थाने च पांसुपूरमक्षिपत्। किमपि नास्फुरद् योगिनः । फालभ्रष्टद्वीपीव विलक्षः स्थितः। उक्तं च -

"तावद् गर्जन्ति मातङ्गा, वने मदभरालसा: ।

लीलोल्लालितलाङ्गूलो, यावन्नायाति केसरी ॥१॥" - अनु०

धूलीपा देवीतर्जितः श्रेष्ठिचेष्टितं ज्ञात्वा कथमपि श्रेष्ठिनः चरणे शरणमसरत् श्रेष्ठी राजस्थानमानयत् तम्। ततो धूलीपा विदितसर्वोदन्तः सुधनाद् धर्मं सुश्राव यथा -

"हिंसा त्याज्या नरकपदवी सत्यमाभाषणीयं

स्तेयं हेयं सुरतविरति: सर्वसङ्गान्निवृत्ति: ।

जैनो धर्मो यदि न रुचित: पापपङ्कावृतेभ्य:

सर्पिर्दुष्टं किमलमियता यत् प्रमेही न भुङ्क्ते ॥१॥" - स्रग्धरा

"देवेषु वीतरागाद्, देवो व्रतिषु व्रती च निर्ग्रन्थात् ।

धर्मश्च क्षान्तिकृपा-धर्मादस्त्युत्तमो नान्य: ॥२॥" - आर्या

इति धर्मं श्रुत्वा सम्यक् सम्यक्त्वधरोऽभूत्, श्रेष्ठिनं च गुरुमिव मेने । देव्या धूलिरुपशमिता । सूर्यांशुसदृशं जिनशासनप्रतापं व्यतिस्तरत् (?) सुधनः । देवाधिदेवं दृष्ट्वा तुष्टाव धूलीपाः।

जिनेन्द्रचन्द्रप्रणिपातलालसं

मया शिरोऽन्यस्य न नाम नम्यते ।

गजेन्द्रगल्लस्थलपानलम्पटं

शुनीमुखे नालिकुलं निलीयते ॥१॥ " - वंशस्थम्

इति सर्वोऽपि जनो भक्तामरस्तवमध्यगीष्ट, गरिष्ठगरिममन्दिरं श्रेष्ठी जातः॥

॥ इति तृतीय कथा ॥

* * *

स्तवारम्भसामर्थ्यं दृढयन्नाह - मत्वेत्यादि

हे विश्वविघ्नप्रमाथ ! नाथ ! पूर्वोक्तयुक्त्या स्तवकरणं दुष्करं सर्वपाप-

हरं चेति मत्वा-अवबुध्य मया भक्तिपरवशेन तनुधियाऽपि - स्वल्पमतिनाऽपि इदं-प्रत्यक्षं भण्यमानं तव संस्तवनं - भवतः स्तोत्रं कर्तुमिति शेषः, आरभ्यते - करणायोद्यम्यते । इदं च स्तवनं मत्कृतमपि तव प्रभावात् - भवतोऽनुभावात् सतां - सज्जनानां विदुषां चेतो हरिष्यति-मनो हरिष्यति, न तु दुर्जनानाम् । सन्त एवान्यगुणग्रहणे लम्पटाः । उक्तं च-

''मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ? ॥१॥'' - मालिनी

न तु खलाः । उक्तं च -

''सीसं धुणियं हिययं चमक्कियं पुलइयं च अंगेहिं।
तहवि हु खलस्स वाणी, परगुणगहणे न नीसरिआ ॥''

ननु निश्चये उदबिन्दुः - वारिच्छटा नलिनीदलेषु-कमलिनीपत्रेषु मुक्ताफलद्युतिं - मौक्तिकच्छायां उपैति-उपागच्छति। अत्र 'उदकस्योदः०' (पा. अ. ६, पा. ३, सू. ५७) इति निपातः । अत्र तव प्रभावात् सतां मनोहरं स्तवनमित्युक्ते स्तवस्याऽऽसमाप्तेः कर्तुः श्रोतुरध्येतुश्च श्रेयःसूचनं निर्विघ्नताकथनं च । यदुक्तं च-

''श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥१॥'' - अनु०

इति । यथा पद्मिनीपत्रस्थजलबिन्दुर्मुक्ताच्छायां धत्ते तथा तव प्रभावगुणाश्रयणात् स्तवोऽपि विद्वच्चित्तानन्दनं कर्ता । इति वृत्तगर्भार्थः ॥८॥

❊ ❊ ❊

अथसर्वज्ञनामग्रहणमेव विघ्नहरमाह - आस्तां तवेत्यादि

हे अष्टादशदोषनिर्नाशिन ! अस्तसमस्तदोषं-निर्मूलितनिखिलदूषणं तव

स्तवनं-गुणरहस्योत्कीर्तनं आस्तां-तिष्ठतु दूरे। स्तवमहिमा महीयान् वर्तते। त्वत्संकथाऽपि-त्वत्सम्बन्धी संल्लापोऽपि-त्वद्विषयिणी पूर्वभवसम्बद्धनामवार्ताऽपि जगतां-लोकानां दुरितानि-पापानि विघ्नानि वा हन्ति। उक्तं च (वन्दितासूत्रे, गा. ४६)-

''चिरसंचियपावपणा-सणीइ भवसयसहस्समहणीए ।

चउवीसजिणविणिग्गय-कहाइ वोलिंतु मे दिअहा ॥१॥'' - आर्या

औपम्ये यथा-सहस्रकिरणः-सूर्यो दूरे तिष्ठतु, प्रभैव-अरुणच्छायैव पद्माकरेषु-सरस्सु जलजानि-मुकुलरूपकमलानि विकाशभाञ्जि- स्मेराणि कुरुते। यदा सूर्योदयात् पूर्वप्रवर्तिनी प्रभातप्रभा पद्मविकाशिनी स्यात्, तदा सूर्यस्य किमुच्यते? तथा भगवद्गुणोत्कीर्तनं स्तवनमाहात्म्यं न कश्चिद् वक्तुमलम्। जिननामग्रहणसंकथैव सर्वदुरितनाशिनीतिवृत्तार्थः ॥९॥

अत्र मन्त्रो यथा -

ॐ ह्रीं जृं श्रीचक्रेश्वरी (रि?) मम रक्षां कुरु कुरु स्वाहा, सर्वरक्षाकरी भगवती केशववत्।

''निराकृत्य हरिं मार्गे, केशवो याति संस्तवात्।

पृष्ठे कृत्वा ततो देव्या, रसकूपाद् बहिः कृतः ॥१॥ - अनु०

भिल्लधाटीं तृषं क्षिप्त्वा, वने च जलयोगतः ।

दुरितानि क्षयं जग्मु-श्चकाराह्नि जिनालयम् ॥२॥'' - युग्मम्

वसन्तपुरे केशवो नाम निर्धनो वणिक् वसति स्म। सोऽन्यदा जैनगुरुदेशनामश्रौषीत् -

''धर्मो मङ्गलमुत्तमं नरसुरश्रीभुक्तिमुक्तिप्रदो

धर्मः पाति पितेव वत्सलतया मातेव पुष्णाति च ।

धर्मः सद्गुणसङ्ग्रहे गुरुरिव स्वामीव राज्यप्रदो

धर्मः स्निह्यति बन्धुवद् दिशति वा कल्पद्रुवद् वाञ्छितम् ॥१॥'' शार्दु०

किञ्च -

''कल्लाणकोडिजणणी, दुरंतदुरिआरिवग्गनिट्ठवणी ।

संसारजलहितरणी, इक्कुच्चिय होइ जीवदया ॥२॥'' - आर्या

इति श्रुत्वा हिंसाविरतिव्रतमग्रहीत्। भक्तामरस्तवमपाठीत्। केशवो धनं विना सर्वं जात्यादिकमनर्थं मेने । उक्तं च -

''यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।

स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥१॥''

- उपजातिः

अतो धनार्जनचिकिर्देशान्तरमसरत्। मार्गे गच्छन् सार्थाद् भ्रष्टः पञ्चवदनेन रुद्धः स्तवमस्मार्षीत्। सिंहोऽनश्यत्। ततः केनचित् कापालिना विप्रतार्य धनाशया रसकूपिकां प्रवेशितः। योगी तद्दत्तं रसभृतं तुम्बं जग्राह। केशवः सरज्जुरधो मुक्तः कथमपि कूपमेखलायां स्थितः स्तवं सस्मार। चक्रादेव्या पृष्ठे कृत्वा निष्कासितः। [१]निःस्वस्य रत्नाष्टकं वितीर्णम्। सार्थेन साकं व्रजन् कान्तारे समुत्थितां भिल्लधाटीं निर्घाटयामास स्तवस्मरणात्। एकाकिने निर्जले वने भ्रमते तृषितायाष्टमनवमवृत्तगुणनप्रान्ते देव्योदकं दत्तम्। एवं सर्वाणि कष्टानि हत्वा पुरं प्राप । उक्तं च -

''वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।

सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥१॥''

- उपजातिः

रत्नाष्टकेन श्रीर्जाता। चक्रेश्वरीपार्श्वाल्लोकचमत्कारकृते एकदिनेन जैनप्रासादं कारयामास। केशवश्चिरं सुखमभुनक्, धर्ममाराधयामास॥

॥ इति चतुर्थी कथा ॥४॥

* * *

१. निर्धनस्य ।

अथ जिनस्तुतिसेवाफलमाह - (ग्रं० ३००) - नात्यद्भुतमित्यादि

हे भुवनभूषणभूत ! भूतशब्द उपमावाची, हे विश्वमण्डनसमान ! नाथ ! - प्रभो ! - भूतैः - जातैः - विद्यमानैर्गुणैर्भुवि - पृथिव्यां भवन्तं -त्वामभिष्टुवन्तः - स्तुवन्तो जना भवतः - तव तुल्याः - समा भवन्ति एतन्नात्यद्भुतं - नातिचित्रम् । अत्र व्यतिरेकमाह - ननु - निश्चितं वा-अथवा तेन स्वामिना किं कार्यं - किं प्रयोजनम् ? इह - भवे जनमध्ये वा यः स्वामी आश्रितं - सेवकं भूत्या - ऋद्ध्या आत्मसमं-निजतुल्यं न करोति-न विधत्ते । अहमपि तीर्थंकरं स्तुवन् जिनध्यानैकतानमानसत्वेन तीर्थकृद्गोत्रार्जको भवितेति कवेराशयः ॥

अत्राम्नायः-

श्रीऋषभप्रभुः त्र्यशीतिपूर्वलक्षणानि गार्हस्थ्येऽस्थात्। पुत्रशतं देशशतराज्ये न्यधात्। विनीतापुरे ज्येष्ठसुतं भरतं न्ययुङ्क्त। विरक्तो भोगान्नाभुङ्क्त। याचकेभ्यः सांवत्सरिकदानं प्रादत्त। चतुर्भी राजन्यक्षत्रियसहस्रैः सत्रा व्रतमादत्त। शक्राभ्यर्थनया चातुर्मुष्टिकं लोचमकरोत्। कच्छमहाकच्छादयस्तथैवाकार्षुः। मौनी चावनीं विजहार। शुद्धभिक्षानभिज्ञो जनोऽशनं न वितितार। प्रभोः पुरः कनक-किरीट-कटक-कन्या-करिकिशोर-कम्बल-कौशेयादि दधुस्ते, तेष्वकल्प्यतया भगवान् न किमपि जग्राह। तूष्णीक एव प्रतिज्ञामुवाह। क्षुधिताः कच्छादयो विमृश्य स्वर्धुनीतीरे कन्दफलाशनास्त्रपाभरादकृतगृहगमना वर्धितासंस्कृतालकत्वाज्जटिलास्तापसा अभूवन्॥

इतश्च नमिविनमी राजपुत्रौ कार्यवशाद् दूरदेशं प्राप्तावायातौ, कच्छमहाकच्छयोर्निजपित्रोरमिलताम्, सर्वं वृत्तान्तमलभेताम्। तावापृच्छ्य भरतेऽवहीलनां धृत्वा श्रीमदादीशं स्वामिनं सेवायै समगंसाताम्। निशितनिस्त्रिंशधरौ यत्र स्वामी क्रमौ न्यवीविशत् ततो भुवः कण्टकाद्युदधरतां

दंशमशकादिकमरक्षताम्। प्रातः स्वामिपार्श्वभुवं प्रमार्ज्य नलिनीदलानीत-नीरेणाभ्यषिञ्चताम्। बकुलकमलपाटलादिकुसुमप्रकरं विस्तार्य चरणावभ्य-र्च्यास्मद्वाञ्छितदो भवेत्युक्त्वा नमोऽकार्ष्टाम्। उभयपार्श्वयोरसिधरौ तीर्थ-नाथमसेविषाताम्। एवं मध्यंदिने सन्ध्यायामपि वन्दित्वा कामितमयाच-ताम्। इत्थं जङ्गमं तीर्थं समाश्रयतोर्नमिविनम्योर्गतः कियान् कालः ॥

एकदा धरणेन्द्रश्चलितासनः स्वामिनं निनंसिषुरैत्। नमस्कृतो भावसारं भगवान् स्तुतश्च, तावपश्यत्। कौ युवां किमर्थं परमगुरुसेवायै लग्नावि-त्यपृच्छत्। तावूचतुः - भो महाशय ! कच्छमहाकच्छसुतौ नमिविनमी क्षत्रियावावाम्। राज्यार्थं नाथं सेवितुमारभावहि। पातालेन्द्रोऽवदत् - निरीहो निर्ममो मुक्तसर्वसङ्गो भगवान् किं वितरिष्यति? निर्धनात् का धनप्राप्तिः ? न च कस्मै रुष्यति न तुष्यति नीरागत्वादसौ। भरतं भजत। स सकाञ्चनस्तुष्टो राज्यांशं युवाभ्यां दास्यति। तौ स्माहतुः - शृणु भो ! स्वामी यादृक् त्वयोक्तस्तादृगस्तु। आवाभ्यां वाञ्छितायासावाश्रितः, सफलो भवतु मा भवतु वा, भरतं न सेवावहे। कल्पवृक्षं मुक्त्वा कः [१]कर्कन्धूं स्वीकुरुते? काञ्चनं त्यक्त्वा क [२]आरमादत्ते ? चिन्तामणिं हित्वा कः कर्करकं ग्रन्थौ बन्धाति? रत्नाकरं विहाय को लवणाकरं श्रयते? इति जानीहि। इहामुत्रावयोः स्वाम्ययमेव। फणीन्द्रस्तयोरद्वितीयां भक्तिं मत्वा श्रीऋषभरूपं विकृत्याष्टचत्वारिंशत् सहस्राणि मन्त्रानगदत्। रोहिणीप्रमुखाः साम्नाया देव्यः प्रत्यक्षीकृत्य दत्तास्तेन वैताढ्ये दक्षिणो-त्तरश्रेणौ पञ्चाशत्षष्टिपुरस्थापना कृता खेचरतामगातां तौ। धरणेन्द्रः सर्वां स्थितिं कृत्वा नागनिकायमगमत्। तत्सम्बन्धिनः स्वजनाः सर्वे विद्याधरतां प्रापुः। तौ विमानयानसमानश्रीप्रौढौ नव्यदिव्यविमानारूढौ भरतभूपाया-त्मानं दर्शयित्वा दक्षिणश्रेणौ रथनूपुरचक्रवालपुरे श्रीनमिः, उत्तरश्रेणौ

१. बदरीम्। २. पित्तलम्।

गगनवल्लभपुरे विनमिश्च राज्यमकुरुताम्। निरुपमभोगैर्बहुकालं निर्गमय्य विद्याधरेन्द्रपदं स्वपुत्राभ्यां दत्त्वा गृहीतव्रतौ कोटीद्वयेन मुनीनां सहितौ श्रीशत्रुञ्जये श्रीनाभेयजिनलब्धं सिद्धिपदं प्रापतुः । इत्याश्रितं स्वतुल्यं कुर्वते प्रभवः ॥ इति वृत्तार्थः ॥१०॥

* * *

अथ जिनदर्शनफलमाह - दृष्ट्वेत्यादि

हे प्रसन्नरूपस्वरूप ! अनिमेषेण-निर्निमेषेण विलोक्यते -दृश्यत इत्यनिमेषविलोकनीयस्तं भवन्तं -त्वां दृष्ट्वा - वीक्ष्य जनस्य द्रष्टुर्भव्यस्य चक्षुः - नेत्रं अन्यत्र-देवान्तरे न तोषं-चित्तानन्दमुपयाति-उपैति उमास्वाति-वाचकवत्। सोऽदृष्टपूर्वां जिनमूर्तिं दृष्ट्वा स्तुतिं पठितवान्-

"वपुरेव तवाचष्टे, भगवन् ! वीतरागताम् ।

न हि कोटरसंस्थेऽग्नौ, तरुर्भवति शाद्वलः ॥१॥" - अनु०

ततोऽन्यत्र - शिवादौ विरक्तो जिनधर्मदर्शनासक्तोऽभूदुमास्वातिर्द्विज-सूनुरात्तव्रतः सूरिपदमाप। क्रमात् पूर्वगतवेत्ता वाचकोऽभूत्॥ चक्षुरिति जातावेकवचनम्। ध्यानिनो भवन्मुद्रास्वरूपावबोधार्थं स्थिरीभूय निर्निमेष-दृशस्त्वां पश्यन्तोऽपरसुखेष्वरुचिं दधतीत्यर्थः। अत्रोपमा - कः पुरुषो दुग्धसिन्धोः - क्षीरसमुद्रस्य पयो-दुग्धं पीत्वा जलनिधेः - लवणाम्भोधेः क्षारं - कटुकं जलं रसितुं-स्वादितुं-पातुमिच्छेत् ? अपितु न कोऽपि। दुग्धसिन्धोः पयः किंभूतम्? शशिनः करस्तद्वद् द्युतिर्यस्येति शशिक-रद्युति - चन्द्रकरनिर्मलम्। तीर्थकृद्रूपदर्शनं क्षीरसागरपयः पानसमं, अपर-देवरूपदर्शनं क्षारसमुद्रोदकस्वादसमानमिति वृत्तभावार्थः ॥११॥

मन्त्रश्चायम् -

ॐ ह्रां अरहंताणं सिद्धाणं सूरीणं उवज्झायाणं साहूणं मम ऋद्धिं वृद्धिं समीहितं कुरु कुरु स्वाहा। शुचिना प्रातः सन्ध्यायां वार ३२

स्मरणात् सर्वसिद्धिः कपर्दिकवत् कामधेनोः कामिताप्तिः

''कपर्दी नन्दिनीं धेनु-मधोक् द्वात्रिंशतं दिनान् ।

तत्क्षीरं स्वर्णलक्षाणि, प्रान्ते भूपं न्यमन्त्रयत् ।।१।।'' - अनु०

श्रीअणहिल्लपत्तने चौलुक्यवंश्यकुमारपालदेवो राजा, भोपला नाम राज्ञी, वाग्भटो महामन्त्री। श्रीहेमचन्द्रसूरिगुरुदेशनाकर्णनात् राजा परमार्हतोऽजनि। इतश्च तत्र पुरि कपर्दी नाम दुर्गतो वणिगभूत् । स च भक्तामरस्तवं पपाठ वर्णमात्राशुद्धमेकमना [१]उपवैणवं गुणयति स्म। एकदा तस्यैकादशवृत्तं ध्यायतः श्रीयुगादीशयक्षिणी साक्षाद्भूता अर्थार्थिने वरमदात्-नन्दिनी कामगवीरूपेण सायं त्वन्मन्दिरे समेताऽस्म्यहम्। त्वया कोरकुम्भे दुग्धं सुवर्णं भवितेत्युवाच तथा चकार च। यावदेकत्रिंशद् घटाः स्वर्णपूर्णा जाता देवीमुत्कलापनाय समैत्। कपर्दी जजल्प-देवि ! भूरि भूरि दानेनानुगृहीतोऽहं भवत्या, परमेकदिनं धेनुरूपेणागन्तव्यं यथा तत्क्षीरं क्षैरेयीं कृत्वा राजादिकं भोजयामि। इति प्रतिपन्नं, तत् चक्रया कृतं च। द्वात्रिंशदहरन्ते सान्तःपुरपरीवारं नृपं न्यमन्त्रयत्। श्रीहेमाचार्याश्च पादावधारिताः(?)। अशनसामग्री न काऽपि। राजादीनामासनानि प्रदत्तानि। कपर्दी घटं परमान्नभृतमानैषीत्। यथारूचि परिवेषयामास। गुरुंश्च पूर्णं प्रत्यलाभयत् राजादयः सुरसं सुरभि सुधासममाकण्ठं परमान्नं बुभुजिरे यत् पूर्वं नाभुञ्जन्। नात्रुटत् भोजनान्ते एकत्रिंशद् हाटकघटा दर्शिताः। तेन विस्मितानां तेषां पुरः स्तवमहिमा प्रकाशितः स्वं स्वं स्वेच्छं भुङ्क्ष्वेति राज्ञोक्तम्। गुरुनृपवाग्भटादयोऽपि रञ्जिताः कपर्दिनं तुष्टुवुः। स भक्तामरस्तवप्रभावं वर्णयामास। चिरं विभवसुखसहितो जिनधर्मं प्रभावयामास ।।

।। इति पञ्चमी कथा ।।५।।

१. सवेणुवाद्यम् ।

अथ भगवद्रूपवर्णनमाह - यैः शान्तेत्यादि

हे त्रिभुवनैकललामभूत ! - हे त्रिलोकाग्र्यशिरोग्रवर्तिमाल्यतुल्य ! पुरो न्यस्तं पुष्पाभरणं ललाममुच्यते । यैः परमाणुभिः -दलिकैर्निर्माणकर्मणा त्वं निर्मापितः - कृतः । किंभूतैः? शान्ताः - प्रशमं गता रागस्य-अनुरागस्य रुचिः - कान्तिर्येभ्यस्ते तथा तैः । रागसहचरितत्वाद् द्वेषपरिग्रहः । अथ च (वा) शान्तनामा नवमो रसस्तस्य रागो - भावस्तस्य रुचिः - छाया येषु तैः । खलु - निश्चितं तेऽपि अणवः - परमाणवस्तावन्त एव - भगवद्रूपनिर्माणप्रमाणा एव वर्तन्ते । यद्-यस्मात् कारणात् पृथिव्यां - भूपीठे ते - तव समानं-तुल्यमपरम् अन्यद् रूपं नहि अस्ति-न विद्यते । जिनरूपज्ञानगुणा अनुत्तरसूरेष्वपि न प्राप्ता औपम्यार्थं कविभिः तीर्थकृद्रूपं चिकीर्षवोऽमरा अपि न शक्ताः।

उक्तं च (आवश्यक - निर्युक्त्यां गा० ५६९) -

''सव्वसुरा जइ रूवं, अंगुट्ठपमाणयं विउव्विज्झा ।
जिणपायंगुट्ठं पइ, न सोहए तं जहिंगालो ॥१॥''

अथ यैः परमाणुभिः तेऽप्यणव इति पौनरुक्त्यम्। तत्रेयं व्याख्या- औदारिकवर्गणायामभव्येभ्योऽनन्तगुणाणुनिष्पन्नाः स्कन्धा अनन्ताः सन्ति, तेषु स्कन्धेष्वणवः-स्तोका एव जिनरूपपरमाणवः । अणुशब्दः स्तोकवाची । अथवा महाकविप्रयुक्तत्वात् मन्त्राम्नायेन स्तुतिवशादन्यार्थापादनाद् वा न पौनरुक्त्यम् । उक्तं च-

''सज्झायज्झाणतवो - सहेसु उवएसथुइपयाणेसु ।
संतगुणकित्तणेसुं, न हुंति पुणरुत्तदोसाओ ॥१॥'' इति ॥

मन्त्रश्चात्र -

ॐ ह्रीं चउद्दसपुव्वीणं ॐ ह्रीं पयाणुसारीणं ॐ ह्रीं एगारसंगधारीणं ॐ ह्रीं उज्जुमईणं ॐ ह्रीं विउलमईणं नमः स्वाहा ॥ सारस्वती विद्या ॥ इति वृत्तार्थः ॥

महिमकथा यथा -

त्रयीरूपं विधायोच्चै-र्बहुरूपो व्यजृम्भत ।

जिनरूपं चिकीर्षुस्तु, देव्याऽऽहत्य विडम्बितः ॥१॥

अङ्गदेशे चम्पापुरि कर्णो राजा । जिनधर्मरक्तो भक्तामरस्तवजापसक्तो मन्त्री सुबुद्धिः । अन्यदा कश्चिच्चेटकी बहुरूपो भूपसदः समाससदत् । स चेटकबलेन शङ्ख-गदा-चक्र-शार्ङ्गशालिभुजं कृष्णवर्णं तार्क्ष्यपत्रं लक्ष्मीनाथं विष्णुमकार्षीत् । ततो धवलवृषवाहनं धवलवर्णं चन्द्रशेखरं गङ्गधरं जटामण्डितमौलिं सर्वाङ्गभुजङ्गाभरणं [१]भस्मलिप्तकरणं शिवाकान्तं शिवमदर्शयत् । तदनु राजहंसयानं चतुर्मुखं श्रुतिपवित्रवाचं सावित्रीसनाथं विरञ्चिं व्यरचयत् । अन्येऽपि (ग्रं०४००) स्कन्द-बुद्ध-गणपतिप्रभृतयः सुरा नृत्यन्तो दर्शितास्तेन । सर्वा पर्षद् विस्मयं गता । पुनरुवाच चेटकी-भो सुबुद्धे ! त्वद्देवं जिनं शिवपदादानयामीति भणित्वा यावत् तीर्थकृद्रूपं कर्तुं लग्नः, तावन्मन्त्रिप्रारब्धद्वादशवृत्तगुणनेनाविर्भूतचक्रेश्वर्या चपेटयाऽऽहत्य धरायां क्षिप्तः । तस्य नष्टा देवकला । कपटं प्रकटं जातं वह्नितापेन हीनरूप्यवत् । आह स्म देवी—रे रे मूर्खशेखर ! दुष्टाशय ! निरञ्जनं वागगोचरचरित्रमरूपं परालक्षस्वरूपं सर्वसुरोत्कृष्टं जिनरूपं चिकीर्षुः कथं प्राणिषि? । यदि जीविताशा तदा सुबुद्धिं दैवतमिव भजस्व। इति भणनानन्तरमेव महामात्यक्रमयोरपतच्चेटकी । तुष्टा भूपादयः। मन्त्री भक्तामरस्तवमहिमानमवर्णयद् धर्मं च ।

''विद्या विवादाय धनं मदाय प्रज्ञाप्रकर्षः परवञ्चनाय ।

अभ्युन्नतिर्लोकपराभवाय येषां प्रकाशस्तिमिराय तेषाम् ॥१॥''

- इन्द्रवज्रा

तथा -

१. गात्रम् ।

अत्र दृष्टान्तमाह-किमिव? अंधकारमिव। इव-यथा। अंधकारं क्षणात् क्षयं उपैति इत्यन्वयः।

'उपैति' इति क्रियापदम्। किं कर्तृ? 'अंधकारम्'। किं कर्मतापन्नम्? 'क्षयम्'। किंवि.? 'शार्वरं' रात्रिसम्भूतम्। पुनः किं.? 'आक्रान्तलोकं' व्याप्त-विश्वम्। पुनः किं? 'अलिनीलं' भ्रमरकृष्णम्। *"कालो नीलोऽसितः शितिः" (अभि. का. ६, श्लो. ३३) इति हेमसूरयः।* पुनः किंवि.? 'अशेषं' समस्तम्। पुनः किंवि.? 'सूर्यांशुभिन्नं' आदित्यकिरणविदीर्णम्। कथम्? 'आशु' शीघ्रम्॥

अथ समासा :- तव संस्तवः त्वत्संस्तवः *षष्ठीतत्पुरुषः। युष्मच्छब्दस्य 'त्वन्मदेकत्वे.' (सा. सू.३३०) इति त्वदादेशः।* भवानां सन्ततिः भवसन्ततिः, भवसन्तत्या संनिबद्धं भवसन्ततिसंनिबद्धम्। *उपैति इत्यत्र इणेधिवर्जनान्नोपसर्गाकारलोपः।* शरीरं भजन्तीति शरीरभाजस्तेषां *'भजां विण्' (सा. सू. १२३२) इति विण् प्रत्ययः।* आक्रान्तो लोको येन तत् आक्रान्तलोकम्। अलिवन्नीलं अलिनीलं, *मध्यलोपी समासः।* न विद्यते शेषो यत्र तत् अशेषम्। सूर्यस्य अंशवः सूर्यांशवः, सूर्यांशुभिर्भिन्नं सूर्यांशुभिन्नम्। शर्वर्यां सम्भूतं शार्वरं *'तत्र कृतलब्धक्रीतसंभूते' (अ. ६, पा.३, सू. ९४) इति सिद्धहेमसूत्रादण्,* शर्वर्यां भवं शार्वरमिति *कौशल्याम्; 'वर्षाकालेभ्यः' (सिद्ध. अ. ६, पा. ३, सू. ८०) इति हैमसूत्रेण, तथा 'कालाट्ठञ्' (अ. ४, पा. ३, सू. ११) इति पाणिनीयसूत्रेण कथमिह ठञ् प्रत्ययो नेति न चिन्त्यं, अर्थविशेषत्वात्, 'नैशो मार्गः सवितुरुदये सूच्यते कामिनीना' मिती व शारदं पार्वणः शर्वरीसार इत्यादि महाकविप्रयोगाच्च, सिद्धान्तकौमुद्यां तु- 'शार्वरस्य तमसो निषिद्धये' इति कालिदासः, 'अनुदितौषसराग' इति भारविः, समानकालीनं प्राक्कालीनं इत्यादि च, 'अपभ्रंशा एवैते' इति प्रामाणिकाः इत्युक्तं,* शर्वर्या इदं शार्वरमिति कश्चित्। अन्धं करोतीत्यन्धकारः, *पुंनपुंसकः। यथा सूर्योदिते तिमिरक्षयस्तथा त्वत्संस्तवनात् पापक्षयः, न च अत्रापसिद्धान्तः, अर्हद्वर्णसंज्वलनस्य भावस्तवत्वेन भगवत्याद्यागमेऽपि महाफलत्वेन उक्तत्वात्, 'पूजाकोटिसमं स्तोत्रं' इति लोकेऽपि सिद्धत्वाच्चेति, तद् विचिन्त्य यथाशक्त्याऽत्र प्रवर्तनीयमेवेत्याशयः॥ इति सप्तमकाव्यार्थः॥७॥*

''धम्मम्मि नत्थि माया, न य कवडं नाणुवत्तिभणियं वा ।

फुडपागडमकुडिल्लं, धम्मवयणमुज्जुयं जाण ।।२।।''- आर्या

किञ्च -

'' हिंसामङ्गिषु मा कृथा वद गिरं सत्यामपापावहां

स्तेयं वर्जय सर्वथा परवधूसङ्गं विमुञ्चादरात् ।

कुर्विच्छापरिमाणमिष्टविभवे क्रोधादिदोषांस्त्यज

प्रीतिं जैनमते विधेहि च परां धर्मे यदीच्छाऽस्ति ते ।।३।।''- शार्दूल०

इत्याकर्ण्य बहुरूपो जिनधर्ममादृतवान्। चक्रेश्वरी तिरोऽभूत्। सर्वे परमदैवतमन्त्रमिव स्तोत्रं पेठुः । सुबुद्धिः सद्बुद्धिः सकलसंसारसुखभाजनं सर्वलोकमान्योऽभूत् ।।१२।।

।। इति षष्ठी कथा ।।६।।

※ ※ ※

अथ मुखवर्णनमाह - वक्त्रमित्यादि

अत्र क्वशब्दौ महदन्तरं सूचयतः। हे सौम्यवदन ! क्व ते-तव वक्त्रं-सकलमङ्गलमुखं मुखं वर्तते ? क्व निशाकरस्य-चन्द्रस्य बिम्बं-मण्डलं विद्यते? यत् त्वन्मुखस्येन्दोः साम्यमुच्यते तत्र महदन्तरालं पश्यामः। किंभूतं वक्त्रम्? सुरनरोरगाणां नेत्राणि हर्तुं शीलमस्येति विग्रहः। उरगा-भवनवासिनः। निःशेषेण-सामस्त्येन निःशेषाणि (वा) कमलदर्पणचन्द्रादीनि सर्वाणि निर्जितानि-तर्जितानि जगत्त्रितयस्योपमानानि येन। तच्च चन्द्रबिम्बं किंभूतम्? 'कलङ्कमलिनं' मृगशशगुरुशापलाञ्छनकश्मलम्। यत् चन्द्रबिम्बं वासरे-दिने पाण्डुपलाशकल्पं-जीर्णपक्वपाण्डुरवर्णसवर्णं भवति। मुखस्य तेनोपमा कथं घटते?। इति वृत्तार्थः ।।१३।।

मन्त्राश्चात्र -

ॐ ह्रीं पूर्वं आमोसहिलद्धीणं विप्पोसहिल० खेलोसहिल०

जल्लोसहिल० सव्वोसहिल० नमः स्वाहा । रोगापहारिणीविद्या॥

❊ ❊ ❊

अथ च गुणव्याप्तिमाह - सम्पूर्णेत्यादि

हे त्रिजगदीश्वर !-त्रिजगन्नाथ ! तव गुणाः-क्षमावैराग्यादयस्त्रिभुवनं लङ्घयन्ति-अतिक्रामन्ति, त्रिलोकीमाक्रम्य तिष्ठन्तीत्यर्थः। किंभूताः? सम्पूर्णमण्डलः-आश्विनपूर्णिमासम्बन्धी शशाङ्कः- चन्द्रस्तस्य कलाकलापः-करनिकरस्तद्वच्छुभ्रा-धवलाः । विश्वव्यापे हेतुं दर्शयन्ति। ये गुणा एकं-नरान्तरपरिहारेण अद्वितीयं नाथं संश्रिताः-अशिश्रियन् । कः पुरुषो यथेष्टं-स्वेच्छया सञ्चरतः-परिभ्रमतः तान् गुणान् निवारयति-निषेधयति? अपितु न कश्चन। त्रिजगदपि भवद्गुणग्रहणपरायणं दृश्यते। तथाच समर्थे प्रभौ सति सेवाश्रितानां सर्वत्र प्रचारो युक्त एव। अथ त्रिजगदीश्वरनाथं सम्पूर्णपदं त्रिजगदीश्वराणां सुरेन्द्रनरेन्द्रचमरेन्द्रादीनां नाथं परमपदप्राप्तौ योगक्षेमकारित्वात्। इति वृत्तार्थः ॥१४॥

अथ मन्त्रः -

ॐ ह्रीं आसीविसलद्धीणं ॐ ह्रीं खीरासवलद्धीणं ॐ ह्रीं महुयासवलद्धीणं ॐ ह्रीं अमिआसवलद्धीणं नमः स्वाहा। विषापहारिणी विद्या ॥ अथवा ॐ ह्रीं श्रीं क्लीं असिआउसा चुलु चुलु कुलु कुलु मुलु मुलु इच्छियं मे कुरु कुरु स्वाहा ॥ त्रिभुवनस्वामिनी विद्या सर्वसमीहितदा ॥

महिमकथा -

सत्यकस्य कनी डाही, भृगुकच्छेऽथ सुव्रतम् ।
उपोषिता स्रजं दिव्यां, लब्ध्वा जिनमपूजयत् ॥१॥ - अनु०

श्रीअणहिल्लवाटके पत्तने सत्यकः श्रेष्ठी। तस्य गुरवः श्रीहेमचन्द्राचार्याः। सत्यकस्य सकलकलाभिर्यथार्थनामधेया डाहीति कन्याऽभूत्। अष्टवार्षिकी सा पञ्चासरश्रीपार्श्वनाथं गुरुंश्च नमस्कृत्याऽभुङ्क्त। शुचिर्भ-

क्तामरस्तवं त्रिसन्ध्यं ध्यायति स्म। श्रेष्ठिना कन्या भृगुकच्छे दत्ता। क्रमेणोद्वाहो जातः। जन्ययात्रा भृगुपुरं प्रत्यच (व) लत्। सर्वे भद्रका देवाधिदेवप्रतिमां नानिन्युः समम्, जिनवन्दनां विना डाही नाभुङ्क्त। चिन्तापरा ऊचुः श्वशुरादयः - वत्से ! [१]प्साहि, दुःखं कर्तुं न युक्तम्, (यतः) कन्याः शालिसधर्माणोऽन्यत्र जायन्तेऽन्यत्र वर्धन्ते । सा मौनमालम्ब्यास्थात् ।

उक्तं च -

''कलाकलापसम्पन्ना, जल्पन्ति समये परम्।

घनागमविपर्यासे, केकायन्ते न केकिनः ।।१।।'' - अनु०

भक्तामरस्तवं गुणयति स्म । एषा पितृगृहविरहव्यथामुद्वहतीति खिन्नाः सर्वे निरशनाः, पन्थानं यातां यामिनी जाता। स्थिता जन्ययात्रा। त्रयोदशचतुर्दशवृत्ते गुणयन्त्यास्तस्याश्चक्रेश्वरी पुरः प्रादुर्भूता [२]भौतीसमये, उवाच च भद्रे ! प्साहि, तव किं न्यूनम् ? अहमादिदेवसेवापरा चक्रा। डाही जगाद-मद्व्रतं पूरयेति। ततो देवी चन्द्ररोचिःशुचितरं विषघ्नं हारमदाद् दिव्यामम्लानां कुसुममालां गुरुणां पादुके च। एषा स्रक् मुनिसुव्रतकण्ठे स्थाप्या, नित्यं रत्नमालेव स्थाता। तस्मिन्नर्चिते वन्दिते श्रीपार्श्वोऽर्चितो वन्दित एव । जिनास्तुल्यगुणास्तुल्यफलदाः सर्वे । पादुकयोर्नतयोर्हेमाचार्यो नत एव । हारः स्वकण्ठाभरणीकरणीयः । विभाते मदर्पितहारमध्यमणिमध्यात् प्रादुर्भूतं प्रभूतमहिमानं श्रीपार्श्वबिम्बं सर्वसमक्षं नत्वा भोक्तव्यं चेत्युक्त्वा चक्राऽदृश्याऽभूत्। प्रातः सर्वं श्वशुरादीनां मार्गेऽऽची (च) कथत् अदीदृशच्च अवसरज्ञा सा । उक्तं च -

''यत्र स्ववचनोत्कर्षो, भाषन्ते तत्र साधवः ।

कलकण्ठः सदा मौनी, वसन्ते वदति स्फुटम् ।।१।।'' - अनु०

१. भोजनं कुरु । २. रात्रिसमये ।

पारणं कृतम्। तुष्टाः सर्वे विस्मिताश्च। क्रमाद् भृगुपुरं प्राप्ताः। तया [१]श्रीसुव्रतकण्ठे स्रगारोपिता। माला तादृगेवातिष्ठत्। गुरुपादुके नित्यं ननाम। हारादनेकशो विषापहारः कृतः। सत्यककन्यायाः सर्वं सत्यं प्रभावं दृष्ट्वा श्वशुरपक्षो दृढधर्मो जातः। स्तवमहिमा प्रकाशितस्तया। चिरं सुखभोगभागभूत् डाही सुश्राविका ।।

।। इति सप्तमी कथा ।।७।।

* * *

अथ भगवन्नीरागतामाह - चित्रं किमत्रेत्यादि

हे सकलविकारनिकारपर ! यदि त्रिदशाङ्गनाभिः- नरस्त्रीभ्योऽधिकरूपलावण्यशृङ्गारादिभिरधिकमोहनचेष्टाभिर्देवीभिस्ते मनः-अन्तःकरणं मनागपि-अल्पमात्रमपि विकारमार्गं-कामोत्कोचपथं न नीतं-न प्रापितं अत्र-अस्मिन्नर्थे किं चित्रं-किमाश्चर्यम्?। यतोऽन्यैरप्युक्तम्-

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जिनो विमुक्तललनासङ्गो न यस्मात् परः ।
दुर्वारस्मरघस्मरोरगविषव्यासङ्गमूढो जनः
शेषः कामविडम्बितो न विषयान् भोक्तुं न मोक्तुं क्षमः ।।१।।''

- शार्दुल०

अत्र दृष्टान्तः-कदाचित्-कस्मिंश्चित् क्षणे चलिताचलेन-कम्पितान्यपर्वतेन कल्पान्तकालमरुता-प्रलयसमयपवनेन मन्दराद्रिशिखरं- मेरुशृङ्गं किं चलितं--स्वस्थानात् किं धूतम् ? यतो युगान्ते सर्वपर्वतानां क्षोभो भवति, न सुमेरोः। तथा देवीभिरिन्द्र-चन्द्रगोपेन्द्र-रुद्रादयः क्षोभिताः, न जिनेन्द्रः। इति वृत्तार्थः ।।१५।।

मन्त्रो यथा -

चउवीस तीर्थंकरतणी आण। पञ्चपरमेष्ठितणी आण। चउवीस

---

१. मुनिसुव्रतगले ।

तीर्थंकरतणइ तेजि पञ्चपरमेष्ठितणइ तेजि। ॐ अर्हं उत्पत्तये स्वाहा। शुचिश्चतुर्दिक्षु कायोत्सर्गेऽष्टोत्तरशतजापे कृते स्वप्ने शुभाशुभं लभते। धनधान्यऋद्धिमहामहिमप्रभृतयः स्मरणाद् भवन्ति। ॐ ह्रीँ पूर्वं जिणाणं ओहिजिणाणं परमोहिजिणाणं अणंतोहिजिणाणं सामन्नकेवलीणं भवत्थ-केवलीणं अभवत्थकेवलीणं नमः स्वाहा। बन्धमोक्षिणी विद्या।

प्रभावे कथा -

अचेष्टं नृपतिं गाढं, योगिनीदोषतो मुनिः

मन्त्र्यानीतो मल्लनामा, सज्जनं नीरुजं व्यधात् ॥१॥ - अनु०

श्रीअयोध्यायां पुरि यथार्थनामा सज्जनो राजा। अन्यदा राज्ञो दुष्टयोगिनीदोषो लग्नः। सर्वाङ्गव्यथयाऽचेष्टनोऽजनि नृपः। मन्त्रिसामन्तादिभिर्बहवो रुक्प्रतिक्रियाः कारिताः, (परन्तु) प्रतीकारः कोऽपि न जातः। ततो मन्त्रिणस्तत्रस्थं श्रीगुणसेनसूरिं व्यजिज्ञपन्-राजानं सज्जीकुरुध्वमिति। गुरुभिरुक्तम्-द्रक्ष्यामः किमपि। निशि भक्तामरस्तवमन्त्रं ध्यायतां तेषां पञ्चदशवृत्तगुणनक्षणे कयाचिद् देव्या मल्लर्षिपदोदकाभिषेकः सज्जनस्य सज्जताहेतुरुक्तः। प्रातर्मन्त्रिपुरो गुरव ऊचुः-गूर्जरदेशान्निशि नित्यकायोत्सर्गस्थासुं दुर्गोपसर्गजिष्णुं महामहिमानं मल्लनामानं मुनीन्द्रमानाययध्वं यथा राजदोषो याति। इति श्रुत्वा चेलुः प्रधानानि (?)। तत्र गत्वांऽह्री नत्वाऽत्यर्थमभ्यर्थ्य चक्रादिदेवताव्रातसेवितः समानीतो मल्लर्षिः। चरणोदकेन राजा गतदोषोऽभूत्। समन्तान्मुनिमाहात्म्यमुदलसत्। उक्तं च -

"न व्योमयानं न हिरण्यसिद्धि- र्न पादनीरेण गदोपशान्तिः।

न काऽपि लब्धिर्न च काऽपि सिद्धिः कोऽयं विशेषो व्रतिनां तपस्सु? ॥१॥"

- उपजातिः

मल्लमुनिर्धर्ममुपादिशत्

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।

तथैव धर्मो विदुषा परीक्ष्यते श्रुतेन शीलेन तपोदयागुणैः ॥१॥" - उपेन्द्रवज्रा

सर्वथा जीवरक्षा कार्येति जैनानां मुष्टिः ।

''दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता ।

अहिंसायाः फलं सर्वं, किमन्यत् कामदेव सा ॥१॥''

इत्याकर्ण्य जीवदयाधर्मं प्रपन्नः सज्जनः परमजैनोऽजनि राजा। सर्वेऽपि मन्त्रिणोऽर्हद्धर्मपरा अभूवन्॥१५॥

॥ इत्यष्टमी कथा ॥ ८॥

* * *

अथ भगवतो दीपेनोपमानिरासमाह - निर्धूमेत्यादि

हे त्रिभुवनभवनैकदीप ! त्वं अपरः-अपूर्वो दीपः- कज्जलध्वजोऽसि- वर्तसे। यतो दीपो धूमवान् सवर्तिस्तैलेनोद्द्योतको गृहमात्रप्रकाशो वातेन विध्याता चैकस्थानस्थः स्यात्। त्वमपूर्वदीपः। किंभूतः ? नितरां गते निर्गते धूमवर्ती यस्मादसौ निर्धूमवर्तिः। धूमो द्वेषः, वर्तिः कामदशा- श्चेति। अपवर्जितः- त्यक्तस्तैलपूरो येन स तैलपूरः-स्नेहप्रकारः। अन्यच्च त्वं कृत्स्नं- सम्पूर्णं पञ्चास्तिकायात्मकं जगत्त्रयं-विश्वत्रयमिदं- प्रत्यक्षगतं प्रकटीकरोषि-केवलोद्द्योतेन प्रकाशयसि। (ग्रं. ५००) अन्यत् त्वं जातु-कदाचित् चलिताचलानां-धुतगिरीणां मरुतां-वातानां न गम्यो-न वशः। अथवा परीषहोपसर्गेषु चलिताचलानां-कम्पितपृथ्वीकानां मरुतां- देवानां न गम्यो-नाकलनीयः। जगत्प्रकाशो-जगद्विश्रुतः। अथवा जगच्च- रिष्णुः-सर्वत्र प्रसारी प्रकाशो-ज्ञानालोको यस्य सः, अत एवापरः-अन्यो दीपस्त्वम्। इति वृत्तार्थः ॥१६॥

अत्र मन्त्र :- ॐ ह्रीं पूर्वकं बीयबुद्धीणं कुट्ठबुद्धीणं सम्भिन्नसोआणं अक्खीणमहाणसीणं सव्वलद्धीणं नमः स्वाहा। श्रीसम्पादिनी विद्याऽत्र वृत्ते ज्ञेया॥

* * *

अथ सूर्येणौपम्यनिरासायाह - नास्तमित्यादि

हे मुनीन्द्र !-मुमुक्षुप्रभो ! लोके-भुवने त्वं सूर्यातिशायिमहिमा असि-वर्तसे। सूर्यादतिशायी-सविशेषः-अपूर्वो महिमा-माहात्म्यं यस्य सः। यतो रविरस्तं प्रयाति राहुणा परिभूयते लक्षमात्रं विश्वं प्रकाशयति मेघच्छन्नो निस्तेजाश्च स्यात्। त्वं तु अपूर्वः पूषा कदाचिद् रजन्यादौ नास्तमुपयासि-क्षयं न गच्छसि, केवली नक्तंदिवं-सदाऽऽलोकः, न राहुगम्यः-न सैंहिकेयग्रसनीयः। अथ राहुशब्देन कृष्णवर्णत्वाद् दुष्कृतं न तद्व्याप्तः। सहसा-झटिति-शीघ्रं युगपत्-समकालं जगन्ति-भुवनानि स्पष्टीकरोषि-प्रकटयसि। ननु केवलिनः प्रथम(?) समये सामान्योपयोग-लक्षणं दर्शनं द्वितीय(?) समये विशेषोपयोगरूपं ज्ञानं, तत् कथं युगपद्ग्रहणम्?। उच्यते-द्विसमययोरतिसूक्ष्मत्वात् निरन्तरप्रभवत्वात् केवलि-गम्यत्वाद् युगपद्ग्रहणं न्याय्यमिति। अथ "जुगवं दो नत्थि उवओगा"। तत्र भगवत एकस्मिन् समये दर्शनमन्यस्मिन् ज्ञानं, तत् कथम्? सत्यम्। तद् द्वयं वचनक्षणे एकीभावोपगतमिति युगपद्ग्रहणम्। न अम्भोधरोद-रेण-घनगर्भेण निरुद्धः-छन्नो महाप्रभावो-गुरुप्रतापो यस्य सः। अत्रा-म्भोधरशब्देन मतिश्रुतावधिमनःपर्ययकेवलानामावरणानि गृह्यन्ते। पञ्चभि-रेतैरावरणैर्न तिरोहितज्ञानोद्द्योतः, अत एव सहस्रकिरणादधिकमाहा-त्म्योऽसि ॥ इति वृत्तार्थः ॥

अत्र मन्त्रः - ॐ ह्रीं उग्र (गग?) तवचरणचारीणं ॐ ह्रीं दित्ततवाणं ॐ ह्रीं तत्ततवाणं ॐ ह्रीं पडिमापडिवन्नाणं नमः स्वाहा ॥ परविद्योच्छेदिनी विद्या ॥

कथा यथा -

चक्रा बहुदेवीयुग्, नरके गुरुभूपजौ ।
नीत्वा तौ पुनरानीय, कृतो धर्मोद्यतः सुतः ॥१॥

सङ्गरपुरे निर्जितानेकानेकपसङ्गरो[१] निःस्वताधीनदीनजनधनसङ्गरः[२] सत्यसङ्गरः[३] सङ्गरो राजा परमार्हतः। तस्य गुरवो धर्मदेवाचार्याः। अन्यदा राज्ञो गृहे पुत्रजन्म। स नाम्ना क्रियया च केलिप्रियः यौवनस्थः सकलाः कला जग्राह। धर्मं नाकरोत्। व्यसनी भक्ष्याभक्ष्यपेयापेयगम्यागम्यसममतिः। राजा पुत्रं प्रबोधयतेति गुरुनगदत्। गुरवः केलिप्रियमुपादिक्षन्-भोकुमार !

"ब्रह्महत्या सुरापानं, स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहु-रेभिश्च सह सङ्गमः ॥१॥ - अनुष्टुप्
यदि सत्सङ्गनिरतो, भविष्यसि भविष्यसि ।
तदा सज्जनगोष्ठीषु, पतिष्यसि पतिष्यसि ॥२॥ - अनुष्टुप्
यः प्राप्य दुष्प्रापमिदं नरत्वं धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबन्धेन स लब्धमब्धौ चिन्तामणिं पातयति प्रमादात् ॥३॥"-इन्द्रवज्रा

आगमे (स्थानाङ्गे ४,४) अपि -

महारम्भयाए महापरिग्गहयाए कुणिमाहारेणं पंचंदियवहेणं जीवा निरयाउअं कम्मं पगरंति ॥ (छाया - महारम्भेन महापरिग्रहेण मांसाहारेण पञ्चेन्द्रियवधेन जीवा नरकायुष्कं कर्म प्रकुर्वन्ति ॥)

इत्यादिष्टोऽप्यभाषिष्ट स निकृष्टः-नास्ति धर्मः तत्साधकजीवाभावात्, घनाघनाभावे गिरिसरित्पूराभाववत्। पञ्चमहद्(हा)भूतोत्पन्नां चेतनां मुक्त्वाऽन्यः कोऽपि देहे नास्त्यात्मा। तदभावान्नरकाद्यभावः, ग्रामाभावे सीमाभाववत्। वाचाटश्चार्वाकोऽयं पठितग्रन्थो दुर्बोध इत्यचिन्ति गुरुभिः।

" विद्ययैव मदो येषां, कार्पण्यं विभवेष्वहो।
तेषां दैवाभिभूतानां, सलिलादग्निरुत्थितः ॥१॥"

ऊचुस्ते पुनस्तम् -

१. सङ्ग्रामः । २. धनदः । ३. प्रतिज्ञः ।

''धर्माद् धनं सुखं भोगा, आरोग्यं राज्यसम्पदः ।

अधर्माद् दुःस्थता दुःखं, दास्यदुःकीर्तयो रुजः ।।१।।''

इत्यादि धर्मवाक्यवार्यभिन्नमध्यं मुद्गशैलवत् तं मत्वा [1]जोषमवकलयन् श्रीधर्मदेवसूरयः ।

उक्तं च -

''वचस्तत्र प्रयोक्तव्यं, यत्रोक्तं लभते फलम् ।

स्थायीभवति चात्यन्तं, रागः शुक्लपटे यथा ।।१।।''

पुनरेकदा क्षणदायां राजपुत्रप्रबोधोपायं चिन्तयन्तो गुरवः स्तवषोडशसप्तदशवृत्ताम्नायगुणनक्षणे नरकदर्शनात् केलिप्रियप्रबोधो भावीति चक्रयोक्ताः सूरयोऽवदन्—तथा कुरु यथाऽस्मद्युतो नरकं पश्यति राजसूः । ततो बहुदेवीसहितया तया गुरुराजपुत्रौ नीतावधोमेदिनीम् । तत्र वक्तुमशक्या बहुविधाः शीतातपादिवेदनाः क्षेत्रजसहजा दृष्टाः। छेदन - भेदन - ताडन - त्रपुपानाऽग्निपुत्तलिकालिङ्गनाऽङ्गव्यथनादीनि कृच्छ्राणि पूर्वभवपातकं स्मारंस्मारं कुर्वतां परमाधार्मिकाणां पुरः पटुबटुशतानि वितन्वन्तस्तथापि चौरा इव कदर्थ्यमाना नैरयिकाश्च। ततो भीतो नृपसुतः पातकफलदर्शनात् प्रापितः कम्पमानः स्वपुरं गुरुयुतोः देव्या। गुरुभिर्भणितश्च—भद्र ! दृष्टं पापफलं न वा?। केलिप्रियेणोक्तम्-भगवन् ! बाढं दृष्टम् । कौरकुम्भवद् भिन्नं नृपसूनुहृदयं धर्मतत्त्वाम्भसा, गुरुणां पदमूले सम्यक्त्वमूलश्रावकव्रतान्यङ्गीचकार । पापेभ्योऽबिभ्यदतिदुष्टव्याघ्रदर्शनादज इव चिरं धर्मं पालयामास राज्यसुखं चेति ।

।। इति नवमी कथा ।।९।।

❊ ❊ ❊

अथ विशेषादिन्दूपमां निरस्यन्नाह - नित्योदयमित्यादि

हे देववृन्दवन्द्य ! तव मुखाब्जं—वदनकमलं अपूर्वं शशाङ्कबिम्बं-

१. तूष्णीम् ।

नवेन्दुमण्डलं विभ्राजते-भाति। किंभूतम् ? नित्योदयं-शाश्वतशोभोल्लासम्। चन्द्रबिम्बं तु प्रातरस्तमेति। दलितं-ध्वस्तं मोहः-अज्ञानं-मोहनीयं कर्मैव महान्धकारं येन तत्। त्वन्मुखं मोहमहातमो हन्ति। चन्द्रबिम्बं त्वल्पान्धतमसनिरासे न क्षमम्। राहुवदनस्य न गम्यं-राहुसमदुर्वादिवादस्यागोचरः। वारिदानां च न गम्यं-मेघसमदुष्टाष्टकर्मणां न वशं, तानि जिनमुखेक्षणात् क्षयं यान्ति। चन्द्रबिम्बं राहोर्मेघानां च गम्यं स्यात्। पुनः किंभूतम् ? अनल्पकान्ति-गुरुतरद्युति। चन्द्रबिम्बं चाल्पप्रभं, कृष्णपक्षे क्षीणतेजस्त्वात्। मुखं जगद् विश्वं विद्योतयत्-प्रकाशयत्। शशिबिम्बं भूखण्डप्रकाशेऽप्यसमर्थम् । अथ नित्यं-सदा उत्-उल्लसत् अयः-शुभं भाग्यं यस्य तन्नित्योदयं, सदोल्लसच्छुभभागधेयमित्यर्थः। अतश्चन्द्रमण्डलादत्यद्भुतं भवन्मुखम् ॥ इति वृत्तार्थः ॥१८॥

अत्र मन्त्रः -

ॐ ह्रीं जङ्घाचरणाणं ॐ ह्रीं विज्झाचरणाणं ॐ ह्रीं वेउव्वियइढिपत्ताणं ॐ ह्रीं आगासगामीणं नमः स्वाहा ॥ दोषनिर्नाशिनी विद्या ॥

प्रभावे कथा -

आम्बडो मन्त्रिराड् ध्यायन्, लेभे चन्द्राश्मनिर्मितम्।
बिम्बं विषहरं नाग-वल्लीपत्राणि चान्वहम् ॥१॥

श्रीअणहिल्लपुरे श्रीश्रीमालकुलतिलकः श्रीउदयनपुत्रः श्रीआम्बडः श्रीकुमारपालदेवेन राज्ञा लाटदेशाधिपतिः कृतः। स भक्तामरस्तवं जपति स्माहर्निशम्। एकदा भृगुकच्छात् पल्लीवनं सिषाधयिषुर्निरसरत्। महान्धकारे गिरिकान्तारे निशि स्तवस्याष्टा- दशं वृत्तं स्मरंश्चक्रयोक्तः-वत्स ! शुचितया स्तवस्मरणैकतानतया चाहं तुष्टाऽस्मि। विषघ्नं विघ्नहरं चन्द्रकान्तमयं चान्द्रप्रभं बिम्बं गृहाण, वरं च वृणीष्वेति। आम्बड़ो दण्डेशो निःस्पृहोऽपि सदाऽभीष्टनागवल्लीदलानि याचितवान्। नम-

અર્થ : દેહધારીઓના ભવ પરંપરાથી ગાઢ બંધાયેલા પાપ તમારા સ્તવન વડે ક્ષણવારમાં ક્ષય પામે છે. જેમ વિશ્વવ્યાપ્ત, ભમરા જેવો કાળો, રાત્રિસંબંધી સંપૂર્ણ અંધકાર સૂર્યના પ્રકાશથી ભેદાયેલો તત્કાળ ક્ષયને પામે છે.

❊ ❊ ❊

अथ पापक्षयार्थिनां स्वत एवास्योपादेयता भविष्यतीत्याह -

मत्वेति नाथ ! तव संस्तवनं मयेद-
मारभ्यते तनुधियाऽपि तव प्रभावात्।
चेतो हरिष्यति सतां नलिनीदलेषु
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ।। ८ ।।

दण्डान्वयः - इति मत्वा हे नाथ ! तनुधिया अपि मया इदम् तव संस्तवनम् आरभ्यते, तव प्रभावात् सताम् चेतः हरिष्यति, ननु उदबिन्दुः नलिनीदलेषु मुक्ताफलद्युतिम् उपैति।

हे नाथ ! मया इदं-वक्ष्यमाणं त्वत्संस्तवनं आरभ्यते-प्रारम्भक्रियाविषयीक्रियते इत्यन्वयः। कर्मणि उक्तिः।

'आरभ्यते' इति क्रियापदम्। केन कर्त्रा? 'मया'। किं कर्मतापन्नम्? 'संस्तवनं' स्तोत्रम्। किंविशिष्टं संस्तवनम्? 'इदं' बुद्धिस्थम्। किंविशिष्टेन मया? 'तनुधिया' स्वल्पबुद्ध्या। किं कृत्वा? 'इति मत्वा' एवं ज्ञात्वा।

इतीति घण्टालालान्यायेन इदमिति पदस्य उभयत्र सम्बन्धात् इदं संस्तवनं सतां चेतो हरिष्यति-आक्षेप्स्यति वशं नेष्यतीतियावत् इत्यन्वयः।

'हरिष्यति' इति क्रियापदम्। किं कर्तृ? 'संस्तवनम्'। किं कर्मतापन्नम्? 'चेतः', केषाम्? 'सताम्'। कस्मात्? 'प्रभावात्'। कस्य? 'तव'।

ननु-निश्चितम् उदबिन्दुः मुक्ताफलद्युतिं उपैति इत्यन्वयः।

'उपैति' इति क्रियापदम्। कः कर्ता? 'उदबिन्दुः' जलकणः। कां

स्कृता देवी प्रतिश्रुत्यान्तर्दधे। बिम्बमपूजयन्नित्यं पल्लीवनमसाधयत् । क्रमेण राजादेशाद् राजपितामहं मल्लिकार्जुनं नृपं छलेन हत्वा शृङ्गार-कोटिशाटिका १ गरलहरसिप्रा २ श्वेतो हस्ती ३ पात्राणामष्टशतं ४ द्वात्रिंशन्मूटका मौक्तिकानां ५ घटीशतमितः कनककलशः ६ अग्निधौ-तोत्तरपटः ७ मल्लिकार्जुनशिरः ८ चेत्यष्टौ वस्तूनि श्रीकुमारपालभूपा-लायाढौकयत्। शूरो वीरो राजपितामहबिरुदभाग् विषदोषमुक्तोऽभूत्। जननीपादौ नमोऽकरोत् । माता नाऽरज्यत। पृष्टे कारणे सोवाच-किं भृगुकच्छे सकुनिकादिविहारोद्धारं कृत्वा समेतोऽसि येनाहं तुष्यामि?, राजहत्ययोत्सेकवान् भवान्। स कृतनिश्चयः श्रीहेमचन्द्रसूरिसान्निध्यादु-द्धारं चकार। प्रतिष्ठाक्षणे तस्य दानोत्कर्षं दृष्ट्वा गृहिस्तुतिविमुखश्रीहेम-सूरिभिर्वर्णना चक्रे -

''किं [1]कृतेन न यत्र त्वं, यत्र त्वं किमसौ कलिः ।
कलौ चेद् भवतो जन्म, कलिरस्तु कृतेन किम् ॥१॥''

माता नितान्तमरज्यत। दुर्लभताम्बूलिकेऽपि देशे ताम्बूलं बुभुजे। सर्वदा सर्वदो भोगभागी जातः श्रीआम्बाडदण्डाधिपतिः।

॥ इति दशमी कथा ॥१०॥

* * *

किञ्च - किं शर्वरेत्यादि

हे नाथ! शर्वरीषु-रजनीषु शशिना-चन्द्रेण किम्?। अह्नि-दिवसे विवस्वता-सूर्येण वा किं कार्यं भवति ? तमस्सु-अन्धकारेषु युष्मन्मुखेन्दु-दलितेषु-भवद्वदनचन्द्रविनाशितेषु सत्सु। अथ (वा) तमस्सु-पातकेषु। अत्र दृष्टान्तः-जीवलोके-भूपीठे निष्पन्नशालिवनशालिनि सति जलभार-नम्रैः-सलिलभरनतैर्जलधरैः-घनैः कियत् कार्यं स्यात्?। न किमपी-

१. सत्ययुगेन ।

त्यर्थः। निष्पन्नैः-पाकं प्राप्तैः शालिवनैः-कलमादिकेदारैः शालते-शोभत इत्येवंशीलः तस्मिन् निष्पन्नशालिवनशालिनि। यथा तृणवल्लीधान्यादिषूत्पन्नेषु मेघाः केवलक्लेशकर्दमशीतहेतुत्वात् निष्फला एव, तथा त्वन्मुखेन्दौ ध्वस्तदुरिततिमिरे शैत्यसन्तापपीडाकारित्वाच्चन्द्रसूर्याभ्यां न कोऽप्यर्थः सिद्धः। यत आगमेऽपि चोक्तम् -

''चंदाइच्चगहाणं, पहा पयासेइ परिमियं खित्तं ।

केवलियं पुण नाणं, लोयालोयं पयासेइ ॥१॥'' - आर्या

इति वृत्तार्थः ॥१९॥

अत्र मन्त्रः - ॐ ह्रीं पूर्वं मणपज्जवनाणीणं सीयलेसाणं तेउलेसाणं आसीविसभावणाणं दिट्ठीविसभावणाणं चारणभावणाणं महासुमिणभावणाणं तेयग्गिनिसग्गाणं नमः स्वाहा। अशिवोपशमनी विद्या ॥

कथा यथा -

रामचन्द्रोपदेशेन, लक्ष्मणः संस्मरन् स्तवम् ।

निशायां शशिनं पश्यं-स्तुष्टाऽभूच्चक्रवाहिनी ॥१॥ - अनु०

श्रीविशालायां विशालायां पुरि लक्ष्मणो नाम वणिगासीत्। स श्रीरामचन्द्रसूरिगुरुमुखाद् भक्तामरस्तवं साम्नायमपाठीत्, अजपच्च। शुचेरेकचित्तस्य दिनान्तस्त्रिःपरिवर्तयतस्तस्याग्रे एकोनविंशवृत्तजापावसरे निशि चक्राऽऽविरभूत्। चन्द्रमण्डलं ददर्श। तुष्टा देवी प्राह स्म-यत्र महान्धकारे स्तवं स्मर्ताऽसि तत्र त्वं चन्द्रं द्रक्ष्यसि। वाञ्छिताप्तिर्भवित्रीत्युक्त्वा तिरोहिता चक्रेश्वरी (ग्रं. ६००) ॥

एकदा मालवेशो राजा महीधरनामा सीमालजयनाय गतः कान्तारं प्रविष्टः। तत्र प्रदेशे महान्धकारं दृष्ट्वा सैन्यस्य यामिनीगमने दुरवस्थां विचिन्त्य प्रभावनाचिकीः सहागतो लक्ष्मणो भूपं न्यगदत्-देव ! सम्पूर्णं चन्द्रं दर्शयामि, दिनसमां यामिनीं कारयामि सैनिकानाम्। राज्ञोक्तम् -

कुरु, दत्स्व जलं मह्यं, तव वाञ्छितमहं दातेति श्रुत्वा स्तवं स्मृत्वा प्रकटितश्चन्द्रः। प्रातर्गतमचिन्तितं वैरिराजपुरं बलम्। बद्धो रिपुः राज्ञा पुरमात्मसात्कृतम्। लक्ष्मणः सकललक्ष्मीपतीकृतश्च। स स्तवमहिमानमवादीत्। गुरुपार्श्वे लक्ष्मणो राजानं धर्ममश्रावयत्-

"जैनो धर्मः प्रकटविभवः सङ्गतिः साधुलोके
विद्वद्गोष्ठी वचनपटुता कौशलं सत्कलासु।
साध्वी लक्ष्मीश्चरणकमलोपासना सद्गुरूणां
शुद्धं शीलं मतिरमलिना प्राप्यते नाल्पपुण्यैः ॥१॥" – मन्दाक्रान्ता

देवगुरुधर्मरूपं रत्नत्रयं श्रुत्वा जिनधर्मभागभूत् महीधरमहीशः। लक्ष्मणो लक्ष्मीवान् सर्वार्चनीयोऽभूत्। उक्तं च -

"महिमानं महीयांसं, सङ्गः सूते महात्मनाम्।
मन्दाकिनीमृदो वन्द्या-स्त्रिवेदीवेदिनामपि ॥१॥" - अनु०

॥ इत्येकादशी कथा ॥११॥

❊ ❊ ❊

अथ ज्ञानद्वारेणान्यदेवान् क्षिपति - ज्ञानं यथेत्यादि

हे लोकालोकप्रकाशज्ञान ! यथा - येन प्रकारेण कृतावकाशं-अनन्तपर्यायात्मकवस्तुनि विहितप्रकाशं ज्ञानं सम्यक् त्वयि विभाति, तथा-तेन प्रकारेण हरिहरादिषु-विष्णु-रुद्र-ब्रह्म-स्कन्द-बुद्धादिषु नायकेषु-स्वस्वमतपतिषु एवंविधं ज्ञानं न वर्तते। एवमवधारणे वा। अवधारितं त्वयि ज्ञानम्, तेष्वज्ञानमेव। ते ह्यात्मानं कयाचिद् भयदर्शनभङ्ग्या नायकत्वेन ख्यापयन्तोऽपि विभङ्गज्ञानिन एव। तेषां ज्ञानं वेदादौ व्यभिचरति यथा- "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्ति" (बृहदारण्यके २।४।६) इति पञ्चमहद्भूतेभ्योऽन्यो न कोऽपि। तत्रैव-

"असूर्या नाम ते लोको, अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति, ये के चात्महनो जनाः ॥१॥" - अनु०

अत्र ऋचि परलोकगत्या भूतेभ्यो जीवः पृथगुक्तः । " शृगालो वै स जायेत यः सपुरीषो दह्यते" इति कृतकर्मभोक्तृत्वाभाव इति।

"यद् यावद् यादृशं येन, कृतं कर्म शुभाशुभम् ।

तत् तावत् तादृशं तस्य, फलमीशः प्रयच्छति ॥१॥" - अनु०

इति कर्मफलभुक्तिः । क्वापि एक एवायमात्माऽन्यः सर्वो मिथ्या प्रपञ्चः । उक्तं च -

" एक एव हि भूतात्मा, भूते भूते व्यवस्थितः ।

एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥१॥" - अनु०

देहे देहे जीवपार्थक्येऽपि एकजीवत्वं उन्मत्तवाक्यवद् यदृच्छाप्रलापः। "न हिंस्यात् सर्वभूतानि" इति कृपास्थापना। "पुत्रकामः पशुमालभेत अजैर्यष्टव्यम्" इति दयायां व्यभिचारः। अतो हरिहरादिज्ञानमज्ञानं पूर्वापरविसंवादि, भवज्ज्ञानं (तु) सहजमेकं सकलमव्यभिचारि इति स्थितम्। उपमामाह - स्फुरन्मणिषु-भास्वद्वज्र-वैडूर्य-पुष्परागेन्द्रनीलादिरत्नेषु तेजः - प्रभा यद्वन्महत्त्वं - गौरवं याति-प्राप्नोति तु-पुनः एवं-तद्वत् किरणाकुलेऽपि - चाकचिक्ययुतेऽपि काचशकले - क्षारखण्डे तेजो न महत्त्वं गच्छतीत्यर्थः। अत्रोपमाया वचनव्यभिचारालङ्कारः । अथ (त्र) " तेजो यथा व्रजति जात्यमणौ महत्त्वं, नैवं तु काचशकलेषु रुचाकुलेषु" इति वा पाठः । वचनभेदो न भवति । इति वृत्तार्थः ॥२०॥

अथ मन्त्र सूरिमन्त्र एव षट्सु वृत्तेषु वक्ष्यमाणेष्विति ॥

प्रभावे कथा यथा -

त्रिलोचनाङ्गजोत्पत्त्या - दिकं विजयसूरिभिः ।

प्रोक्तं राजपुरः पृष्टै-र्यन्नोचे ब्राह्मणादिभिः ॥१॥ - अनु०

श्री'नागपुरे'नगरे श्रीमहीपतिनरेन्द्रः । राजपूज्यः पुरोधाः सोमदेवः। तत्र पुरे श्रीविजयसेनसूरयो विहारयोगेनागताः । ते निशि भक्तामरस्तव-विंशवृत्तस्मरणात् तुष्ट्या साक्षाद्भूतया चक्रया सर्वप्रश्नविदः कृताः ॥

अन्यदा महीपतेर्देवी प्रसूतिसमयोन्मुखी बभूव । ततो राजा पुरोधः प्रभृतिद्विजान् श्वः परश्वो वा मद्गृहे किं भवितेति ज्ञानमपृच्छत्। ते सम्यगविदन्तो मौनमाश्रिताः। ततः श्रीविजयसेनसूरय आकार्य वन्दित्वा पृष्टाः। सूरयो राजद्विजसमाजसमक्षमवोचन्महाराज ! श्रृणु-भवतां पट्टदेवी नेत्रत्रययुतं सुतं प्रसविष्यति कल्ये । द्वादशेऽह्नि पट्टहस्ती मरिष्यति । पुत्रस्य विकृतविलोचनं विले (ल) क्ष्यते। अतः तृतीयाक्षिभवोत्पातो यास्यति। शुभं भविष्यति इत्युदित्वोपाश्रयं ययुः। सोल्लुण्ठाः सूत्र-कण्ठाः सूरिमुपहसन्तो राज्ञा निषिद्धाः। द्वितीये दिने पुत्रजन्मक्रमात् सर्वमभूत् । त्रयोदशदिने गुरुनाहूय सिंहासनमारोपयत् श्रीमहीपतिः । द्विजा मषीमलिनास्याः पातालं प्रविविक्षव इवाधोमुखाः सूरीन् प्रणेमुः । गुरवोऽवदन्नाशीर्वादम् -

''आधारो यस्त्रिलोक्या जलधिजलधरार्केन्दवो यन्नियोज्या
भुज्यन्ते यत्प्रसादादसुरसुरनराधीश्वरैः सम्पदस्ताः ।
आदेश्या यस्य चिन्तामणिसुरसुरभीकल्पवृक्षादयस्ते
श्रीमान् जैनेन्द्रधर्मः किसलयतु स वः शाश्वतीं शर्मलक्ष्मीम् ॥१॥''- स्रग् ०

इति । नित्यसुखदं जैनधर्मं श्रुत्वा नरेन्द्रः श्रावकोऽभूत् । जैनप्रासादान् महीपतिरचीकरत्, महती प्रभावना प्रसृतेति । अन्यैरपि पेठे सर्वशुभकृति-नवः स्तवः ॥

॥ इति द्वादशी कथा ॥१२॥

* * *

अथ निन्दास्तुतिमिश्रमाह - मन्ये वरमित्यादि

हे सर्वोत्कृष्ट ! देवोत्तम ! प्रभावनाथ ! हरिहरादय एव दृष्टा - विलोकिता वरं-प्रधानमित्यहं मन्ये। येषु सुरेषु दृष्टेषु हृदयं-चित्तं त्वयि-भवद्विषये तोषं - प्रमोदमेति - आयाति। यतस्तैर्हि तव मुद्राऽपि नाभ्यस्ता, ज्ञानं दूरे । उक्तं च -

"वपुश्च पर्यङ्कशयं श्लथं च दृशौ च नासानियते स्थिरे च ।
न शिक्षितेयं परतीर्थनाथै - र्जिनेन्द्र ! मुद्राऽपि तवान्यदास्ताम् ॥१॥"

- उपजातिः

- (अयोगव्यवच्छेदद्वात्रिंशिकायां श्लो० २०)

अतोऽपरसुरदर्शनादेव त्वयि भक्तिस्तैलाशनादाज्ये यथा प्राज्यादर इति। अथ भवता वीक्षितेन-दृष्टेन किं कार्यं येनार्हद्वीक्षणलक्षणेन हेतुनाऽन्यः-त्वदपरः कश्चिद् देवो भवान्तरेऽपि-अन्यजन्मन्यपि भुवि-लोके मनो न हरति-मानसं न गृह्णाति। यतः सर्वगुणो भवांस्तथाविधभव्यानां चित्तहरणं कुरुते। अन्ये सुरा रागद्वेषविसंस्थुलाङ्गत्वात् ज्ञानविकलत्वाच्च न मनोहरणं प्रति कारणम् । उक्तं च-

" सर्वे सर्वात्मनाऽन्येषु, दोषास्त्वयि पुनर्गुणाः ।
स्तुतिस्तवेयं चेन्मिथ्या, तत्प्रमाणं सभासदः ॥१॥" - अनु०

अन्यभवे चित्ततोषः श्रेयांसादेरिव । तद् यथा -

"साधिकवर्षं चतसृषु, दिक्षु बहल्यादिमण्डलानि विभुः।
व्यहरन्मुक्ताहारो मुनिभिक्षामूर्खमनुजवशात् ॥१॥
अवनिं पावं पावं, निरशनपानो जिनेश्वरो वृषभः ।
निजचरणक्रमणेना-शनाय गजपुरमगादग्लानः ॥२॥
श्रीबाहुबलितनूजः, सोमयशाः सद्यशा नृपस्तत्र ।
रूपनिधिर्वृषभांसः, श्रेयांसस्तत्कुमारवरः ॥३॥
स्वप्ने च निशाशेषे, कज्जलकालः सुमेरुगिरिराजः ।
मयका सुधाभिषिक्तः, स्वरुचिं प्रापेति सोऽपश्यत् ॥४॥
परितो वैरिक्रान्तो, वीरः श्रेयांसविहितसाहाय्यः ।
रणभुवि विजयी जातः, स्वप्नं सोमप्रभोऽपश्यत् ॥५॥
रविमण्डलतः पतितं, करजालं गलिततेजसस्तस्य ।
श्रेयांसेन तु घटितं, स्वप्नं श्रेष्ठी ददर्शेति ॥६॥
प्रातः पर्षदि मिलिताः, स्वप्नार्थं किमपि भाव्यजानन्तः ।
ऊचे नृपतिः कश्चित्, श्रेयांसस्योदयो नूनम् ॥७॥

निजनिजसौधं जग्मु:, श्रेयांसश्रेष्ठिमन्त्रिसामन्ता: ।
युवराजो जनतानां, कलकलमश्रृणोद् गवाक्षस्थ: ।।८।।
आसन्ननरमपृच्छत्, कोलाहलकारणं ततो युवराट् ।
सोऽचीकथच्च मत्वा, नि:शेषं वृषभवृत्तान्तम् ।।९।।
रजतस्वर्णाभरण-प्रवालमुक्ताफलाश्वयानादि ।
प्रपितामहस्तवायं, कौशलिको नैव गृह्णाति ।।१०।।
तेनायं नगरजन:, कलकलशब्दं करोति भक्तिपर: ।
स्वामिन्नस्मिन् भक्ते, कुरु प्रसादं वदन्नेवम् ।।११।।
तच्छ्रुत्वा श्रेयांसो, निरुपानत्कस्त्वरान्वितोऽभ्यगमत् ।
तां जिनमूर्तिं दृष्ट्वा, जातस्मृतिमाप गतपाप: ।।१२।।
पूर्वविदेहे पुण्डरि-किण्यां पुरि वज्रसेनजिनसूनु: ।
चक्र्यजनि वज्रनाभ:, सुयशास्तत्सारथि: प्रथित: ।।१३।।
सह बाहुसुबाहुभ्यां, पीठमहापीठसहजसुयशोभि: ।
चक्रधर: पूर्वधरो, व्रती समर्ज्याथ चार्हन्त्यम् ।।१४।।
सर्वार्थदिवो भरते, गतसुकृते नाभिभूरभूदर्हन् ।
सूयशा यतिर्गृहीता-नुत्तरवासो भवं सोऽहम् ।।१५।।
तत्रेयं तीर्थकरस्य, वज्रसेनस्य वीक्षिता मुद्रा ।
भूपीठेऽनन्यसमा, ऋजुजडजीवैरविज्ञेया ।।१६।।
कल्प्यमकल्प्यं सैषण-मनेषणीयं न विदन्ते यदमी ।
मुनिपतये तत् शुद्धं, कल्याणीभक्तयो ददति ।।१७।।
अत्रान्तरे च कश्चिन्-नव्येक्षुरसेन सम्भृतान् कुम्भान् ।
युवराजपुरोऽढौकय-दिक्षुवंशा यद् विभोर्वंश्या: ।।१८।।
भगवन् ! प्रसारय करौ, निस्तारय मां गृहाण योग्यममुम् ।
इत्युक्तेऽञ्जलिमृषभो-ऽकृत सोऽपि ददौ घटेक्षुरसम् ।।१९।।
अच्छिद्रपाणिरर्हन्, नापतदवनौ तथेक्षुरसबिन्दु: ।
याति शिखा यदि शशिनं, तीर्थकृतोऽतिशयतो न पतेत् ।।२०।।
दिवि दुन्दुभयो नेदु-र्जुघुषुरहो दानमर्जुनं ववृषु: ।
रत्नकुसुमादि मुमुचु-र्जहृषुर्ननृतुश्च देवगणा: ।।२१।।

अन्तर्हिताशनविधौ, भगवति गतवति कृतं पदस्थाने ।
तेनादिकृते मण्डल-मन्यैश्च रवेः क्रमात् प्रथितम् ।।२२।।
स्वप्नत्रयं पुरोदित-मभूच्च सत्यं जिनेन्द्रपारणकात् ।
सोमप्रभोऽथ हृष्टः, स्वसुतं दृष्ट्वा सुराभिनुतम् ।।२३।।
आगतकच्छादीनां, मिलितजनस्याग्रतश्च जिनवृत्तम् ।
आहारविधिमचीकथ-दात्मचरित्रं च युवराजः ।।२४।।
ईशाने ललिताङ्गः, स्वयंप्रभा प्राणवल्लभा प्रथमम् ।
राजाऽथ वज्रजङ्घः, श्रीमत्या कान्तया श्रीमान् ।।२५।।
अथ युगलिनौ च देवौ, जीवानन्दश्च केशवो मित्रम् ।
अच्युतसुरौ च राजेन्द्र-वज्रनाभश्च सूतश्च ।।२६।।
सर्वार्थसिद्धि (द्ध) देवौ, मरुदेवीनाभिनन्दनो विदितः ।
प्रथमजिनोऽजनि चाहं, श्रेयांसः सुयशसो जीवः ।।२७।।
अष्टभवप्रतिबद्ध-स्नेहोऽहं नवमके ततो नाथम् ।
दृष्ट्वा जातिस्मृत्या, ज्ञातेयं तीर्थकृन्मुद्रा ।।२८।।
प्रासुकजलसिद्धान्नं, निर्बीजफलं सशुष्कमूलदलम् ।
योग्यं देयमृषिभ्य-स्तेऽगुः स्वाश्रयमिति श्रुत्वा ।।२९।।
पात्रं श्रीऋषभजिनः श्रेयांसः श्रेयसाऽन्वितो दाता ।
वित्तं शुद्धेक्षुरसो, न विद्यते भूतलेऽन्यत्र ।।३०।।
श्रमणोपासकभावे, श्रेयांसः प्रथम एव भुवि विदितः ।
मुक्तः क्रमेण राज्यं, प्रपाल्य पूर्वाणि भूयांसि ।।३१।।
इति येऽन्यभवालोकात्, पुनरपि ददृशुर्जिनं गुणावासम् ।
तोषं भेजुस्ते पर-देवैर्दष्टैरपि प्रथमम् ।।३२।।

।। इति वृत्तगर्भार्थः ।।२१।।

अथ महिमकथा -

श्रीजीवदेवसूरीन्द्रा, विहृता देवपत्तने ।
पौराणां दर्शिता यैस्तु, शिवब्रह्माच्युतादयः ।।१।।

पुरा श्रीवायडमहास्थाने परकायप्रवेशविद्याविदः श्रीजीवदेवसूरयः

स्तवैकविंशं वृत्तं साम्नायं क्षपायां जपन्तोऽप्रतिचक्रया सर्वदेवप्रकटनशक्तयः कृताः। ते श्रीगूर्जरात्रतः (?) सुराष्ट्रासु देवपत्तनं जग्मिवांसः (ग्रं०७००)। तत्र श्रीसोमनाथमहिमा महीयान्। तद्भक्तो जनो यात्रिका अहमहमिकया नमन्ति शिवम्। श्रावकाः कङ्कटुकप्रायाः केचन। ते गुरुसंमुखं गताः। प्रभुभिर्धर्मनिर्वाहप्रश्नः कृतः। ते ऊचुः - अत्र मिथ्यादृग्मतस्यैकच्छत्रता, कथं धर्मनिर्वाहः?। श्रीजीवदेवसूरयः श्रावकैः साकं सोमनाथप्रासादमासदन्। हृष्टास्तद्भक्ताः। अहो श्वेताम्बरा अपि शिवनमनायाजग्मुः। सूरिभिश्चक्रां चेतसि कृत्वा सोमेश! आगच्छेत्युक्तम्। प्रक्रटः शिवोऽचालीत्। अग्रे ब्रह्मविष्णू प्रासादाच्चलितौ। सूर्य-गणेशास्कन्दादयश्चलिताः। सकलप्रकटितसुरैर्विस्मितैः पौरैः शिवार्चकैश्च सह चन्द्रप्रभप्रासादे जिनेशो नतः, सोमेशादष्टमजिनार्चनाय करो याचितः। तेनाङ्गीकृतः। विसृष्टाः स्वस्थानगमनाय हरादयोऽन्तर्दधुः। आचार्या उपाश्रयं जग्मुः। महती शासनोन्नतिर्जाता। लिङ्गभरटकाः चन्द्रप्रभस्य करदीभूताः जिनं महादेवममन्यन्त। दृष्टप्रत्ययः को मुह्यति ? अमूदृशोऽल्पीयांसो भुवि। उक्तं च -

" **परोलक्षेषु देवेषु, ख्यातिरेकस्य कस्यचित्।**

द्रुमेष्वेकैव सा जम्बू-र्जम्बूद्वीपो यदाख्यया ॥१॥" - अनु०

इति। पूजा पुष्पसहस्रदशकं मासे पञ्चसेरमिता श्रीखण्डिका नित्यं तैलसेरत्रयं नैवेद्ये माणकद्वयं केसरकुङ्कुमपलद्वयं कर्पूरस्य माषकमेकं कस्तूरिकायाश्च करं दत्ते सोमेशोऽष्टमजिनस्येति।

॥ इति त्रयोदशी कथा ॥१३॥

* * *

किञ्च - स्त्रीणामित्यादि

हे चतुर्दशस्वप्नसूचितचतुर्दशभुवनाधिपत्य! स्त्रीणां-नारीणां शतानि

बहुवचनत्वात् कोटीकोट्यः शतशः - कोटिकोटिसंख्यान् पुत्रान् जनयन्ति-प्रसुवते। तासु मध्येऽन्या-अपरा जननी-माता त्वदुपमं-भवत्समं सुतं-नन्दनं न प्रसूता - नाजीजनत्। त्वां पुत्रं मरुदेव्येव प्रासूत। अत्रोपमा-सर्वा दिशः - अष्टौ काष्ठाः भानि-नक्षत्राणि तारकाणि दधति - धारयन्ति, (परन्तु) प्राच्येव - पूर्वैव दिक् स्फुरदंशुजालं - चञ्चत्करकलापं सहस्ररश्मिं - सूर्यं जनयति-प्रसूते । यथा ऐन्द्री दिक् सूर्योदये हेतुः, तथा तीर्थकृज्जन्मनि मरुदेव्यादय एव हेतुः । इति वृत्तार्थः ॥२२॥

प्रभावे कथा -

श्रीआर्यखपुटाचार्यै - र्यक्षो वृद्धकराभिधः ।
स्कन्ध-रुद्र - गणेशाद्यैः, सहितो दर्शितो नतः ॥१॥ - अनु०

श्री 'गुडशस्त्र' पत्तने भुवनमुनिना वृद्धकरनामा बौद्धाचार्यो वादे जितः। स पराभवान् मृत्वा यक्षीभूय सङ्घमुपद्रोतुं लग्नः । सङ्घेन स्तवद्वाविंशवृत्ताम्नायजपनप्राप्तदुष्टयक्षदलनोपायाः सोत्साहा वृद्धवयसो विद्यासिद्धाः श्रीआर्यखपुटाचार्या विज्ञप्य 'गुडशस्त्र' पत्तनमानीताः । प्रभवो यक्षायतनं गत्वा यक्षकर्णयोर्जीर्णपादुके निवेश्योरसि स्वांह्री कृत्वा वस्त्रेणाङ्गमावृत्य सुषुपुः। यक्षार्चकः समेत्योवाच- रे दुर्विनीत ! शीघ्रमुत्तिष्ठ, मरिष्यसेऽन्यथा। ते कपटनिद्रया स्थिताः। राजादयो यक्षं नन्तुं प्रातरागताः। राजाज्ञया राजपुरुषास्तं हन्तुं लग्नाः। कशाघाता अन्तःपुरे लेगुः। पूत्कारका नरा आयाताः। एतस्य सिद्धस्य प्रभावोऽसौ इति मत्वा घाता निर्वर्तिता राज्ञा। स सूरिपदौ गृहीत्वा स्थितः। उत्थिता गुरवः। यक्षः स्वस्थानाद् गुरुचरणमूलमागत्यापतत्। गुरुभिर्निर्भत्स्य सङ्घस्य रक्षकीकृतः। प्रभवो यक्षयुताः पुरं प्रति चेलुः। अन्येऽपि शिव-विनायकाद्या यक्षगृहाच्चेलुः। द्वे महद्दृषन्मये कुण्डिके चालिते। सर्वे पुरद्वारात् स्वस्थानं प्रति विसृष्टाः । प्रभून् नत्वा गतवन्तश्च । कुण्डिके तत्र स्थापिते

कर्मतापन्नाम्? 'मुक्ताफलद्युतिं' मौक्तिककान्तिम्। केषु? 'नलिनीदलेषु' कमलिनीपत्रेषु। आधारप्रभावादेतादृशं वस्त्वपि परमशोभां प्राप्नोति। यदुक्तं—

'संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वातौ सागरशुक्तिसम्पुटगतं तज्जायते मौक्तिकं
प्रायेणाधममध्यमौत्तमगुणः संवासतो जायते ॥१॥' -- शार्दुल०

अथ समासा :- मननं पूर्वं मत्वा *'मन ज्ञाने' धातुः क्त्वा प्रत्ययः 'लोपस्त्वनुदात्ततनाम्' (सा. सू. ८८६) इति नलोपः, 'ह्रस्वस्य पिति कृति तुक्' (सा. सू. १२४६)।* संस्तूयते अनेनेति संस्तवनम्। तनुर्धीर्यस्य स तनुधीस्तेन तनुधिया। नलिन्या दलानि नलिनीदलानि तेषु। *आधारे सप्तमी। बहुवचनं तु अत्यन्तशोभासम्भारव्यञ्जकम्।* मुक्ता एव फलं मुक्ताफलं, तस्य द्युतिः मुक्ताफलद्युतिस्ताम्। उदकस्य बिन्दुः उदबिन्दुः, *'सहादेः सादिः' (सा. सू. ५०६) इति तेन उद इत्यादेशः। 'बिन्दौ पृषत्पृषतविप्रुषः' (अभि. का. ४, श्लो. १५५) इति हेमसूरयः॥ इति अष्टमकाव्यार्थः ॥८॥*

અર્થ : એ પ્રમાણે માનીને હે નાથ ! અલ્પબુદ્ધિવાળા મારા વડે આ આપની સ્તવના શરૂ કરાય છે. આપના પ્રભાવથી સજ્જનોના ચિત્તને આકર્ષી લેશે. કેમકે પાણીનું બિંદુ કમળના પાંદડા પર મોતી જેવી શોભાને પામે છે.

❊ ❊ ❊

अथ संस्तवनस्य अतिशयालुमाहात्म्यमाह -

आस्तां तव स्तवनमस्तसमस्तदोषं
त्वत्संकथाऽपि जगतां दुरितानि हन्ति।
दूरे सहस्त्रकिरणः कुरुते प्रभैव
पद्माकरेषु जलजानि विकासभाञ्जि ॥ ९ ॥

दण्डान्वयः- **अस्तसमस्तदोषं तव स्तवनं दूरे आस्ताम् त्वत्संकथा**

तथैव तिष्ठतोऽद्यापि न कोऽपि चालयितुं क्षमः । तादृशां गुणान् कः संख्यातुं वेत्ति ? । उक्तं च -

" गुणान् गुणवतां वेत्तुं, विरलाः प्रभविष्णवः ।

वेत्ति रत्नपरीक्षायां, लवमेकं न वल्लवः ॥१॥" - अनु०

यक्षमहिमा चास्तं गमितः । उक्तं च -

" दत्ते विपत्तिमासत्तिः, प्रभोरत्युग्रतेजसः ।

ग्रहमस्तमितं प्राहु-र्गतं मार्तण्डमण्डले ॥१॥" - अनु०

इति स्तूयमाना राजकारितप्रवेशमहामहाः पौषधागारं प्राप्ता धर्ममुपादिशन् -

" भक्तिः श्रीवीतरागे भगवति करुणा प्राणिवर्गे समग्रे

दीनादिभ्यः प्रदानं श्रवणमनुदिनं श्रद्ध्या सुश्रुतीनाम् ।

पापापोहे समीहा भवभयमसमं मुक्तिमार्गानुरागः

सङ्गे निःसङ्गचित्तैर्विषयविमुखता हर्म्यिणामेष धर्मः ॥१॥" - स्रग्धरा

इत्याकर्ण्य प्रबुद्धा बुद्धभक्ता नृपादयोऽर्हद्धर्मे निश्चला आसन् ॥

॥ इति चतुर्दशी कथा ॥१४॥

❊ ❊ ❊

परमपुंस्त्वेन स्तुतिमाह - त्वामेत्यादि

हे मुनीन्द्र ! मुनयो - ज्ञानिनः त्वां परमं पुमांसं - परमं पुरुषम् आमनन्ति भणन्ति-अवबुध्यन्ते । वेदेऽपि - 'पुरुष एवेदं ग्नि सर्वं यद् भूतं यच्च भाव्यम्, उतामृत त्वस्येशानो यदन्नेनातिरोहति' इति महिमवर्णनम् । परमपुंस्त्वं बाह्यान्तरपुंसोरपेक्षया । बाह्यः पुमान् कायः । आन्तरः पुमान् सकर्मा जीवः । परमः पुमान् निष्कर्मा सोऽनन्तचतुष्कः सिद्ध उच्यते । किंभूतम् ? 'अमलं' रागद्वेषमलरहितम् । आदित्यस्येव वर्णः- कान्तिर्यस्य तमादित्यवर्णम् । तमसो दुरितस्य परस्तात् - परतो

वर्तमानम् । पुराऽर्हतो रविसाम्यं क्षिप्तम्, साम्प्रतं किमित्युक्तं? भण्यते, तेजोन्शमात्रलब्धिसाम्यात्। परमार्थतो नभोभ्रमरयोरिव समुद्रबिन्द्वोरिव मन्दराण्वोरिव महदन्तरालं परमपुरुषालोकसूर्यालोकयोरिति। भानुरपि तमसोऽन्धकारस्य परतस्तिष्ठति। अन्यच्च मुनयः सम्यग्-अन्तः- करणशुद्ध्या त्वामेव, एवशब्दो निश्चये, उपलभ्य - प्राप्य-मत्वा मृत्युम् अत्यन्तं भयंकरं मरणं जयन्ति-स्फोटयन्ति च। अत्र ॐ जूं सः मृत्युंजयाय नमः इति मृत्युंजयरक्षा । अन्यच्च शिवपदस्य - मोक्षस्थानस्य अन्यः - त्वत्तोऽपरः शिवः-प्रशस्तो निरुपद्रवो वा पन्था-मार्गो नास्ति । मुक्तिकारणं त्वमेव अतः श्रयणीयः । इति वृत्तभावार्थः ॥२३॥

महत्त्वे कथा -

चण्डिका चालिता गल्ले, कृतं च करजक्षतम् ।
मुञ्चमानाऽश्रु चक्षुर्भ्यां, देवताऽभूद् वरप्रदा ॥१॥ - अनु०

पूर्वं श्रीआर्यखपुटसूरयः स्तोत्रत्रयोविंशप्रवृत्तादिदेवमन्त्रस्मृत्या प्रसन्नसर्वानुभूतिचक्रादत्तवराः प्राप्तदुष्टव्यन्तरसाधनोपायाः श्रीउज्जयिनीं ययुः। पुरोद्याने चण्डीभवने [१]उषायामूषुरुषर्बुधज्वलद्विद्याप्रतापाः । सा मिथ्यादृष्टिर्दुष्टा वसतिजने कुप्यति विशेषतः श्वेताम्बरेषु। अतो विकृतरूपा पीतमदिरेवाताम्रमुखी प्रभुपार्श्वं प्राप्ता । प्रभवो ध्यानमा-पूर्योपविष्टाः । दृष्टा सा क्रुध्यन्ती । गल्ले नखक्षतं दत्तम् । तत् कुलिशकर्कशं जातम् । देवी दृग्भ्यामश्रूणि मुञ्चन्ती वरं ददौ। गुरुभिर्वधनिषेधः कारितः । जनोपसर्गो वारितः। शान्तीकृता सा । प्रत्यूषे प्रभुपुरःसरा पौरैः सहोपाश्रयं प्रति प्रस्थिता । पुरद्वाराद् व्यावर्तिता पूज्यांह्री नत्वा स्वायतनं गता । कपोले नखरेखा तथैव स्थिता । लोकः सम्यगाराध्यवचनमाराधयत् । सम्यक्त्वं बहवः प्रपेदिरे । गुरुगुणान् स्मरन्तः स्वमन्दिरमीयुर्जनाः । उक्तं च -

१. उषर्बुधः = अग्निः ।

"गुणिनः स्वगुणैरेव, सेवनीयाः किमु श्रिया ?।
कथं फलर्द्धिवन्ध्योऽपि, नानन्दयति चन्दनः ? ॥१॥" - अनु०

॥ इति पञ्चदशी कथा ॥१५॥

* * *

अथ सर्वदेवनाम्ना जिनं स्तौति - त्वामव्ययमित्यादि

हे सर्वदर्शिन् ! सन्तो - विचक्षणा यतयः त्वां एवंविधं प्रवदन्ति-प्रकर्षेण ब्रुवते, जानन्तीत्यर्थः । किंविशिष्टम्? न व्येति - न चयापचयं गच्छतीत्यव्ययस्तं सर्वकालस्थिरैकस्वभावम् । विभाति-परमैश्वर्येण शोभत इति विभुस्तम्। विभवति कर्मोन्मूलने समर्थो भवतीति वा विभुस्तं, इन्द्रादिप्रभुं वा। आध्यात्मिकैरपि न चिन्तितुं शक्यस्तमचिन्त्यम् । अत्यद्भुतगुणयुतं वा। गुणानां न सङ्ख्या -इयत्ता यस्य तमसङ्ख्यं, संसारस्यानादित्वादनन्तज्ञानोऽपि निःशेषतया जीवानां भवान् न सङ्ख्याति - न आचष्टे इत्यसङ्ख्यं, अनन्तार्थान्-अकारादीन् वर्णान् न सङ्ख्यातीत्य-सङ्ख्यम् । अनन्तार्थत्वमागमे -

"सव्वनईणं जा हुज्ज, वालुया सव्वउदहि (सव्वोदहीण?) जं तोयम् ।
तत्तो अणंतगुणिओ, अत्थो इक्कस्स सुत्तस्स ॥१॥"

गुणतः कालतो वा सङ्ख्यातुमशक्यस्तमसङ्ख्यम् । आदौ भव आद्यः, लोकव्यवहारसृष्टिहेतुत्वात् तम्। नमो अरहंताणमिति पञ्चपरमेष्ठिष्वर्हतां प्रथमतया आद्यम् । चतुर्विंशतिजिनेष्वाद्यं वा प्रथमतीर्थंकरं स्वस्वतीर्थ-स्यादिकरत्वात्, सर्वजिनगण आद्यो वा सोपायेन सिद्धं वा। बृंहति-अनन्तानन्देन वर्धत इति ब्रह्म तं, ब्रह्म-निर्वाणं तद्योगाद् ब्रह्माणम् । तेजोरव्योरिव सिद्धसिद्धयोरभेदात् सर्वकर्ममुक्तं वा। सकलसुरेषु ईशितुं शीलमस्य तमीश्वरं कृतार्थं वा। अनन्तज्ञानदर्शनयोगादनन्तम्। न अन्तो मृत्युरूपो यस्य तम्। अनन्तचतुष्टयसमृद्धं वा। अनङ्गस्य-कामस्य केतुरिव

तम्। यथा केतुरुदितो जगत्क्षयं कुरुते, तथा भगवान् कन्दर्पस्य क्षये हेतुः। न अङ्गानि-वैक्रियौदारिकाहारकतैजसकार्मणान्येव केतुः-चिह्नं यस्य तमनङ्गकेतुम्। योगिनां-मनोवचःकायजितां चतुर्ज्ञानिनां ध्यानिनां वा ईश्वरं नाथम्। अथवा योगिनां-सयोगकेवलिनां मान्यत्वादीश्वरम्। विदितः- अवगतः सम्यग्ज्ञानदर्शनचारित्ररूपो योगो येन। अथवा विदितो योगो ध्यानिभिर्यस्मात् तम्। अथ च विशेषेण दितः-खण्डितो योगो-जीवेन सहायः पिण्डाग्निनीरक्षीरन्यायेनात्यन्तं लग्नः कर्मसम्बन्धो येन तम्। अनेकं ज्ञानेन सर्वगतत्वात्। अथवा सिद्धानामनेकेषां एकत्रावस्थानात्। उक्तं च-

''जत्थ य एगो सिद्धो, तत्थ अणंता भवक्खयविमुक्का।
अन्नुन्नमणाबाहं, चिट्ठंति सया सुही सिद्धा ।।१।।'' - आर्या

अनेकं गुणपर्यायप्रेक्षया वा, ऋषभादिव्यक्तिभेदाद् वा।

''नामजिणा जिणनामा, ठवणजिणा हुंति देवपडिमाओ।
दव्वजिणा जिणजीवा, भावजिणा समवसरणत्था ।।१।। '' -आर्या

इति व्यक्त्या वा। एकम्-अद्वितीयमुत्तमोत्तमं, एकं जीवद्रव्यापेक्षया वा। ज्ञानं-क्षायिकं केवलं स्वं-स्वकीयं रूपं यस्य तं ज्ञानस्वरूपम्। सर्वकर्मक्षयादात्मस्वभावो यस्य तं ज्ञानस्वरूपं-चिद्रूपं वा। न मलानि- अष्टादश दोषा यस्य तममलम्। अथैतानि पञ्चदश विशेषणानि परदर्शनिषु तत्तद्देवाभिधानत्वेन प्रसिद्धानीति तर्कापोहः स्वबुद्ध्याऽत्र प्रामाणिकैः प्रमाणकोटिं प्रापणीयः। (ग्रं. ८००) इति वृत्तार्थः ।।२४।।

❊ ❊ ❊

किञ्च - बुद्धस्त्वेत्यादि

हे विबुधार्चित !- शक्रमहित ! बुद्धः-सप्तानामन्यतमः सुगतस्त्व- मेव। कस्मात्? पदार्थेषु बुद्धिबोधात्-मतिप्रकाशात्, यतो 'बुद्धिर्भवति

बौद्धेषु'। अथ सत्यार्थो बुद्धस्त्वमेव, धर्मे बुद्धिप्रकटनाद्, वा विबुधा-विशिष्टपण्डिता - गणधरास्तैरर्चितस्तीर्थंकरस्तस्य बुद्धिः- केवलज्ञानं तया बोधो-वस्तुस्तोमस्य परिच्छेदस्तस्माद् विबुधार्चितबुद्धिबोधात् त्वमेव बुद्धो-ज्ञाततत्त्वो भवसि। यतो बुद्धः स्वमांसदानेन वृथा कृपालुरिति। हे देव ! शं-सुखं करोतीति शङ्करः, स यथार्थनामा त्वमसि, भुवनत्रयशङ्करत्वात्-त्रिलोकीसुखकारित्वात्। स शङ्करो रुद्रः कपाली नग्नो भैरवः संहारकृत्, (अतः) न शङ्करः। हे धीर ! दधातीति धाता - स्रष्टा त्वमेव कृतार्थ-नामा, शिवमार्गविधे रत्नत्रयरूपनियोगस्य विधानात्-करणात्। स ब्रह्मा जडो वेदोपदेशात् नरकपथमुदजीघटत्। हे भगवन् ! व्यक्तं-प्रकटं पुरुषोत्तमस्त्वमेवासि शक्तिमति (त्?) प्रकृष्टपुरुषेषूत्तमः। यत आजन्मासौ परार्थव्यसनी उचितक्रियावान् अदीनमनाः कृतज्ञो दृढप्रतिज्ञो गम्भीर इति। स विष्णुः पुरुषोत्तमत्वं कृतार्थं न धत्ते, क्वापि क्वापि कपटप्रकटनाद् बलिच्छलनादिषु गोपीषु च। इति वृत्तार्थः ॥२५॥

अत्र गरिमोद्गिरणं यथा -

'' जितशत्रुस्त्रियोऽभुवन् - न साध्या व्यन्तरैश्च याः।
ताश्च सज्जीकृताः स्वांह्रि-वारिणा शान्तिसूरिणा ॥१॥''

तथाहि -

'' पुरा शौर्यपुरस्थाने, जितशत्रुरभून्नृपः।
नीतिकन्दो भुजावीर्य - पराजितपराहवः ॥१॥-अनु०
द्वासप्ततिरभूद् रम्भा-प्रभाऽसुरसुरश्रियाम्।
पुरजिद्वाररूपाणां, तस्यान्तः पुरयोषिताम् ॥२॥
[१]आक्रीडे क्रीडितुं पुष्पा-पीडाः क्रीडाचले ययुः।
मेराविवोर्वशीमुख्याः, सर्वास्ताः [२]शर्वरीशभाः ॥३॥

१. गृहोद्याने। २. चन्द्रकान्तयः।

छलं लब्ध्वा क्षुद्रभूतै-र्ग्रस्ता अस्तात्मचेतनाः ।
सौधमानिन्यिरे राज्ञा, यानारूढा गतप्रभाः ॥४॥
दुष्टव्यन्तरदोषेण, सकला विकलाङ्गकाः ।
निश्चेष्टाः समकालं ता, आसन् पाञ्चालिका इव ॥५॥
त्वरितं त्वरितं राजा-ऽचीकरद् रुक्प्रतिक्रियाः ।
वैद्यानां मान्त्रिकाणां च, तान्त्रिकाणां विपश्चिताम् ॥६॥
बौद्धा आकारिताः शैवाः, सांख्या वैशेषिकास्तथा ।
वैदिका विदुराश्चक्रुः, स्वस्वाम्नायप्रकाशनम् ॥७॥
न जातः कोऽपि तैः सर्वै-रुपकारो नृपौकसि ।
भाग्यनाशे यथाऽऽरब्धो, व्यवसायोऽफलो नृणाम् ॥८॥
मास्येकस्मिन् व्यतिक्रान्ते, शान्तिसूरिर्गणी गुणी ।
विहृतस्तां पुरीं पौरै-रभिगम्य प्रवेशितः ॥९॥
प्रभुर्भक्तामरस्तोत्र-चतुर्विंशादिवृत्ततः ।
सिद्धचक्रेश्वरीक्लृप्त-महाशक्तिसमन्वितः ॥१०॥
विचेताश्चिन्तया भूपो, न चाकारयति स्म तान् ।
प्रभावनां कर्तुकामा-नपि राज्ञीचिकित्सया ॥११॥
ततोऽवधूतवेषेणा-भ्राम्यन्नृपगृहान्तिके ।
निर्दोषं नीरुजं [१]ग्लास्नुं, करोमीति वदन् विभुः ॥१२॥
आकर्ण्य तद्वचो राजा, सूरीनाकार्य कार्यवित् ।
हैमे पीठे निवेश्योच्चै-रन्तःपुरमदीदृशयत् ॥१३॥
प्रसद्य भगवन् ! सद्यो, राज्ञीजीवितदानतः ।
मम जीवसमुद्धारं, कुरु राज्यं गृहाण च ॥१४॥
इति विज्ञापितः सूरि-र्दूरीकृत्य पुराकृतान् ।
रक्षौषधिमणीयन्त्र-कण्डकांस्तत्तनुस्थितान् ॥१५॥
आनाय्य नीरं प्रक्षाल्य, स्वांह्री गुरुभिरर्पितम् ।
राज्ञोपात्तं प्रहृष्टेन, दुःस्थितेनेव शेवधिः ॥१६॥

१. ग्लानियुक्तम् ।

अम्बुनः सेवनात् पाना-चक्रायाश्च प्रभावतः ।

प्रणेशुर्व्यन्तराः क्रूराः, सूरादिव दिवाऽन्धकाः ॥१७॥

द्वासप्ततिः स्फुरद्वेष-भूषणा गतदूषणाः ।

निर्मिता नृपसुन्दर्यः, शान्तिसूरिमुनीन्दुना ॥१८॥

(ततः) गुरुपार्श्वे धर्ममश्रौषीत् सपरिवारो नृपः । यथा -

ज्ञानादित्रितयोच्चशालकलितं शीलाङ्गसंज्ञैः पुरः

सत्सूत्रैः कपिशीर्षकैः परिगतं दानादिसद्गोपुरम् ।

क्षान्त्याद्युच्चदशप्रकारविलसद्यन्त्रं शमाम्भोनिधिं

भीताः कर्मरिपोः श्रयध्वमधुना सद्धर्मदुर्गं जनाः !॥१९॥ - शार्दुल०

इति श्रुत्वा नरेन्द्रेण, जैनो धर्मः समादृतः ।

सकले मण्डले क्लृप्ता, जीवरक्षा शुभावहा ॥२०॥ - अनु०

राज्ञीभिश्च गुरोः पार्श्वे, प्रपेदे धर्ममार्हतम् ।

विशुद्धभावनाराजि-चेतोभिः पञ्चमीतपः ॥२१॥

प्रासादान् कारयामास, जैनानुत्तुङ्गतोरणान् ।

जिनार्चानां प्रतिष्ठाश्च, गुरुवाक्याज्जनेश्वरः ॥२२॥

प्रभावनां जैनमतस्य कृत्वाऽ-सौ साधवीं धर्मधुरं च धृत्वा ।

दिवं ययौ शुद्धसमाधिभव्यः श्रीशान्तिसूरिः सुरराजसेव्यः ॥२३॥

- उपजातिः

॥ इति षोडशी कथा ॥

* * *

अथ पुनर्जिनं नमन्नाह - तुभ्यमित्यादि

हे नाथ ! तुभ्यं-भवते नमः । तुभ्यमत्रैकवचनकरणात् सर्वदेवपरिहारेण भगवते एकस्मै नमः-नमस्कारोऽस्तु । नतौ नमस्शब्दोऽव्ययः । किंभूतया? त्रिभुवनार्तिहराय-सद्वचःकरणाभ्यां विश्वत्रयपीडानाशनाय । यः सर्वेषां कृच्छ्रहन्ता स एव वन्द्यः। हे स्वामिन् ! तुभ्यं नमोऽस्तु । क्षितितलस्य-भूपीठस्य अमलभूषणाय-निर्मलालङ्काराय । यो विमलकलया भुवनमल-

ङ्कुरुते स नमस्यः। अथ (वा) क्षितिः-पृथ्वी तलं-पातालं अमलं-स्वर्गस्तेषां त्रयाणां लोकानां भूषणाय। हे ईश! तुभ्यं नमोऽस्तु। त्रिजगतः-त्रैलोक्यस्य परमेश्वराय-प्रकृष्टनाथाय। यो जगदीशः स नम्य एव। हे जिन ! तुभ्यं नमोऽस्तु। भवोदधिशोषणाय-संसारसागरसन्तापनाय। यो दुरन्तं संसृतिजलधिं शोषितवान् स नमस्काराहं एव इति। वृत्तार्थः ।।२६।।

मन्त्रोऽपि - ॐ श्रीं ह्रीं क्लीं महालक्ष्म्यै नमः। सुरभिसद्यस्कपीत-पुष्पैर्लक्षजापात् सिद्धिः।

महिम्नि कथा -

श्रेष्ठी चनिकनामा यः, पत्तने दुर्गतोऽभवत्।
'तुभ्यं नमो' नमस्कारा-च्छ्रिया स्वर्णपतीकृतः ।।१।। - अनु०

श्रीअणहिल्लवाटके श्रीमालवंशयो निःस्वो वणिगवसत्। स परिसरग्रामेभ्यः शिरः पुट्टलकैश्चनकविक्रयणाच्चनिक इति प्रतीतः। तस्यैकदा ग्रामं गच्छतो मार्गे श्रीउद्योतनसूरयो गुरवो मिलिताः। तेन भक्तिपूर्वं वन्दिताः। गुरुभिर्धर्मपृच्छा कृता। तेनोक्तम्-प्रभो ! दौःस्थ्ये को धर्मनिर्वाहः? सर्वत्र पराभूयते दरिद्रः। उक्तं च -

" पंथसमा नत्थि जरा, दारिद्दसमो पराभवो नत्थि ।
मरणसमं नत्थि भयं, छुहासमा वेयणा नत्थि ।।१।।" - आर्या

गुरुभिरुचे -

"धर्माद् धनं धनत एव समस्तकामाः कामेभ्य एव सुखमिन्द्रियजं समग्रम्।
कार्यार्थिना हि खलु कारणमेषणीयं धर्मो विधेय इति तत्त्वविदो वदन्ति ।।१।।"

- वसन्त०

इति स्तवस्य षड्विंशं वृत्तं भाणंभाणं पञ्चासरपार्श्वदेवो नमस्करणीयः। शक्तितस्त्यागतपसी भवतः। शीलमित्याङ्गिको गुणः पालनीयः। महालक्ष्मीमन्त्रश्च जप्य इति। सोऽवदत्-सर्वमेतत् करिष्ये । गुरुन् नत्वा

स्वकृत्ये लग्नः । 'तुभ्यं नमो' भणनपूर्वं पार्श्वं नित्यं ववन्दे । नमस्काराष्ट-शतमजपत्। परजनीं जननीभगिनीवदमंस्त । यत्र ग्रामे चनकार्थं वव्राज तदन्तरा युगादिदेवभक्ता महालक्ष्मीमूर्तिः। आगच्छन् गच्छन् तां नमोऽकरोत् । एवं कुर्वतः षण्मासी गता। अन्येद्युर्मध्याह्ने श्रीप्रासादे दिव्याभरणवसनां सहसनां कुङ्कुमादिकृताङ्गरागां सरागामङ्गनामपश्यत्। सा तमाह-भो पौट्टलिक ! किं करोषि?। स आह देवीं नमन्नस्मि। साऽऽह-किं मोघेन श्रीनमनेन? स्वयंवरां मामङ्गीकुरु, भज भोगान्, त्यज दौःस्थ्ययो-गान् । स आह स्म-त्वं मे माता, एतन्नर्मणाऽपि न वाच्यम्, कर्मणा किमुच्यते?। परस्त्रियो जनन्यो मे व्रतमस्ति। पुनः पुनरुक्त्या प्रत्युक्त्या स उक्तोऽपि नाचलच्छीलात्। श्रीः साक्षाद्भूयाभाषत-वत्स! तुभ्यं नमो वृत्तजपनतुष्टचक्रायाः सख्या वचनात् परीक्षितोऽसि, वरं वृणु। तेनोचे-नैःस्वयं निर्गमय। देव्योक्तम्-अद्य सन्ध्यां यावच्चनकाः क्रीत्वा कोष्ठि-कासु स्थाप्याः प्रातः (ते) कनकीभविष्यन्ति। इत्युक्त्वाऽन्तरधत्त श्रीः। तेन सञ्चिताश्चनकाः। गृहमागतेन कोष्ठिकात्रयं भृतम्। विभाते स्वर्णमया बभूवुः। स स्थालं भृत्वा वृद्धभीमदेवराजस्य प्राभृतीचक्रे । विस्मितेन राज्ञा पृष्टः-किमर्थं कनकचनकघटनम्?। चनिकोऽवोचत् श्रीवरदानादिप्रबन्धम्। राज्ञा तत् तस्य प्रसादीकृतम्। सौधार्थं भूर्लब्धा । नव्यं गृहं कारितं चक्रायुतश्रीयुगादीप्रासादश्च । लक्ष्मीप्रासादोऽप्युद्धृतः । क्रमेण तीर्थयात्राम-सूत्रयत्। नित्यं त्यागभोगयुतः सुखभाजनमभूच्चनिकः श्रेष्ठिमुख्यः ॥

॥ इति सप्तदशी कथा ॥

❊ ❊ ❊

पुनर्युक्त्या गुणान् स्तौति - को विस्मयोऽत्रेत्यादि

हे मुनीश ! यदीत्यङ्गीकारे । नामेत्यामन्त्रणे । हे सकर्णा ! अस्माभिर-ङ्गीकृतोऽयमर्थः, निरवकाशतया-पञ्चास्तिकायरुद्धलोकमध्यवन्नैरन्तर्येण सर्वा-

ङ्गव्यापकतया पुरुषान्तरेऽनवस्थानतया अशेषैः-सर्वैर्गुणैः त्वं संश्रितः-आशिश्रियिषे। अत्रार्थे को विस्मयः ?- किं कुतुकम्? अन्यच्च दोषैः-दूषणैः स्वप्नान्तरेऽपि - स्वप्नावस्थायामपि कदाचिदपि कस्मिंश्चिदपि क्षणे नेक्षितोऽसि-न दृष्टोऽसि-न विलोकितोऽसि। अत्रापि को विस्मयः? किमाश्चर्यम्? यतो गरुडदर्शनाद् भुजगा इव सूर्येक्षणात् तमश्चया इव तीर्थकराद् दूरतो नेशुर्दोषाः। किंभूतैः दोषैः? उपात्तैः-गृहीतैः-प्राप्तैर्विविधैः-नानारूपैराश्रयैर्जात-उत्पन्नो गर्वः-वयं सर्वजनाश्रयाः गुणा जिनाश्रया एवेतिरूपो दर्पो येषां तैः। अथच (वा) उपात्तः-स्वीकृतो विविधानाम्-अनेकेषां विबुधानां-देवानां वा आश्रयः-आश्रयणं तस्माज्जातो-भूतो गर्वः-अहङ्कारो येषां तैः। भगवदङ्गे गुणानां निरन्तराश्रयाद् दोषाणामभावात् कवेरित्युक्तिः। पूर्वं 'सम्पूर्णमण्डल' वृत्ते गुणानां त्रिभुवनव्यापकत्वं कीर्तिद्वारेणोक्तम्। साम्प्रतं त्वदाश्रया एव गुणाः (इति) न पौनरुक्त्यम् । इति वृत्तार्थः ॥२७॥

मन्त्रोऽयम् - ॐ नमो ऋषभाय मृत्युंजयाय सर्वजीवशरणाय परमब्रह्मणेऽष्टमहाप्रातिहार्यसहिताय नागभूतयक्षवशंकराय सर्वशान्तिकराय मम शिवं कुरु कुरु स्वाहा। वार २१ स्मरणात् क्षुद्रोपद्रवनाशो वाञ्छितलाभश्च ॥

प्रभावे कथा यथा -

रुद्रोऽप्यदृश्यतां यातः, स्वप्नेऽपि ददृशे नहि ।
शातवाहनभूपस्य, पुत्रोऽभूज्जिनसेवया ॥१॥ - अनु०
'गोदावरी' रोधसि दक्षिणस्यां दिशि 'प्रतिष्ठानपुरं' समस्ति ।
श्रीहालभूपोऽजनि तत्र वीर-स्त्यागी गुणी सर्वकलश्च भोगी ॥२॥
- उपजातिः
तस्यावरोधेऽपि महत्यपत्यं नासीत् ततोऽखिद्यत भूमिपालः ।
बहूनुपायान् मणिमूलमन्त्रान् व्यरीरचन्नाप सुतोद्भवं तैः ॥३॥

अपि जगताम् दुरितानि हन्ति, सहस्रकिरणः दूरे आस्ताम्, प्रभा एव पद्माकरेषु जलजानि विकाशभांजि कुरुते।

हे नाथ ! तव स्तवनं दूरे आस्तां इत्यन्वयः।

'आस्ताम्' इति क्रियापदम्। तिष्ठत्वित्यर्थः। किं कर्तृ? 'स्तवनम्'। कस्य? 'तव' भवतः। कस्मिन्? 'दूरे' दूरस्थले, स्तवनस्याधिकमहिमत्वात्। किन्तु त्वत्संकथाऽपि-त्वत्पूर्वभवादिमूलप्रथमानुयोगागमोऽपि - त्वद्वार्ताऽपि वा जगताम्-आधारे आधेयोपचारात् जगन्निवासिलोकानां दुरितानि-पापानि हन्ति इति वाक्यम्। 'हन्ति' इति क्रियापदम्। का कर्त्री? 'त्वत्संकथा'। कानि कर्मतापन्नानि? 'दुरितानि'।

'' अथाऽशुभम्।

दुष्कृतं दुरितं पाप-मेनः पाप्मा च पातकम्॥

किल्बिषं कलुषं किण्वं, कल्मषं वृजिनं तमः।

अहं कल्कमघं पङ्कः''- *(अभि. का. ६, श्लो. १६, १७) इति हेमसूरयः।*

किंवि. स्तवनम्? 'अस्तसमस्तदोषं' निरस्तसर्वदूषणम्। अत्र दृष्टान्तमाह सहस्रकिरणो दूरे आस्ताम्।

'आस्ताम्' इति क्रियापदम्। कः कर्ता? 'सहस्रकिरणः' सूर्यः। किन्तु प्रभैव-प्रभातकान्तिरेव पद्माकरेषु - तडागेषु जलजानि - पद्मानि विकाशयति-विकाशीकुरुते इति क्रियासम्बन्धः। 'कुरुते' इति क्रियापदम्। का कर्त्री? 'प्रभा'। कानि कर्मतापन्नानि ? 'जलजानि'। कथंभूतानि ? 'विकाशभाञ्जि' विकस्वराणि॥

अथ समासा :- समस्ताश्च ते दोषाश्च समस्तदोषाः, अस्ताः समस्तदोषा येन तद् अस्तसमस्तदोषम्। तव संकथा त्वत्संकथा। सहस्रं किरणा यस्य स सहस्रकिरणः। पद्मानां आकराः पद्माकराः, तेषु पद्माकरेषु। जले जातानि जलजानि, *डप्रत्ययः।* विकाशं भजन्तीति विकाशभाञ्जि॥ *इति नवमकाव्यार्थः ॥ ९ ॥*

અર્થ : સમસ્ત દોષને દૂર કરનાર આપની સ્તવના દૂર રહો, આપનું નામ પણ

पुरोधसोक्तः कुशसंस्तरस्थः स्नातो व्रती त्रिंशदहानि भूपः ।
हरं समाराधयदर्चनाद्यै - र्दृष्टो न स स्वप्नगतोऽपि तेन ॥४॥
हरार्चनाद् राजमनो निवृत्तं पुरा कृते कर्मणि च प्रवृत्तम् ।
परेद्यविर्जैनमुनिं प्रणम्य पप्रच्छ पुत्रो भविता न वा मे ॥५॥ (ग्रं.९००)
भक्तामरस्तोत्रजपं तपस्वी समादिदेशादिविभुप्रभावात् ।
चक्रेश्वरी ते च वरं सुतार्थं प्रदास्यति क्षोणिप ! मा विषीद ॥६॥
अथादिदेवं कमलादिपुष्पै - रानर्च चक्रां विरचय्य चित्ते ।
को विस्मयोऽत्र स्मरणक्षणे श्री - हालो वरं प्राप दिनत्रयान्ते ॥७॥
पुष्पस्त्रजं लाहि महीशराज्ञी- कण्ठे निवेश्या सुतजन्मनेऽसौ ।
चक्रवचोऽब्दस्तनिताच्छिखीवा - मुष्मात् तुतोषान्तरधाच्च देवी ॥८॥

- इन्द्रवज्रा

पूजाविधेर्ढौकनिकागतायै स्त्रजं प्रियायै व्यसृजत् प्रजेशः ।
तद्धारणाद् दोहदलक्षणं सा मुक्ताफलं शुक्तिमिवाशु दध्रे ॥९॥

- उपजातिः

प्राचीव भानुं नरदेवदेवी प्रासूत सूनुं समये सुदीप्तम् ।
व्यधान्नृपो जन्ममहं च चक्रादासं च नाम्नेति समं वराप्तेः ॥१०॥
कलाः स शुक्लप्रतिपच्छशीव गृहणन् विवृद्धिं वपुषा च पुष्णन् ।
मुष्णांस्तमस्तापततिं जगत्या रराज सद्वृत्ततया कुमारः ॥११॥
तरंस्तरण्याऽथ नृपस्तरङ्गिणीं ददर्श मीनं प्रहसन्तमुच्चकैः ।
अपृच्छदार्तश्चतुरांस्त ऊचिरे प्रजाभिये स्याद् विकृतस्य दर्शनम् ॥१२॥

- उपेन्द्रवज्रा

न तद्गिरा सोऽथ धृतिं दधार नितान्तमन्तर्बिभयाञ्चकार ।
अन्येद्युरुद्यानमसौ संसार जैनं मुनिं तत्र नमश्चकार ॥१३॥ - उपजातिः
पृष्टोऽथ राज्ञा [1]झषहास्यहेतु- मुवाच वाचंयमसत्तमस्तम् ।
उभावभूतामिह दारुभार- बाहौ पुरे निर्धन-तद्धनाह्वौ ॥१४॥
तावेकदा काष्टकृते वनं गतौ मैत्रीयुतौ सक्तुकमात्रशम्बलौ ।
मूर्त्या कृशं धर्मतपोऽकृशं भृशं श्वेताम्बरं साधुमथो अपश्यताम् ॥१५॥-इन्द्र

१. मत्स्यहासकारणम् ।

मासोपवासव्रतपारणार्थिनेऽ - मुष्मै वितीर्णं तनु सक्तुभोजनम् ।
बीजं सुभूमाविव भावपाथसा सिक्तं महत्पुण्यकणाय जायते ॥१६॥- इन्द्र०
स निर्धनस्तद्धनमित्युवाच स स्माह चैनं मम नात्र भावः ।
कष्टादुपात्तं निजवस्तु दत्तं प्रत्यक्षहानिः कथमेष लाभः ? ॥१७॥ - युग्मम्
तत् सर्वथाऽहं निजसक्तुभाग-मस्मै न दास्यामि शरीरपुष्ट्यै ।
भोक्षे स्वयं दानगुणेन कीर्तिं लभेत लक्ष्मीपतिरेव नान्यः ॥१८॥ - उप०
इति ध्वनन्तं तमुपेक्ष्य तद्धनं स निर्धनस्तस्य निपत्य पद्द्वये ।
तपस्विने स्वीयविभागसक्तुकान् ददे सुभक्त्या मुमुदे च चेतसा ॥१९॥
- वंशस्थम्
वनान्तवर्ती किल कश्चनामर- स्तदा मुदाऽश्लाघत साधु साध्वहो !।
प्रदानमेतेन कृतं प्रणम्य तौ ततो गतौ सञ्चितपुण्यपातकौ ॥२०॥ - वंशस्थम्

यत उक्तं च -

समानेऽपि हि दारिद्र्ये चित्तवृत्तेरहोऽन्तरम् ।
अदत्तमिति शोचन्ते, न लब्धमिति वाऽपरे ॥२१॥ - अनु०

निर्धनो दानमभूषयत् । उक्तं च -

आनन्दाश्रूणि रोमाञ्चो, बहुमानं प्रियं वचः ।
किं वाऽनुमोदना पात्र-दानभूषणपञ्चकम् ॥२२॥ - अनु०
कालक्रमान्मृत्युमवाप्य भद्र- स्वभावधीर्निर्धनधार्मिकाग्र्यः ।
दानावनीशादधनत्वबन्दे-र्मुक्तः क्षणेन क्षितिपत्वमाप ॥२३॥ - उप०
पृथ्वीपतिश्रीघनवाहनात्मजः पाथोधिरोधोगतवाहवाहनः ।
स त्वं प्रभुत्वोदयमेघवाहनः क्षोणीश्वरोऽभूर्भुवि शातवाहनः ॥२४॥-इन्द्र०
विक्रीय दारूण्युदरम्भरिर्यः स तद्धनस्तद्धनतां दधानः ।
ध्यानेन चार्तेन [१]मृतस्तिमित्वं गोदाजले प्रापदसातधाम ॥२५॥ - उप०
बेडाधिरूढं चिरकालदृष्टं भवन्तमारादवलोक्य जाता ।
जातिस्मृतिस्तस्य झषस्य दान-साक्षी सुरो बाढमहासयत् तम् ॥२६॥- उप०
आस्तां समौ पूर्वभवेऽल्पकस्य दानाददानादधुना युवां तौ ।
एको नृपोऽन्यश्च तिमिस्तदेषा पुण्यांहसोर्व्युष्टिरिति[२] प्रतीता ॥२७॥- उप०

१. मत्स्यत्वम् । २. फलम् ।

ज्ञातं त्वया यत् क्षितिपाल ! सत्यं स [1]सङ्घचारी मम कष्टकारी ।
[2]आत्माशिहास्यात् तदहो न ते भीर्न देशसैन्यादिभयं कदाचित् ॥२८॥- उप०

अन्यैरप्युक्तं च -

मीनानने प्रहसिते भयभीतिमाह श्रीशातवाहनमृषिर्भवताऽत्र नद्याम् ।
यत्सक्तुभिर्मुनिरकार्यत पारणं प्राक् दैवाद् भवन्तमुपलभ्य झषो जहास ॥२९॥

- वसन्त०

सुपात्रदानस्य फलं विशालं विभाव्य नित्यं तदिदं प्रदेयम् ।
अदत्तदानाश्च जनाः पृथिव्यां न रूपसौभाग्यसुखादिभाजः ॥३०॥ - उपेन्द्र०

उक्तं च -

दानं महिमनिदानं, कुशलनिधानं कलङ्ककरिसिंहः ।
श्रीकलकण्ठीचूतः, सिद्धिवधूसङ्गमे दूतः ॥३१॥ - आर्या

अन्यच्च -

पूजामाचरतां जगत्त्रयपतेः सङ्घार्चनं कुर्वतां
तीर्थानामभिवन्दनं विदधतां पुण्यं वचः शृण्वताम् ।
सद्दानं ददतां तपश्च चरतां सत्वानुकम्पाकृतां
येषां यान्ति दिनानि जन्म सफलं तेषां सुपुण्यात्मनाम् ॥३२॥ शार्दुल०

इत्थं महामुनिमुखादुपदेशमालां श्रुत्वा च पूर्वभवसङ्गतमात्मवृत्तम् ।
सम्यक्त्वशोभितमुपासकशुद्धधर्मं श्रीसातवाहननृपो नितरामुवाह ॥३३॥

- वसन्त०

श्रीसिद्धाद्रौ श्रीयुगादीशवेश्मो- द्धारं चक्रे तीर्थयात्रां च चित्राम् ।
श्रीहालाह्वो जैनभूपस्ततोऽभूत् चक्रादासः क्षोणिचक्राधिराजः ॥३४॥

- शालिनी

महाराष्ट्रेषु देशेषु, प्रतिष्ठानपुरे निजे ।
मुनिसुव्रतचैत्यस्यौद्धारं चक्रे स जैनराट् ॥३५॥ - अनु०

॥ इत्यष्टादशी कथा ॥

---

१. मत्स्यः । २. मत्स्यहास्यात् ।

अथ वृत्तचतुष्टयेन प्रातिहार्यचतुष्कमाह - उच्चैरशोकेत्यादि

हे सेवकजनकल्पवृक्षसदृक्ष ! भवतः तव रूपं-वपुः नितान्तम्-अत्यर्थम् आभाति-शोभते। किंभूतम् ? उच्चैः-अतिशयेन जिनदेहाद् द्वादश-गुणोच्चः, यथा-प्रथम-तीर्थकृतस्त्रिकोशमानोऽन्येषां क्रमेण किञ्चिद्धीय-मानो महावीरस्य द्वात्रिंशद्धनुर्मितो योऽशोकतरुः-कङ्केल्लिवृक्षस्तं संश्रितम्-आश्रितं, केवलोत्पत्तेरनन्तरं अशोकवृक्षस्य सदा विद्यमानत्वात्; उत्-उल्लसिता मयूखाः-किरणा यस्य यस्माद् वा तद् उन्मयूखं; अमलं स्वेदपङ्करहितत्वात् निर्मलम्। किमिवाभाति? रवेर्बिम्बमिव। यथा रवेर्बिम्बं पयोधरपार्श्ववर्ति-मेघसमीपस्थं भाति। तदपि किंभूतम्? स्पष्टाः-प्रकटा उल्लसन्तः-उद्गच्छन्तः किरणा यस्य यस्माद् वा तत्, अस्ततमोवितानं-क्षिप्तान्धकारप्रकरम्। सूरमण्डलरूपं जिनरूपं मेघतुल्यो नीलदलोऽशोक इति युक्तं साम्यं च ॥ इति वृत्तगर्भार्थः ॥२८॥

❊ ❊ ❊

सिंहेत्यादि

हे तीर्थपते ! मणिमयूखशिखाविचित्रे-रत्नकान्तिचूलाचारुणि हैमे सिंहासने कनकावदातं-हेमगौरं तव वपुः-देहमुपविष्टं विभ्राजते-भाति। किमिव ? सहस्ररश्मेर्बिम्बमिव। यथा सूर्यमण्डलं तुङ्गोदयाद्रिशिरसि-उन्नतपूर्वाच-लशृङ्गे वर्तमानं भाति। किंभूतम्? वियति-आकाशे विलसन्तः-द्योतमाना येंऽशवः-करास्तेषां लतावितानं-मालाविस्तारो यस्य यस्माद् वा तत्, अथ (वा) वियति-आकाशे वियन्तः-विचरन्तो वा विलसन्तः-स्मेरा येंऽशवो नवोदयत्वाद् रक्तवर्णाः करास्त एव लतावितानं-रक्ताशोक-प्रवालवल्लीमण्डपो यस्माद् यस्मिन् वा तद् वियद्विलसदंशुलतावितानम्। अत्रांशुवृन्दसमा मणिमयूखमाला, पूर्वाद्रिशिखरसमानं सिंहासनं, रविबिम्बोपमानं त्वद्वपुरित्युचिता समता। यतः प्रथमतीर्थकृतो रूपं

स्वर्णवर्णं वर्ण्यते। अन्येषामपि पञ्चदशानां विदेहविहारिणां वा। इति वृत्तार्थः ॥२९॥

❊ ❊ ❊

कुन्देत्यादि

हे पारगत ! कलधौतकान्तं-चामीकररुचिरं तव वपुः-देहं विभ्राजते। किंभूतम्? कुन्दावदाताभ्यां-विशदाभ्यां चलाभ्यां-शक्रादिधूयमानाभ्यां चामराभ्यां वालव्यजनाभ्यां चार्वी-मनोज्ञा शोभा-विभूषा यस्य तत्। किमिव? सुरगिरेरुच्चैस्तटमिव-शिखरमिव। यथा शातकौम्भं-सौवर्णं उच्चैः-उच्चं सुरगिरेः-मेरोः तटं-प्रस्थं भाति। तदपि तटं उद्यन्-उद्गच्छन् शशाङ्कः - चन्द्रस्तद्वच्छुचिः-धवला निर्झरस्य वारिधारा-जलवेणी यत्र यस्माद् वा तत् । अत्र मेरुतटसमं श्रीनाभेयदेहं, निर्झरजलधारा वरे चामरे इत्युपमा मनोरमा । इति वृत्तार्थः ॥३०॥

❊ ❊ ❊

छत्रेत्यादि

हे पवित्रचरित्र ! उच्चैः-ऊर्ध्वं-मूर्ध्नि स्थितं-निविष्टं तव छत्रत्रयं-आतपत्रत्रितयं विभाति। किंभूतम्? स्थगितः-छादितो भानोः करप्रतापो येन, सूर्यकरोत्तापरोधकं; मुक्ताफलानां प्रकरस्य-समूहस्य जालेन-रचनाविशेषेण विवृद्धा-वृद्धिं गता शोभा यस्य तत्। तत्र भवतः स्वर्गमर्त्यपातालरूपस्य त्रिजगतः परमेश्वरत्व-महाधिपत्यं प्रख्यापयत्-कथयत् निरूपयदिति। अत्र प्रातिहार्यप्रस्तावनाप्रस्तावेऽनुक्ता अपि पुष्पवृष्टिदिव्यध्वनिभामण्डलदुन्दुभयः स्वधियाऽवतार्याः, यथा -

“ **बिटट्ठाई सुरहिं, जलथलयं दिव्वकुसुमनीहारिं ।**

पयरंति समंतेणं, दसद्धवण्णं कुसुमवासं ॥१॥” - आर्या

इत्यागमे (आवश्यकनिर्युक्तौ, गा. ५४६) सुरकृता कुसुमवृष्टिः १ ।

''देवा दैवीं नरा नारीं, शवराश्चापि शावरीम् ।
तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम् ।।१।।'' - अनु०

इति पञ्चत्रिंशद्गुणोपेता दिव्यध्वनिर्जिनवाणी २ ।

''भामण्डलं चारु च मौलिपृष्ठे, विडम्बिताहर्पतिमण्डलश्रि'' ३। (अभिधानचिन्तामणौ का० १, श्लो० ५९)

देवदुन्दुभयो ध्वनन्त्याकाशे ४ । एतत् सर्वं यत्राशोकतरोः प्रादुर्भावस्तत्र स्याद् देशनाक्षणे । अशोकतरुसहचरितत्वात् पृथग् नादृताः कविना। इति वृत्तार्थः ।।३१।।

मन्त्रो यथा -

अरिहंतसिद्धआयरियउवज्झायसव्वसाहुसव्वधम्मतित्थयराणं ॐ नमो भगवईए सुयदेवयाए संतिदेवयाणं सव्वपवयणदेवयाणं दसण्हं दिसापालाणं पंचण्हं लोगपालाणं ॐ ह्रीं अरिहतदेवं नमः । एषा विद्या १०८ जापात् पठितसिद्धा वादे व्याख्यानेऽन्येषु च कार्येषु सर्वसिद्धिं सङ्ग्रामे च जयं ददाति । व्यालतस्करभयं भिनत्ति ।।

महिमनि कथा -

स्वप्ने छत्रत्रयं देवं, समीक्ष्योच्छिन्नवंशकः ।
गोपालो जिनमानर्च, तुष्टा देवी ददौ वरम् ।।१।।

श्रीसिंहपुरे कश्चित् क्षीणकुलगोत्रः क्षत्रियो वसति स्म । स निर्धनत्वाद् गोधनं चारयति स्म । स भद्रकप्रकृतिर्जैनमुनिमवन्दिष्ट । स महर्षिः -

''लक्ष्मीर्वेश्मनि भारती च वदने शौर्यं च दोष्णोर्युगे
त्यागः पाणितले सुधीश्च हृदये सौभाग्यशोभा तनौ ।
कीर्तिर्दिक्षु सपक्षता गुणिजने यस्माद् भवेदङ्गिनां
सोऽयं वाञ्छितमङ्गलावलिकृते श्रीधर्मलाभोऽस्तु वः ।।१।।''

इत्थंभूतां धर्माशिषं ददौ । गोपालक्षत्रियो गुरुदेशनां सुधामिवापिबत्, भक्तामरस्तवं पञ्चपरमेष्ठिमन्त्रं चापठत्, शश्वदस्मरत्, जिनधर्मं समाराध-

यत्। एकदा निशि स्वप्ने छत्रत्रयादिप्रातिहार्यवर्यं श्रीयुगादिजिनं ददर्श चित्ते तुतोष च । प्रातर्धेनूश्चारयन् भूतलाजलदवृष्टिप्रकटीभूतं प्रथमजिन-बिम्बं नदीतटे कुटीरके स्थापयित्वाऽऽनर्च (ग्रन्थाग्रं १०००) । तत्पुरः स्तवं त्रिसन्ध्यमजपत् । एवं षण्मास्यतिचक्राम। अन्येद्युरेकत्रिंशं वृत्तं स्मरतो गोपालस्य प्रसन्ना चक्रेश्वरी राज्यवरं ददौ । दैववशात् सिंहपुरेशो निष्पुत्रः पञ्चत्वमाप। राजवंश्यानां कलिमालोक्य मन्त्रिसामन्ताद्यैः पञ्चदि-व्यान(न्य) भ्यषिच्यन्त। भ्रामं भ्रामं सर्वत्र वने गोपालाय राज्यमयच्छत्(न्) । भृङ्गारेण नीरेणाभिषिक्तः। छत्रेण शीर्षे स्थितम् । चामराभ्यां स्वयमेव लुलितम् । हयेन हेषितम् । कुम्भिना कुम्भस्थलेऽधिरोपितः । निःस्वानेषु ध्वनिरुदलसत् । देवदत्त इति नामा राजाऽभूत्। सिंहासनमलं-चकार । नीचोऽयमिति सीमालभूपाला न मन्यन्ते स्म तम्। एवं न जानन्ति ते यथा -

“ यः प्रमाणीकृतः सद्भि-स्तस्यान्तं न विचार्यते ।
अतुलेन तुलामेति, काञ्चनेन सहोपलः ।।१।।”
“ नरह नरिंदह रिसिकुलह वरकामिणि कमलाह ।
अन्तागमणु न पुच्छियइ कह कुसलत्तणु ताह ? ।।२।।”

इत्थमविमृशन्तः सामन्ताः कलहायोत्तस्थुः । सर्वरिपुबलचेष्टितं स्वं ज्ञात्वा तेन अप्रतिचक्रा स्मृता । दृग्गोचरमागतं परचक्रम् । दृषद्घटित-मिव चित्रलिखितमिव मृन्मयमिव स्तम्भक्रियानिश्चेष्टं जातम्। बलवत्सङ्गेन किं न स्यात् ? । उक्तं च -

“महीयसामवष्टम्भे, रेणुप्रायोऽपि कीर्तिमान् ।
धृता पतन्ती शेषाद्यै-रचलेत्युच्यते क्षितिः ।।१।।”

ततो देवीप्रभावाद् भीताः सामन्ताः प्रणता निर्देशवर्तिनो जाताः। तदाज्ञां देवाधिदेवशेषामिव शीर्षे शेखरीचक्रुः । देवदत्तो राजा तेषु प्रतिकूलेष्वपि प्रसन्नोऽभूत् । उक्तं च-

'' निर्गुणेष्वपि सत्त्वेषु, दयां कुर्वन्ति साधवः ।
न हि संहरति ज्योत्स्नां, चन्द्रश्चाण्डालवेश्मसु ।।१।।
नह्येके व्यसनोद्रेके-ऽप्याद्रियन्ते विपर्ययम् ।
जहाति दह्यमानोऽपि, घनसारो न सौरभम् ।।२।।''

क्रमेण विक्रमाक्रान्तभूचक्रशक्रः परमजैनः श्रीआदिदेवं गुरुप्रासादे न्यवेशयत् । चिरं राज्यभागभूत् ।।

।। इति एकोनविंशी कथा ।।

* * *

अथातिशयद्वारेण जिनं स्तौति - उन्निद्रेत्यादि

हे जिनेन्द्र ! तव पादौ -चरणौ यत्र भूमौ पदानि गमनेऽवस्थानरूपाणि न्यासन् (धत्तः?) - धारयतः विबुधा-देवास्तत्र-धरापीठे पद्मानि-कमलानि परिकल्पयन्ति-रचयन्ति, निर्मापयन्तीत्यर्थः । किंभूतौ चरणौ? उन्निद्राणि-विकस्वराणि हेम्नः- स्वर्णस्य नवानि-नूतनानि नवसङ्ख्या(का)नि वापङ्कजानि-कमलानि तेषां पुञ्जं - चयस्तस्य कान्तिः-द्युतिः, पर्युल्लसन्ती-समन्तादुच्छलन्ती या नखानां मयूखशिखा-किरणचूला, उन्निद्रहेमनवपङ्कजपुञ्ज-कान्त्या पर्युल्लसन्नखमयूखशिखया वाऽभिरामौ-रुचिरौ । कोऽर्थः? एका नवस्वर्णकमलकान्तिः पीता, अपरा दर्पणनिभा नखप्रभा च चरणौ वर्णविचित्रौ चक्रतुरिति। पद्मानां पुञ्जत्वमागमे (आवश्यकनिर्युक्तौ गा.५५५) अप्युक्तम् -

''सूरोदयपच्छिमाए, ओगाहंतीइ पुव्वओ एइ (ऽईइ) ।
दोसु पउमेसु पाया, मग्गेण य हुंति सत्तण्णे ।।१।।''

।। इति वृत्तार्थः ।।३२।।

* * *

अथ संक्षिपति - इत्थमित्यादि

हे जिनेन्द्र ! इत्थं-पूर्वोक्तप्रकारेण यथा-यद्वद् धर्मोपदेशनविधौ-धर्मव्याख्याक्षणे तव विभूतिः-अतिशयरूपा समृद्धिरभूत् तथा तद्वत् परस्य-ब्रह्मादिसुरस्य नासीत्। अत्र दृष्टान्तः-दिनकृतः-सूर्यस्य प्रहतान्धकारा-ध्वस्तध्वान्ता यादृग्-यादृशी प्रभा वर्तते विकाशिनोऽपि-उदितस्यापि ग्रहगणस्य-भौमादेस्तादृक्-तादृशी प्रभा कुतः-कस्माद् भवति?।

चतुस्त्रिंशदतिशया यथा - स्वेदमलरोगमुक्तं सद्गन्धरूपयुक्तं वपुः १ पद्मगन्धः श्वासः २ रूधिरमांसौ क्षीरधाराधवलौ सुरभी च ३ आहारनीहारावदृश्यौ ४ चेति जन्मभवाश्चत्वारः ४॥ योजनमिते भूप्रदेशे नरतिर्यक्सुरकोटाकोटेरवस्थानं १ चतुःक्रोशनादिनी सर्वभाषानुवादिनी भगवद्वाणी २ पृष्ठभामण्डलं ३ क्रोशपञ्चशतीमिते क्षेत्रे न दुर्भिक्षं ४ न रोगाः ५ न वैरं ६ न ईतयः ७ न मारिः ८ नातिवर्षणं ९ नावर्षणं १० न स्वचक्रपरचक्रजं भयं ११, एते चैकादश केवलोत्पत्तेरनन्तरं कर्मक्षयोत्थाः ११॥ गगने तीर्थकृत्पुरो धर्मचक्रं १ चामरयुगं २ पादपीठयुतं मणिसिंहासनं ३ छत्रत्रयं ४ रत्नखचितो महेन्द्रध्वजः ५ चरणन्यासे नव हेमपद्मानि ६ प्राकारत्रयं ७ चतुर्मुखरचना ८ चैत्यवृक्षः ९ अधोमुखतया कण्टकानामवस्थानं १० तरुनमनं ११ दुन्दुभिध्वनिः १२ पृष्ठानुपाती पवनः १३ प्रदक्षिणं ददानाः शकुनाः १४ गन्धजलवृष्टिः १५ पञ्चवर्णपुष्पवृष्टिः १६ नखकेशरोम्णः सहजावस्थानं व्रतात् परतोऽवर्धनं १७ चतुर्विधामराणां जघन्येऽपि पार्श्वे कोटीस्थितिः १८ षड्ऋतूनां शब्द-रूप-रस-गन्ध-स्पर्शानां चानुकूलता १९, एते एकोनविंशतिर्देवकृता अतिशयाः १९॥ एवं सर्वमीलनाच्चतुस्त्रिंशदतिशयर्द्धिर्यादृशी जिने तादृशी ब्रह्मादौ कुतः? । तेषां सरागत्वान्न कर्मक्षयः। कर्मक्षयं विना न उत्तमोत्तमता । तां विना प्रातिहार्यर्द्धेरभाव इति स्थितम् ॥

अथ मन्त्रः - ॐ ह्रीं श्रीं कलिकुण्डदण्डस्वामिन् ! आगच्छ आगच्छ आत्ममन्त्रान् रक्ष रक्ष परमन्त्रान् छिन्द छिन्द मम सर्वसमीहितं कुरु कुरु

हुंफट् स्वाहा । एतज्जापात् सकलसम्पदो भवन्ति। जापः सहस्र १२ रक्तश्वेतपुष्पैः कार्यः । गुरूपदेशाद् विधिर्ज्ञेयः ।।

महिमकथा यथा -

धवलक्वकवास्तव्यो, जिणहाकोऽतिदुर्गतः ।
चक्रेश्वरीप्रसादेन, दण्डाधीशोऽजनिष्ट सः ।।१।।

श्रीगूर्जरमण्डलेषु श्रीधवलक्वके श्रीश्रीमालवंशमौक्तिकं पाहापुत्रो जिणहाख्यः श्रावकोऽकिञ्चनत्वाद् घृतकुतुपकर्पासकणादिवहनेनाजीविकां चकार । सोऽन्यदा निजगुरूणां श्रीअभयदेवसूरीणां धर्मागारमगात् । वन्दिता गुरवः । गुरुभिर्धर्मलाभपूर्वकं -

''धर्मः सनातनो येषां, दर्शनप्रतिभूरभूत् ।
परित्यजति किं नाम, तेषां मन्दिरमिन्दिरा[1] ।।१।।''

इति धर्मोपदेशो दत्तः । तेनोक्तम् - भगवन् ! स्वोदरभरणासहस्य दरिद्रस्य का धर्मक्रिया ? । उक्तं च -

''धणवंतह सुणहि सयणा बंधजणआणवडिच्छओ ।
कज्जकालि सयमेव लोउ तसु होइ बिइज्जओ ।।१।।
राउलदेउल गणइ भणइ ईसर ! वइ तुहं सिरि
दारिद्दिय मनरुंधि ठामु तुहूं बाहिरि नीसरी ।।२।।
रे दारिद्र्य ! नमस्तुभ्यं, सिद्धोऽहं त्वत्प्रसादतः ।
अहं सर्वत्र पश्यामि, मां कोऽपि हि न पश्यति ।।३।।'' - अनु०

इत्युक्ते प्रभुभिर्देवालयात् पद्मकोशस्था श्रीपार्श्वप्रतिमा चक्रेश्वरीमूर्तिसनाथा दापिता । कलिकुण्डाम्नायो भक्तामरस्तवश्च स्मर्तव्य इत्युक्तः प्रभून् नत्वा गृहमगात् । गृहमार्गे च शुचिः पार्श्वबिम्बमार्चिचत् त्रिः स्तवं मन्त्रं च सस्मार । एवं कुर्वन् जिनभाह्लोऽन्यदा ग्राममगमत् । तत्र त्रियामायां स्तवस्त्रयस्त्रिंशद्वृत्तगुणनक्षणे तत्पुरस्तेजः पुञ्जराजमानं सूर्यमण्डलसमानं प्रादुर्भूतं विमानम् । ततोऽवातरत् चक्रेश्वरीप्रतीहारी (आह च) भद्र !

१. लक्ष्मीः ।

જગતના દુરિતોને હણે છે, સૂર્ય દૂર રહો, (સૂર્યની) પ્રભા જ સરોવરોમાં કમળોને વિકસિત કરે છે.

* * *

अथ स्तवनस्य रेखाप्राप्तं महिमानमाह

नात्यद्भुतं भुवनभूषण ! भूतनाथ !
भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः
तुल्या भवन्ति भवतो ननु तेन किं वा
भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥

दण्डान्वयः - हे भुवनभूषण ! हे भूतनाथ ! भुवि भूतैः गुणैः भवन्तम् अभिष्टुवन्तः भवतः तुल्याः भवन्ति न अत्यद्भुतम् वा ननु इह यः आश्रितम् भूत्या आत्मसमम् न करोति? तेन किम्?

हे भुवनभूषण ! हे भूतनाथ ! जना भुवि भवतः तुल्या भवन्तीत्यन्वयः। 'भवन्ति' इति क्रियापदम्। के कर्तारः? 'जनाः'। कथंभूताः? 'तुल्याः' समानाः। कस्य? 'भवतः'। *'तुल्यार्थैस्तृतीयाषष्ठ्यौ' (सिद्ध. अ. २, पा. २, सू. ११६) इति षष्ठी।* किं कुर्वतः? 'अभिष्टुवन्तः' स्तवं कुर्वन्तः। कं कर्मतापन्नम्? 'भवन्तं' त्वाम्। कैः करणभूतैः? 'गुणैः' औदार्यादिभिः। किंवि.? 'भूतैः' सद्रूपैः। कस्याम्? 'भुवि' पृथिव्याम्। हे भुवनभूषण!- हे जगन्मण्डन ! तत्-तुल्यभवनं, नात्यद्भुतं-न अत्याश्चर्यं, तव स्तवनमाहात्म्यात् त्वद्रुपा भवन्तीति भावः। अत्र व्यतिरेकमाह-ननु-निश्चितं वा तेन स्वामिना किं स्यात् इत्यन्वयः। 'स्यात्' इति क्रियापदम्। किं कर्तृ? 'किं' कार्यम्। केन? 'तेन' स्वामिना। आश्रितेनेति शेषः। आक्षेपोक्त्या न किमपि इत्यर्थः। तेन केन? यः स्वामी आश्रितं-सेवकं भूत्या-सम्पदा आत्मसमं न करोतीत्यन्वयः।

'करोति' इति क्रियापदम्। कथम्? 'न'। कः कर्ता? 'यः' स्वामी। कं कर्मतापन्नम्? 'आश्रितम्'। किंविशिष्टम्? 'आत्मसमं' स्वतुल्यम्। कया?

श्रीआदिदेवस्तवस्मृतेः श्रीपार्श्वबिम्बार्चनात् तुष्टा मत्स्वामिनी चक्रा त्वां सधनमजेयं चिकीर्षुरिदं रत्नं दत्तवती । त्वया भुजे बद्धं रत्नं सर्ववश्यं करिष्यतीत्युक्तः सोऽग्रहीत् । साऽन्तरधात् । निजभुजे बद्ध्वा प्रातर्गृहं व्रजन् मार्गे त्रिभिश्चौरैरुक्तः - भो वणिज ! मुञ्च चार्थ पात्रं मरिष्यसेऽन्यथा। मयि जीवति को गृहीता मदाज्यकुतुपमित्युक्त्वा बाणत्रयेण तस्करत्रयं जघान । पश्चादागतैः पान्थैस्तस्य विक्रमाद्भुतं दृष्ट्वा विसिष्मिये । चौरवधाद् रञ्जितैर्जयजयारवश्चक्रे । सा वार्ता धवलक्ककात् श्रीपत्तनं प्राप्ता । चौलुक्यभीमदेवराज्ञा श्रुता । आहूतो जिणहाकः । दृष्टः कपाटपुटविकटवक्षस्थलो जानुप्राप्तभुजार्गलोऽयम् । वसनहीनोऽपि तेजस्वी। खल्वाटोऽपि सच्छायः । एकोऽपि श्रीमान् । उवाच राजा-भो ! गृहाण गूर्जरदेशमध्ये क्रूरतस्कररक्षणक्षमं निष्कोशं मम [1]मण्डलाग्रम् । तावदुचितभाषी शत्रुशल्यो नाम सेनानीरवादीत् -

''खंडउ तासु समप्पियइ जसु खंडइ अभ्यासु ।
जिणहा इक्कु समप्पियइ तुलचेलउं कप्पासु ॥१॥''

जिणहाख्योऽपि तमुद्दिश्योचे -

''असिधर धणुधर कुंतधर, सत्तिधरा य वहूअ ।
सतुसल ! जे रणि सूर नर, जणणि ति विरल पसूय ॥१॥''

राज्ञोक्तम् - साधूक्तम् । शत्रुशल्यो नरेन्द्रमनो मत्वाऽवादीत्

''अश्वः शस्त्रं शास्त्रं, वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता, भवन्ति योग्या अयोग्याश्च ॥१॥'' - आर्या

त्वयाऽऽदृतोऽयं सर्ववीरकोटीरो भविष्यति । उक्तं च -

''प्रसन्नेऽधिपतौ ग्राह्या, मन्देनापि पदस्थितिः ।
ग्रामोऽपि शिष्ययत्येव, यद्बलाधिपतामिह ॥१॥''

इति श्रीभीमस्तस्मै पट्टदुकूलं वेषं स्वर्णकरमुद्रिकं खड्गं धवलक्का-

१ खड्गम् ।

काधिपत्यं सैन्यं चादात् । स राजानं नत्वा निजपुरं प्राविशत् । क्रमात् सकलमलिम्लुचान् न्यग्रहीत् । तस्करनाम शास्त्रे स्थितं, न गूर्जरात्रासु । एकदा कश्चिच्चारणस्तत्परीक्षांचिकीः करभमचूचुरत् । जिणहारक्षकैः सोष्ट्रो धृतः । दण्डेशे पूजां कुर्वति तत्क्षणं ढौकितो बद्धश्चौरः । देव ! असौ दस्युः, किं क्रियते? । अस्य सोऽङ्गुलिसंज्ञया वधमादिशत् । ततः पाटच्चरो वच उच्चैरुच्चचार -

''इकु जिणहा अनुजिणवरह न मिलइ तारोतार ।
जेहिं अमारणु पूजीइ ते किम मारणहार ? ॥१॥''

इति श्रवणान्मुक्तः । स उक्तश्च-भो ! पुनश्चेच्चौरिकां करिष्यसि तदा मृत एवेति । स उवाच -

'' इक्का चोरी सा य किय, जा खोलडइ न माइ ।
बीजी चोरी जे करइ, चारणु चोर न थाइ ॥१॥''

अन्यच्च - भवता वणिजा कथं पारिपन्थिका निगृहीताः? अस्मान्मया सौराष्ट्रकचारणेन चौर्यं कृतं इत्युक्ते लब्धधनः स्वे कृत्ये लग्नः । जिनभाख्यो महामात्यः श्रीधवलक्ववके श्रीपार्श्वप्रासादमकारयत् । कषपट्ट-रत्नमयीं श्रीपार्श्वनाथप्रतिमामप्रतिमां निरमीमपत् । श्रीदुर्लभदेवराजप्रति-बोधकारिश्रीजिनेश्वरसूरिपट्टमुकुटश्रीस्तम्भनकपार्श्वप्रकटनकृन्नवाङ्गवृत्तिकारश्रीअभ-यदेवसूरिपार्श्वात् प्रातिष्ठिपत् ताम् । महामहः महादानपुरःसरं गुरुवचना-च्चक्रेश्वरीयुक्श्रीयुगादिदेवप्रासादं व्यरीरचत् । नवाङ्गवृत्तेः पुस्तकान्यली-लिखत् । सङ्घपतिरभूत् चिरं राज्यमभुनक् । सुभटमुकुटः श्रावकोत्तमो जिणहा (क) नामा दण्डाधिपः । अद्यापि तत्र पुरे पौट्टलिकानां शुल्कं न कश्चन गृह्णाति, चेदादत्ते सोऽधीशो न नन्दति, जिणहाप्रभावादेव तत्कृता रीतिरियम् ॥ ३ ३॥

॥ इति विंशी कथा ॥

अथ गजभयहरं तीर्थकरं स्तौति - श्च्योतन्मदेत्यादि

हे गजपतिगते ! त्वदाश्रितानां-त्वच्चरणशरणस्थानां जनानां आपतन्तं-

आगच्छन्तं इभं-दुष्टगजं दृष्ट्वा भयं न भवति । किंभूतम् ? गण्डौ नेत्रे करो मेढ्रं गुदमिति सप्तसु स्थानेषु श्च्योतता-क्षरता मदेनाविलाः - कलुषा (षिता) विलोलाः- चञ्चलाः कपोलमूले-गण्डप्रदेशे मत्ताः- क्षीबाः सन्तो भ्रमन्तो-भ्रमणशीलाः (ग्रन्थाग्रं० ११००) ये भ्रमरास्तेषां नादेन - झङ्कारध्वनिना विवृद्धः-पुष्टिं गतः कोपः - क्रोधो यस्य तं ऐरावताभं महाकायत्वादैरावणसमं उद्धतम्-अविनीतम् अशिक्षितं - दुर्दान्तम् । इति वृत्तार्थः ॥३४॥

एषु वृत्तेषु वक्ष्यमाणतत्तद्धीहरवृत्तवर्णा एव मन्त्राः पुनः पुनः स्मर्तव्याः । अतो नापरमन्त्रनिवेदनम् ॥

प्रभावे कथा (यथा) -

सोमराजो भ्रमन्नुर्व्यां, कौतुकानि विलोकयन् ।
मोचिता तेन मत्तेभाद्, राजकन्या स्तवस्मृतेः ॥१॥- अनु०

श्री'पाटली'पुरे सोमराजः कश्चिदुच्छिन्नगोत्रो राजपुत्रोऽभूत् । स क्षीणद्रविणत्वाद् देशान्तरं प्रत्यचालीत् । क्वापि श्रीवर्धमानसूरयो दृष्टा वन्दिताश्च । ते देशनामकार्षुरिति -

" **सर्वे वेदा न तत् कुर्युः, सर्वे यज्ञाश्च भारत !।**
सर्वे तीर्थाभिषेकाश्च, यत् कुर्यात् प्राणिनां दया ॥१॥ - अनुष्टुप्०
- (महाभारते शान्तिपर्वणि)

विउलं रज्जं रोगेहिं, वज्जिअं रूवमाउअं दीहम् ।
अन्नंपि तं न सुक्खं, जं जीवदयाइ न हु सज्झम् ॥२॥ - आर्या०

जिनेन्द्रपूजा गुरुपर्युपास्तिः सत्त्वानुकम्पा शुभपात्रदानम् ।
गुणानुरागः श्रुतिरागमस्य नृजन्मवृक्षस्य फलान्यमूनि ॥३॥"-उपजातिः०
- (सिन्दूरप्रकरे श्लो. ९३)

इति श्रुत्वा जिनधर्मरहस्यविदभूत् । नमस्कारमन्त्रं भक्तामरस्तोत्रं चापठत् । नित्यं पवित्रोऽस्मार्षीत् । धरणीं विचरन् 'हस्तिनाग' पुरं गतः

सोमराजः। तत्र राज्ञः पट्टहस्ती महदालानस्तम्भमुन्मूल्य श्रृङ्खलान् भङ्क्त्वा हस्तिपकान् दूरं विक्षिप्य रज्जुबन्धनानि त्रोटयित्वा हट्टस्तम्भानुत्पाटयन् वाजितिर्यगादीन् घ्नन् उपरिभ्रमत्पतत्रिष्वपि शुण्डामुल्लासलयन् मत्तो मर्यादामपालयन् पुरबहिर्भागमागतः । तत्र क्षणे मनोरमा नाम राजकन्या सखीभिः सह रन्तुमाराममागतवत्यासीत् । करी तं प्रदेशमसरत् । कुमारीसख्यो जीवग्राहं गृहीत्वा नेशुः । एकाकिनी कनी बिभ्यती तरलेक्षणा तस्थौ, पदमपि गन्तुं नाशक्नोत् । पुरगोपुरोपरिस्थेन नृपेणोक्तम् - भो लोकाः ! यो मत्कन्यारक्षां करोति तस्मै कन्यां राज्यांशं च दद्मीति। पूर्वं तरुतलोपविष्टेन श्रुतराजवचनेन सोमराजेन दृष्टः कन्यापार्श्ववर्ती च दन्ती । स जपन्नेव स्तवं लोलुभः कृपालुश्च कन्यां प्रत्यधावत्। कुमारीं कराभ्यां गाढं गृहीत्वा निर्भयभूभागेऽमुचत् । करिणं प्रत्यसरत् । स्तवचतुस्त्रिंशत्तमवृत्तस्मरणमात्रेण तुष्टाव चक्रेश्वरीसान्निध्याद्धस्तिनं वशीचकार। कन्या कटाक्षवीक्षितैस्तमीक्षांचक्रे, स मृगाङ्कमुखीं तां च । परस्परमनुरागो जातः । सोऽधिरुह्य गजमालानेऽबध्नात्। राज्ञा वैदेशिकोऽकुल्योऽयमिति किञ्चिद् दत्वा विसृष्टः । उक्तं न वेत्ति -

'' छिज्जउ सीसं अह होउ बन्धणं चयउ सव्वहा लच्छी ।
पडिवन्नपालणे स-प्पुरिसाण जं होइ तं होइ (उ) ॥१॥ - आर्या०
अलसायंतेणं वि स-ज्जणेण जे अक्खरा समुल्लविया ।
ते पत्थरटंकुक्की-रियव्व नो अन्नहा हुंति ॥२॥
जइ चलइ मन्दरो सु-सइ सायरो ल्हसइ सयलदिसिचक्कं ।
तहवि हु सप्पुरिसाणं, पयंपियं नन्नहा होइ ॥३॥''

इति नीतिवचः प्रसृतम्। कनी च तद्गुणान् स्मारं स्मारं (काम) दशाः प्राप। सख्योऽमिलन् । तिर्यक् शून्यं चक्षुः क्षिपन्ती तामूचुः-

अलसचलितैः स्नेहादार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखैर्लज्जालोलैर्निमेषपराङ्मुखैः ।

हृदयनिहितं भावाकूतं स्मरद्भिरिवेक्षणैः

कथय सुकृती कोऽयं मुग्धे ! त्वयाऽद्य विनिश्चितः ॥१॥- हरिणी

इत्युक्ता व्रीडावाङ्मुखी न किञ्चिदवक्। मन्दिरं नीता न भुङ्क्ते, न शेते, न स्नाति, न ताम्बूलमादत्ते, न लपतीति भूतग्रस्तामिव तां वीक्ष्य सख्यो राजानमवोचन् । राजा किं भूतेन पिशाचेन यक्षेण क्षेत्रपेण वा छलितेयमिति मन्त्रचिकित्सामचीकरत् । वैद्यप्रतीकारैरपि नोपचारो जातः। ततो डिण्डिमोद् घोषणां चक्रे- यः कन्यां सज्जीकरोति तस्मै तदीहितं दद्मीति । कन्याविरहदूनमनसा सोमराजेन पटहः स्पृष्टः । नीतो राजपार्श्वम् राज्ञा कन्याऽन्तःपुरम् । स ध्यानलीनां योगिनीमिव दवप्लुष्टां वल्लीमिव हिमक्लिष्टां पङ्कजिनीमिव राहुश्लिष्टां चन्द्रकलामिव वागुरापतितामेणीमिव पाशबद्धां राजहंसीमिव पञ्जरस्था राजशुकीमिव वारिगतां गजीमिव वियोगव्यथितवपुषं मनोरमामपश्यत्। कपटमान्त्रिकीभूय दोषनिग्रहाय योगिनीमण्डलममण्डयत्, ॐ हुं फट् स्वाहादीनि मन्त्रपदानि उदचरत्। रहः कृत्वा कामविह्वलं तस्या मनो मत्वा कन्यामलपत् कर्णे -

'' नालं यातुं न च स्थातुं, त्वद्रूपहृतचेतनः ।
कुर्वसत्यं नृपं सत्यं, वाक्यं देहि प्रसीद मे ॥१॥ - अनु०
दृष्टाश्चित्रेऽपि चेतांसि, हरन्ति हरिणीदृशः ।
किं पुनस्ताः स्मितस्मेर-विभ्रमभ्रमितेक्षणाः ॥२॥'' - अनु०

इति। त्वद्रूपमोहितः शून्यः पुरे भ्रमामीत्युक्ते सम्मुखी सत्रपा नृपात्मजाऽभूत् । तदुपलक्षणाद् द्विगुणदेहाऽजनि वसनेनावगुण्ठनमकरोत्। अपाङ्गरिङ्गच्चङ्गतारा रोमाञ्चकञ्चुकसारा तदङ्गं प्रविविक्षुरिवोत्काऽभवत्। इह भवे त्वदृतेऽपरः पुमान् मे सोदर इत्युक्तस्तया सः। राजाऽप्याहूतः । दृष्टा नीरुग्देहा कुमारी भूपालेन। कलाकलितकुल्यतया तस्मै दत्ता दुहिता, हृष्टा स्वयंवरा सोमराजश्च। कारितः पाणिपीडनमहामहः।

अर्पितं नव्यं सौधम् । समग्रा वसनाद्यशनशयनीयताम्बूलसामग्री सज्जिता। दत्तं प्रतिपन्नं राज्यांशमात्रम् । स च सा च नव्यनव्यसङ्गमेन सातातिरेकमापतुः । उक्तं च -

"दवदड्ढा खड पल्लवइं, जिम वुड्ढे(ड्ढे)ण घणेण।
विरहपलित्तमणो रहइं, तिम दिट्ठेण पिएण ॥१॥"

किञ्च-

"अध्वक्लान्ततनुर्नवज्वरवती नृत्यश्लथाङ्गी तथा
मासैकप्रसवा ददाति सुरते षण्मासगर्भा सुखम् ।
विख्याता विरहस्य सङ्गमवती क्रुद्धा प्रसन्ना ऋतु-
स्नाने नूतनसङ्गमे मधुमदे रागास्पदं योषितः ॥१॥" - शार्दुल०

भृशं कोविदा च सा । उक्तं च -

" विदग्धवनितापाङ्ग-सङ्गमेनापि यत् सुखम् ।
क्व तत् प्राकृतनारीणां, गाढालिङ्गनचुम्बनैः? ॥१॥"

एवं तया साकं विषयाननुभवतोऽपि भक्तामरस्तवजापे धर्मकरणे गुरुवचःश्रवणेऽपि महानादरस्तस्य । उक्तं च-

"यूनो वैदग्ध्यवतः, कान्तासहितस्य कामिनोऽपि भृशम्।
किन्नरगेयश्रवणा - दधिको धर्मश्रुतौ रागः ॥१॥" - आर्या

इति धर्ममन्तरान्तरा चकार। क्रमेण राज्यसुखभागभूत् सोमराजो राजा परमजैनः ॥

॥ इत्येकविंशी कथा ॥

* * *

अथ सिंहभयं क्षिपति - भिन्नेभेत्यादि

हे पुरुषसिंह ! हरिणाधिपोऽपि-सिंहोऽपि क्रमगतं-फालप्राप्तं ते-तव क्रमयुगाचलसंश्रितं - चरणयुग्मपर्वतकृतावासं पुरुषं न आक्रमति-न ग्रहणाय उद्यतते - न हन्तुमुद्धावति। किंभूतो हरिणाधिपः? भिन्नाभ्यां-

विदारिताभ्यां इभकुम्भाभ्यां-हस्तिशिरः- पिण्डाभ्यां गलता - पतता उज्ज्वलेन-रक्तश्वेतवर्णेन शोणिताक्तेन-रुधिरव्याप्तेन मुक्ताफलप्रकरेण - मौक्तिकसमूहेन भूषितो-मण्डितो भूमिभागो येन सः । एतेन भद्रद्विपहन्तृत्वान्महाविक्रमसूचा। बद्धः क्रमः-परिकरो येन स बद्धक्रमः, त्वदाश्रयणाद् बद्धः-कीलितः क्रमः-पराक्रमो यस्य स वा बद्धाः-नद्धाः क्रमाः - पादविक्षेपा यस्य स इति वृत्तार्थः ॥३५॥

माहात्म्ये कथा -

देवराजो महाटव्यां, मृगराजभयाकुलान् ।
सार्थिकान् पालयामास, स्तवाष्टापदजापतः ॥१॥ - अनु०

'श्री' पुरे देवराजो नाम महाश्रावको दुर्गतो भक्तामरस्याध्यापकोऽभूत् ।

"पूया जिणंदेसु रई वएसु जत्तो य सामाइयपोसहेसु ।
दाणं सुपत्ते भमणं सुतित्थे सुसाहुसेवा सिवलोयमग्गो ॥१॥" - उप०

इति गुरूपदिष्टं धर्मं साधयति स्म। स धनोपार्जनाय सार्थिकैः सह 'साकेत' पुरमचलत् । क्रमेण सिंहशार्दूलभयङ्करीं व्याघ्रव्यालचित्रकरौद्रीं भ्रमद्भिल्लमालां शून्यदीर्घमालां (?) विषमविषधराधिष्ठितां वनानीमध्युवास सार्थः । तत्र पवित्रतरुतले सरिज्जले स्नात्वा यावद् देवराजः स्तवं सस्मार तावत् तडित्तुल्यजाज्वल्यमानपिङ्गनेत्रदंष्ट्राकरालवक्त्रं तीक्ष्णतरनखरं दीर्घलाङ्गूलास्फालनध्वनितभूधरकन्दरं तत्क्षणहतकुम्भिकुम्भस्थलनिःसृतरक्तमुक्ताफलच्छुरितभूतलं गुरुबुक्कक्वणं केसरिणं सार्थजनो ददर्श । भयद्रुताः सर्वे देवराजस्थानप्रदेशमागताः । स पञ्चत्रिंशद्वृत्तस्मृतितुष्टचक्राप्रसादादस्तभ्नात् सिंहम् । हिंस्रोऽपि कृपालुः क्रोधनोऽपि क्षमी जातो [१]हर्यक्षो विलक्षः क्रमचङ्क्रमणाक्षमः । रञ्जिताः सार्थिका ददृशुः शान्तं पारीन्द्रम् । मृगराजोऽपि स्तुतिस्मृतिभाजं देवराजं नत्वा तदग्रे मौक्तिकत्रयं नखरेभ्यः प्रक्षिप्य यथास्थानमगमत् । सर्वे तुष्टुवुस्तन्मन्त्रमहिमानम् ।

१ सिंहः ।

स प्रथमजिनस्तवप्रभावमवर्णयत् । सार्थिकेभ्यो धर्मोपदेशं दत्तवांश्च । यथा-

'' विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरति (रुचि) र्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ।।१।।

- द्रुतविल०

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम् ।
भक्तिश्चार्हति शक्तिरात्मदमने संसर्गमुक्तिः खले
यत्रैते निवसन्ति निर्मलगुणाः श्लाघ्यास्त एव क्षितौ ।।२।।'' शार्दुल०

इति श्रुत्वा सर्वे जिनधर्मभाजो जाताः । देवराजं गुरुमिवामंसत । क्रमेण 'साकेत'- पुरं प्राप। [1]रासोद्भवविक्रयाद् धनर्द्धिः । धर्मोदयात् सम्पन्नं सर्वम् । उक्तं च -

''राज्यं च सम्पदो भोगाः, कुले जन्म सुरूपता ।
पाण्डित्यमायुरारोग्यं, धर्मस्यैतत् फलं विदुः ।।३।।''

पुनः 'श्री' पुरमागत्य श्रीविलासमकरोद् देवराजो धनी ।।

।। इति द्वाविंशी कथा ।।

* * *

अथ दावानलभयं निरस्यति - कल्पान्तेत्यादि

हे कर्मक्षयकृशानो ! त्वन्नामकीर्तनजलं-त्वदभिधानस्तवनघननीरम् अशेषंवज्राग्निविद्युत्प्रदीपनादिभेदात् सकलं दावानलं-वनवह्निं शमयति-विनाशयति । किंभूतं दावानलम् ? कल्पान्तकालपवनेन-युगान्तसमयवातेन उद्धतः-उत्कटो यो वह्निः- अग्निस्तेन कल्पं-समं कल्पान्तवातेन उद्धतः - प्रेरितो-विस्तारितो यो वह्निस्तत्कल्पं वा, ज्वलितं-दीप्तं, उज्ज्वलं-ज्वालारक्तं, उत्स्फुलिङ्गं-उल्ललद्वह्निकणं, विश्वं जिघत्सुमिव-जगज्जिग्रसिषुमिव सम्मुखमापतन्तं-अभिमुखमायान्तम् अशेषं - सामस्त्येन, सर्वदिग्व्यापकं वा । त्वन्नामस्मरणनीरं दावानलं स्फेटयतीत्यर्थः। इति वृत्तार्थः ।।३६।।

१ रसोद्भवं मौक्तिकम् ।

प्रभावे कथा (ग्रन्थाग्रं १२००) -

तृणवृक्षलताकीर्णे, कान्तारे जातवेदसम् ।
ज्वलन्तमरुधल्लक्ष्मी-धरः सार्थशिरोमणिः ॥१॥

'प्रतिष्ठान' पुरे लक्ष्मीविलासलालसो लक्ष्मीवान् लक्ष्मीधरो नाम सार्थवाहोऽवात्सीत् । स भक्तामरस्तवमधीत्य ध्यायति स्म । सोऽन्यदा -

''या श्रीः सरोरुहाम्भोधि-विष्णुवक्षसि सा श्रुतिः ।
या पुनर्व्यवसायाब्धौ, लक्ष्मीः साऽध्यक्षमीक्षते ॥''

इति विचिन्त्य वृषभ-करभ-वेसर-खर-महिष-शकटाद्यूह्यमानागण्यपण्यपूर्णं सार्थं कृत्वा वणिज्यायै पूर्वां दिशमगच्छत् । तदा भीष्मग्रीष्मर्तुः कलिरूपः प्रावार्तिष्ट । उक्तं च -

'' विधत्ते यत् तोषं [१]जडपरिचितौ [२]गोपतिकराः
कटोरा जायन्ते कथमपि न तृष्णा विरमति ।
मुदे [३]दोषारम्भो भवति भुवि [४]वैरस्य घटना
तदेष ग्रीष्मर्तुः किमु नुकलिकालं तुलयति? ॥१॥'' - शिखरिणी

तत्रर्तौ निरन्तरसर्जार्जुनवञ्जुलवरणवटतालतमालहिन्तालनागसागपुन्नागशिंशपशमीवंशजालरुद्धां रौहिषार्जुनग्रन्थिकमुस्तानलग्रामणीकाशमञ्जुमुञ्जास्तम्बादितृणच्छन्नां वनानीमध्युवास सार्थः । सार्थवाहः पवित्रीभूय स्तवमजपत् । अत्रान्तरे ज्वालामालाकरालो दन्दह्यमानवंशशोश्रूयमाणत्राट्काराखो महादवः पूर्वं पूर्वस्यामुत्थितः क्षणेन दक्षिणामरौत्सीत् । वारुणीं कीलाभिररुणामकरोत् । कौबेरीं सार्थिनां वैरिणीं निरमापयत्। एवं वंशघर्षणभवे दवे प्रसर्पति त्रस्ताः सार्थजनाः । वस्तुरक्षा दूरे, जीविताशाऽपि मुक्ता । पदमपि न नंष्टुमलं लक्ष्मीधरसविधमागत्य तच्छरणं प्रपन्नाः । उक्तं च -

---

१. जडानां-मूर्खाणां परिचितौ-परिचये; पक्षे जलपरिचितौ, डलयोः सावर्ण्यात्। २. गोपतीनां-राज्ञां कराः - राजस्वानि; पक्षे सूर्यकिरणानि। ३. दोषाणां-अपराधानां आरम्भः -प्रारम्भः; पक्षे दोषायाः-निशाया आरम्भः । ४. वैरस्य-शत्रुभावस्य घटना; पक्षे विरसस्य-निर्जलस्य भावो वैरस्यं तस्य घटना।

"आर्त्ता देवान् नमस्यन्ति, तपः कुर्वन्ति रोगिणः ।
निर्धना विनयं यान्ति, वृद्धा नारी पतिव्रता ।।१।।" - अनु०

लक्ष्मीधरध्यानतः स्तवषट्त्रिंशद्वृत्ताविर्भूतचक्राकथितैतद्वृत्ताभिमन्त्रितपाथः-सेकादेव दवानलः शशाम, नाचक्राम सार्थसीमाम्, जगाम स्वप्नतुलाम्। सर्वेऽपि कुशलिनो विस्मिताः पप्रच्छुः। स युगादिदेवस्तवं नुनाव जिनधर्ममाहात्म्यं च । उक्तं च -

"आधिव्याधिविरोधादि, सर्वं बाधानिबन्धनम् ।
विध्यायत्याशु धर्मेण, घनेनेव दवानलः ।।१।।" - अनु०

सार्थलोकोऽप्युत्तमसेवितत्वाद् दृष्टप्रत्ययत्वाच्च जिनधर्ममादृतवान् हिरण्य-मुपार्ज्य लक्ष्मीधरः स्वपुरमासरत्। कदाचित् पुरे उत्थितं वज्राग्नि दुःशमं स्तववृत्तजप्ताम्भःसेचनादुपाशीशमत् सार्थेशः । रञ्जितो नितरां तन्नग-रीयो राजा श्रीजिनेन्द्रं देवममन्यत लक्ष्मीधरं धार्मिकशेखरं बहु मेने। इत्थं जिनशासनं प्रभावयन् सर्वसुखकीर्तिभाजनमजनि लक्ष्मीधरः ।।

।। इति त्रयोविंशी कथा ।।

* * *

अथ भुजङ्गभयं दलयन्नाह - रक्तेक्षणमित्यादि

हे नागपतिसेव्य! यस्य पुंसो हृदि त्वन्नामनागदमनी स्यात्। त्वन्नामैव नागदमनी-ओषधिविशेषो जाङ्गुलीविद्या वा। कोऽर्थः? यः पुरुषः स्त्री वा त्वन्नाममन्त्रं चित्ते धत्तेसदेत्यर्थः। स निरस्तशङ्को-निर्भयः क्रमयुगेन-निजपदद्वन्द्वेन फणिनं-सर्पमाक्रामति-घर्षति रज्जुवत् स्पृशतीति। क्रमयुगग्रहणेन विशेषं द्योतयति । सामान्योऽपि सर्पः पादाहतः कुप्यति । दुष्टविषधरस्य का वार्ता? अथ पदोपलक्षणात् हस्तशरीराभ्यां घृष्टोऽपि न कोपवान् स्यात्। किंभूतम्? रक्तेक्षणं-ताम्रनेत्रं समदकोकिलकण्ठनीलं-मत्तपिककगलकालं क्रोधोद्धतं-कोपोत्कटं-ईर्ष्यादुर्दान्तं उत्फणं-ऊर्ध्वीकृतफटं आपतन्तं-सम्मुखं धावन्तम् ।। इति वृत्तार्थः ।।३७।।

'भूत्या'। केचित् तु पूर्वान्वये हे भुवनभूषणभूत ! हे नाथ ! इत्यामन्त्राणाभ्यामन्वयं कुर्वन्ति, तत्र भूतशब्द उपमार्थे वाच्यः।।

अथ समासा :- अति-अत्यन्तं-अतिक्रान्तं अद्भुतं अत्यद्भुतम्। *'अतिरतिक्रमे' इति सिद्धहेम (अ. ३, पा. १, सू. ४५) सूत्रात् तत्पुरुषसमासः।* भुवनस्य भूषणं भुवनभूषणं, तत्सम्बोधनं क्रियते हे भुवनभूषण !। भूतानां नाथः भूतनाथः, तत्सम्बोधनं हे भूतनाथ !। *प्राणिनां पालकत्वात्।* आत्मनः समः आत्मसमस्तं आत्मसमम्।। *इति दशमकाव्यार्थः ।। १० ।।*

અર્થ : હે ભુવન ભૂષણ ! હે ભૂતનાથ ! પૃથ્વી ઉપર સદ્‌ભુત ગુણો વડે આપને સ્તવનાર આપની તુલ્ય થાય છે (તેમાં) આશ્ચર્ય નથી. અથવા નિશ્ચે અહિં જે (સ્વામી) આશ્રિતને સંપત્તિવડે પોતાની સમાન નથી કરતો? તેના વડે (તેવા સ્વામી વડે) શું?

❋ ❋ ❋

अथ आस्तां स्तवनं, किन्तु त्वद्दर्शनमपि मनोहरमित्याह -

दृष्ट्वा भवन्तमनिमेषविलोकनीयं
नान्यत्र तोषमुपयाति जनस्य चक्षुः।
पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः
क्षारं जलं जलनिधे रसितुं क इच्छेत्? ।।११।।

दण्डान्वयः - अनिमेषविलोकनीयम् भवन्तम् दृष्ट्वा जनस्य चक्षुः अन्यत्र तोषम् न उपयाति, दुग्धसिन्धोः शशिकरद्युति पयः पीत्वा कः जलनिधेः क्षारम् जलम् रसितुम् इच्छेत्?.।

हे नाथ ! जनस्य चक्षुः अन्यत्र तोषं न उपयातीत्यन्वयः। 'उपयाति' इति क्रियापदम्। किं कर्तृ? 'चक्षुः', कस्य? 'जनस्य'। कं कर्मतापन्नम्? 'तोषं' सन्तोषं तृप्तिमित्यर्थः। कुत्र? 'अन्यत्र' अन्यस्थाने। कथम्? 'न'। किं कृत्वा? 'भवन्तं दृष्ट्वा' (त्वां) विलोक्य। त्वद्दर्शनाल्लब्धरसं जननयनं नार्थान्तरेषु रतिं लभते इति भावः।

प्रभावे कथा -

'नर्मदा' तटवास्तव्य - श्रेष्ठिपुत्री दृढव्रता ।

पुष्पस्रजमिवोग्राहि - मग्रहीत् करपङ्कजे ।।१।। - अनु०

श्री 'नर्मदा' नदीतटे 'नर्मद' पुरे पुरश्रेष्ठी महेभ्यो नाम यथार्थनामा । तत्सुता कलागुणपूर्णा द्वैधमपि दृढव्रता भक्तामरस्तवं शुद्धमबुध्यत सा । अन्येद्युस्तत्र पुरे वणिज्यायै दशपुरान्माहेश्वरः कर्मणो नामागमत् । कर्मणस्य महेभ्येन सह मैत्री जाता । श्रेष्ठिना स्वगृहे न्यमन्त्रि । कर्मणेन भुञ्जानेन श्रेष्ठिसुता दृष्टा । गाढानुरागोऽभूत् । कपटश्रावकीभूय कन्यार्थं धनाशनवसनदानादिना श्रावका मित्राणि कृतानि तेन । उक्तं च-

'' **क्रतौ विवाहे व्यसने रिपुक्षये प्रियासु नारीष्वधनेषु बन्धुषु ।**
यशस्करे कर्मणि मित्रसङ्ग्रहे धनव्ययोऽष्टासु न गण्यते बुधैः ।।१।।'' - वंशस्थम्०

मित्रैर्महेभ्याभ्यर्णे स श्लाघितः । कन्या च याचिता श्रेष्ठिना ।

'' **कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुर्वयश्च ।**
एतानि सप्त प्रविलोक्य देया ततः परं भाग्यवशा हि कन्या ।।१।।'' - उप०

इति विचार्य वर्या दिक्करी तस्मै दत्ता । परिणीय स्वपुरमागमद् गृहिणीयुक् कर्मणः । गृहागतो जलवत् स्वधर्मं शिश्राय । श्वपुच्छवद् वक्रतां नाहासीत् । सा सुश्राविका निशि न भुङ्क्ते, अन्यदेवान् न वन्दते, अनन्तकायाद्यभक्ष्यं नाश्नाति। श्वशुरवर्गो मिथ्यादृक् । प्रिये ! स्वकुलोचितं धर्मं कुरु, स्त्रियः पतिवर्त्मगा भान्ति इत्युक्ताऽपि पत्या सा धर्मं नात्यजत् । कर्मणो भिन्नधर्मेयमिति द्वितीयां पर्यणैषीत् । वारकेण द्वयोः करे भुङ्क्ते । दृढव्रता निशाशनं न दत्ते । तं याचन्तं ब्रूते - कान्त! रात्रिभोजने महान् दोषः । उक्तं च -

'' **उलूककाकमार्जार-गृध्रशम्बरशूकराः ।**
अहिवृश्चिकगोधाश्च, जायन्ते रात्रिभोजनात् ।।१।।''- अनु०

इत्युक्तोऽपि नाबुध्यत । दुस्त्यजो दर्शनरागः । उक्तं च -

''कामरागस्नेहरागा-वीषत्करनिवारणौ ।

दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपि ॥१॥''- अनु०

- (वीतरागस्तोत्रे, प्र० ६, श्लो० १०)

माहेश्वरी पतिं प्रतारयति स्म। एषा भिन्नधर्मा दुराचारैव भासते। स्वदेवगुरुनमनबुद्ध्या क्वापि प्रयाति । कार्मणं वा कारयति न वेद्मि । परं त्वां कलङ्कयिष्यति । यदुचितं तत् कुरु । कर्मणः कार्मणकलङ्कभिया दृढव्रतामृतये [1]कृष्णकुम्भीनसं कुम्भे क्षिप्त्वा तद्गृहान्तः प्रच्छन्नमतिष्ठिपत्। प्रातस्तद्गृहमागात् । सा भक्तामरस्तवं गुणन्त्यासीत् । पीठादुत्थिता। तेनोक्तम्-मध्ये घटान्तर्मणिमालाऽस्ति तामानय। सा सप्तत्रिंशं वृत्तं स्मरन्ती गृहान्तरगमत्। घटे करं चिक्षिप्य रज्जुमिव स्रजमिव स्तवोक्तस्वरूपं सरीसृपं निःशङ्का चक्राम । लात्वा पतिपाणौ ददाना दूरादेव तेनोक्तम्- सत्यशीले ! दूरे मुञ्च सर्पम्। मुक्तस्तया। मिलितः श्वशुरपक्षः। सपत्न्यपि स्तम्भितं क्षमाशीलं कृष्णोरगं विलोक्य एषा सर्पस्तम्भविद्याविदिति मेने। तत्रान्तरिक्षवागुदच्छलत्- रे रे पापाः ! किं चिन्तयत? इयं दृढव्रता पतिव्रता लोकद्वयहितं धर्ममाराधयति। एतद्धर्मप्रभावादेव भुजङ्गस्तम्भः। योऽस्या विरुपं करिष्यति स स्वपापेनैव गलिष्यति योऽस्या वाक्यं चाचरिष्यति स सर्वसुखभाजनं भविष्यति। इत्युक्त्वा तिरोहिता चक्रा । सर्वे पादयोः पेतुः । ततो धर्मं शुश्रुवुः, यथा -

''देवो जिनः सद्गुरुरेव सेव्यो धर्मो विधेयः करुणाप्रधानः ।

द्वाविंशतिं नैव कदाप्यभक्ष्य-वस्तूनि भक्ष्याणि किमत्र लक्ष्म ॥१॥''-इन्द्र०

षट्कर्मरताः श्राद्धा ब्राह्मणा एव । उक्तं च-

''देवपूजा गुरुपास्तिः, स्वाध्यायः संयमस्तपः ।

दानं चेति गृहस्थानां, षट् कर्माणि दिने दिने ॥१॥'' - अनु०

---

१ श्यामसर्पम् ।

शुचितया कर्माणि कुर्वते । उक्तं च -

" सत्यं शौचं तपः शौचं, शौचमिन्द्रियनिग्रहः ।

सर्वभूतदया शौचं, जलशौचं तु पञ्चमम् ॥२॥"- अनु०

श्रावकगृहिण्यः पञ्चसु यतनां कुर्वते । उक्तं च -

"खण्डनी पेषणी चुल्ली, जलकुम्भः प्रमार्जनी ।

पञ्चसूना गृहस्थस्य, तेन स्वर्गं न गच्छति ॥३॥" - अनु०

ज्ञातैतद्धर्मतत्त्वा जैनधर्मं प्रपन्नाः । सपत्न्यपि चरणयोरपतत् । तां क्षमयामास धर्ममङ्गीचकार । एवं प्रभावयामास दृढव्रता जिनशासनमिति।

॥ इति चतुर्विंशी कथा ॥

* * *

अथ रणातङ्कं हरन्नाह - वल्गेत्यादि, कुन्ताग्रेत्यादि

हे देवाधिदेव ! त्वत्कीर्तनात्-त्वन्नामग्रहणादाजौ-सङ्ग्रामे बलवतामपि शक्तानामपि भूपतीनां-राज्ञां बलं-सैन्यं शौर्यं वा भिदामुपैति-स्फुटनमायाति। किंभूतम्? वल्गतां-धावतां तुरङ्गाणां-गजानां च गर्जितानि भीमनादा-घोरवीरसिंहनादाश्च यत्र तत्। अथ (वा) क्रियाविशेषणमेतत् सङ्ग्रामस्य(?) किमिव? तम इव। यथा उद्यद्दिवाकरमयूखशिखापविद्धं-उद्गच्छत्सूरकरततिप्रेरितं-सूर्यकरक्षिप्तं तमः-अन्धकारं भेदं याति प्रलयं प्रयाति तद्वदित्यर्थः। इति वृत्तार्थः ॥३८॥

* * *

किञ्च -

हे जिनेश्वर ! त्वत्पादपङ्कजवनाश्रयिणः-त्वत्पदपद्मषण्डभाजो जना युद्धे रणे जयं-विजयं लभन्ते - प्राप्नुवन्ति । किंभूते युद्धे? कुन्ताग्रैः-भल्लाग्रैर्भिन्नानां-पाटितानां गजानां शोणितं-रक्तमेव वारिवाहो-जलप्रवाहः तस्मिन् वेगावतारात्-शीघ्रप्रवेशात् तरणे-प्लवने आतुरैः-व्याकुलै-

योधैः-भटैः भीमं-भयानकं तस्मिन् । किंभूता जनाः? विजितः - पराभूतो दुर्जयः - अजेयो जेयपक्षो-जेतव्यगणो यैस्ते । इति वृत्तार्थः ।।३९।।

अत्र प्रभावे कथा -

रणकेतोर्बलं भग्नं, राजसूगुणवर्मणा ।
एकाकिना महास्तोत्र-प्रभावादेव कानने ।।१।। - अनु०

'मथुरायां' पुरि रणविजयलब्धकेतुः श्रीरणकेतुर्नृपः । तस्य लघुबन्धुर्गुणवर्मा । स जिनधर्मरक्तो दुष्टपाखण्डिविरक्तो भक्तामरस्तवजापासक्तो दाता भोक्ता महोत्कटः करटिबलनिराकरिष्णुः प्रथितः ।।

अथ रणकेतुराजा पट्टदेव्याऽभाणि-देव ! अयं गुणवर्मा तादृग् दृश्यते श्रूयते च बन्दिवृन्दनन्दितामन्दकीर्तिः सर्वजनप्रियः पुरान्तर्विलसति । यथा स्तोकैरेव दिनैः राज्यं वशीकृत्य हरिष्यति । राज्यहारी बन्धुरपि रिपुः । उक्तं च-

''तुल्यार्थं तुल्यसामर्थ्यं, मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं मित्रं, यो न हन्यात् स हन्यते ।।१।।'' - अनु०

राजोवाच देवि ! सोदरे कथं विरूपं करोमि? दुर्लभो भ्राता । उक्तं च

''देशे देशे कलत्राणि, देशे देशे च सूनवः ।
तं देशं नैव पश्यामि, यत्र भ्राता सहोदरः ।।१।।''

देव्योचे-रिपुरूपे का सौंदर्यबुद्धिः ?। अस्मिन् सति त्वत्पुत्राणां क्व राज्यम्? त्वत्पुरतस्तवान्वये राज्यं गतम् । तव नामापि कश्चिन्न ग्रहीता । अथ सोदरत्वान्न हंसि, तर्हि राज्यादेककं निःसारयेत्युक्ते मन्दीभूतो बन्धुस्नेहः । उक्तं च -

''तावद् बन्धुमनोभूमौ, रम्या स्नेहवनावली ।
यावन्न ज्वलति स्त्रीणां, विश्लेषवचनानलः ।।१।।'' - अनु०

आहूय सेनान्यमवग् राजा-भद्र ! गुणवर्मणे देशत्यागं ब्रूहि। तेन गत्वा उक्तो राजादेशः । कुमारोऽशुभस्य कालहरणं न विक्रमावसर इत्यादि विमृश्य निरगान्नगरात्। तदा तस्य निःसरणक्षणे वर्षर्तुरवर्तत । राज्ञीवचोवृत्तिभिरिवान्धकारितं सर्वदिग्भिः । दुर्जनमनोभिरिव गर्जितं जलधरैः ।

राजदु:प्रीत्येव क्षणदृश्यया लसितं चपलया । सुजनाश्रुतत्येव जृम्भितमासारधाराधोरण्या। भूपप्रतापैरिव नष्टं सूकरैः (ग्रन्थाग्रं १३००) । रणकेतुकीर्तिपूरैरिवान्तर्हितं चन्द्रांशुभिः। पापपाखण्डिभिरिव ताण्डवितं शिखण्डिभिः । तास्तृणवल्लीकन्दमूललताङ्कुरवर्धिन्यो नदीनदसरस्सु वारिविस्तारिण्यो वर्षाः कलिमनुचक्रुः । उक्तं च -

''सर्वत्रोद्गतकन्दला[१] वसुमती [२]वृद्धिर्जडानां परा
जातं [३]निष्कमलं जगत् सुमलिनैर्लब्धा धनैरुन्नतिः ।
सर्पन्ति प्रतिमन्दिरं [४]द्विरसनाः संत्यक्तमार्गो जनो
वर्षाणां च कलेश्च सम्प्रति जयत्येकैव राज्यस्थितिः ॥१॥''शार्दुल०

स वनं भ्रमन् स्वस्य मनोवत् तुङ्गं दानवद् विशालं कृत्यवत् सफलं भाववन्निर्झरजलार्द्रं भूधरमारूढः । तत्र कन्दरायां कन्दफलाशनः षट्त्रिंशच्छास्त्राभ्यासी स्तवं पञ्चपरमेष्ठिमन्त्रं च स्मरन्नस्थात्। एकोनचत्वारिंशद्वृत्तजापक्षणे प्रकटीभूयाप्रतिचक्रा वरमदात् तस्मै। स प्राज्यमजय्यं राज्यमयाचत। देव्या राज्यवरो दत्तोऽजेयश्च कृतः। देवी तिरोधाच्च । अथ तस्य धर्मवन्निर्मलश्चन्द्रमरीचिभिः कीर्तिवत् कुवलयानन्दनः शुभभाग्यवत् सफलितभूतलः स्वान्तवृत्तिवद् विजयदशमीबलिराजादिपर्वभिः कृतसज्जनहर्षकुतूहलः कृतसप्तच्छदविकाशनः कमलवनप्रबोधनः काशपुष्पप्रकाशनः पाकितसर्वव्रीहितृणवल्लीप्रतानः [५]समागच्छच्छरत्समयः कलिप्रतिच्छायः। उक्तं च-

''[१]नक्षत्राण्यमलानि सम्प्रति जनो यात्येव मार्गस्थितः
सञ्जाताश्च [२]जडाशयाः [३]सकमला [४]दोषाकरः सप्रभः ।
[५]सन्तापाय तथेनमण्डलमलं[६] लोकस्य तीव्रैः करैः
संवृत्तः किमयं कलिः किमु शरत्कालो न विज्ञायते?॥१॥'' शार्दूल०

तत्रर्तौ रणकेतुराजा देशसाधनाय सर्वबलेन निरगात्। गिरिकान्तारे उत्कटकर्माणं शस्त्राभ्यासं कुर्वाणं गुणवर्माणं वीक्ष्य हननायादिदेश

१ कन्दलः=(१) नवाङ्कुरः; (२) तिरस्कारः; कन्दलः=बाहुयुद्धम् । २ डलयोः सावर्ण्यात् जलानां - वारीणाम् । ३ निर्धनम् । ४सर्पाः; दुर्जनाः । ५ समागात्

सैन्यम्। एको वने रुद्धः सैन्येन सिंहो मृगयूथेनेव। लग्नमायोधनं शस्त्राशस्त्रि खड्गाखड्गि शराशरि दण्डादण्डि। क्षणेन हतप्रतिहतं सैन्यं चक्रे कुमारेण तमोवृन्दं भास्वतेव। ततो रणकेतुरुत्थितो रणाय । कुमारेण चक्रावरप्रसादाद् राजाऽपि समपास्तसमस्तशस्त्रच्छत्रकेतुः कृतो रथात् पातितश्च । वनदेवताभिर्जयरवपुरःसरं गुणवर्मशिरसि कुसुमवृष्टिः कृता। कुलीनताङ्कुशप्रेरितो नम्रोऽतिष्ठत् कुमारः । उक्तं च -

''नमन्ति सफला वृक्षा, नमन्ति कुलजा नराः ।
शुष्कं काष्ठं च मूर्खाश्च, भज्ज्यन्ते न नमन्ति च ॥१॥''- अनु०

''साली भरेण तोये-ण, जलहरा फलभरेण तरुसिहरा ।
विणएण य सप्पुरिसा, नमन्ति न हु कस्सइ भएण ॥२॥''

विलक्षो लज्जितोऽभवद् राजा, विरक्तमनाः स्वचेतसि चिन्तयामास-

''अर्थं धिगस्तु बहुवैरकरं नराणां राज्यं धिगस्तु सततं बहुशङ्कनीयम् ।
रूपं धिगस्तु नियतं परिहीयमानं देहं धिगस्तु परिपुष्टमपि व्रणाशि ॥१॥''-वसन्त०

अथ च -

''अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया
वियोगे को भेदस्त्यजति न जनो यत् स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्तास्त्वेते शमसुखमनन्तं विदधति ॥१॥'' - शिखरिणी

तथा यद्यहं पूर्वं स्त्रीवचसि नालगिष्यं, तदा रणे मानक्षतिं नाप्स्यम्। धिक् स्त्रीजातीयाः स्वार्थरताः अनर्थसार्थे क्षिपन्ति पुरुषम्। पुमानपि तदासक्तोऽचेतनो भवति । उक्तं च -

''तावदेव पुरुषः सचेतन- स्तावदाकलयति क्रमाक्रमौ ।

---

१ पक्षे न इति पृथक् पदं ज्ञेयम् । २ डलयोः सावर्ण्यात् जलाशयाः-सरोवराणि। ३ कमलैर्युक्तानि, पक्षे सश्रीका-धनिकाः ।४ दोषाणां-अपराधानां आकरः-समूहो यस्मिन् स दोषाकरः, दोषां-रात्रिं करोतीति दोषाकरः-चन्द्रः । ५ क्लेशाय; अतीव धर्माय । ६ राजमण्डलं; सूर्यमण्डलम् ।

यावदेव न कुरङ्गचक्षुषां ताड्यते चपललोचनाञ्चलैः ॥१॥''- रथोद्धता

अथ

''संपीड्येवाहिदंष्ट्राग्नि-यमजिह्वाविषाङ्कुरान् ।
जगज्जिघत्सुना नार्यः, कृताः क्रूरेण वेधसा ॥२॥- अनु०
संसार ! तव पर्यन्त-पदवी न दवीयसी ।
अन्तरा दुस्तरा न स्यु-र्यदि रे मदिरेक्षणाः ॥३॥'' - अनु०

इत्यादि संचिन्त्य राज्ञा सामन्तैः सह पर्यालोच्य सज्जितो राज्याभिषेकविधिः। गुणवर्माणं सिंहासनेऽधिरोप्य तीर्थजलैरभ्यषिञ्चन्नरेन्द्रः। स्वयं वने जटाधारी जातः। स राजा 'मथुरायां' समेतः भ्रातृव्यादीनां राज्यविभागं दत्त्वा एकातपत्रं राज्यं निष्कण्टकं राज्यसुखमद्वैतमभजत्। निरन्तरगुरूपदेशश्रवणतीर्थयात्राकरणपरोपकारनिर्माणादिभिर्मनुष्यफलं जग्राह। जिनधर्मं प्रभावयामास। पर्वतिथिषु प्रभूतदुरितखण्डनानि निरतिचाराणि सामायिकपौषधादिकव्रतानि पालयामास श्रीयुगादिजिनादिप्रासादानचीकरद् गुणवर्मा जैननरेन्द्रः ॥

॥ इति पञ्चविंशी कथा ॥

* * *

अथ जलापदं प्रशमयन्नाह - अम्भोनिधावित्यादि

हे भववार्धिपोत ! अम्भोनिधौ-समुद्रे एवंविधे सति सांयात्रिका जना भवतः स्मरणात् त्रासम्-आकस्मिकं भयं विहाय-त्यक्त्वा व्रजन्ति-क्षेमेण स्वस्थानं यान्ति। किंभूते? क्षुभितानि-क्षोभं गतानि भीषणानि-रौद्राणि नक्रचक्राणि च पाठीनाश्च पीठाश्च भयदो-भीकृदुल्बणः-प्रकटो वाडवाग्निश्च यत्र स तथा तस्मिन्। किंभूता जनाः? रङ्गत्तरङ्गशिखरस्थितयानपात्राः-उच्छलत्कल्लोलाग्रवर्तिवाहनाः। नक्रचक्रं-दुष्टजलजन्तुवृन्दम्। पाठीनपीठौ-मत्स्यभेदौ। वडवाग्निः-वडवानलः। इति वृत्तार्थः ॥४०॥

प्रभावोदाहरणं यथा -

'तामलिप्ती' पुरीवासी, धनावहवणिग्वरः ।
क्षुब्धेऽब्धौ देवतातुष्ट्या, श्रेयसा पुरमीयिवान् ॥१॥ - अनु०

धनकनकवसनरत्नसपत्नीकृतालकायां नन्दनवनासहनीभूतारामाभिरामायां देवीरूपसरूपनागरिकरामायां श्रीसञ्चयमालिन्यां 'तामलिप्त्यां' पुरि बहुधनो धनावहनामा श्रेष्ठी। सोऽन्यदा श्रीजिनेश्वरसूरिदेशनामशृणोन्मसृणमनाः । यथा -

''वन्द्यास्तीर्थकृतः सुरेन्द्रमहिताः पूजां विधायामलां
सेव्याः सन्मुनयश्च वन्द्यचरणाः श्रव्यं च जैनं वचः ।
सच्छीलं परिपालनीयमतुलं कार्यं तपो निर्मलं
ध्येया पञ्चनमस्कृतिश्च विदुषा भाव्या च सद्भावना ॥१॥'' शार्दूल०

तत्रापि धर्मे जीवदया सर्वत्रापि सारोक्ता-

''देविंदचक्कवट्टि-त्तणाइं भुत्तूण सिवसुहमणन्तम् ।
पत्ता अणंतसत्ता, अभयं दाऊण जीवाणम् ॥१॥'' - आर्या
यो दद्यात् काञ्चनं मेरुं, कृत्स्नां चापि वसुन्धराम् ।
सागरं रत्नपूर्णं वा, न च तुल्यमहिंसया ॥२॥ - अनु०
हंतूण परप्पाणे, अप्पाणं जो करेइ सप्पाणम् ।
अप्पाणं दिवसाणं, कएण नासेइ अप्पाणम् ॥३॥''- आर्या

इत्याकर्ण्य प्राणान्तेऽपि स्थूलं निरपराधं जीवं न हन्मि न घातयामीति व्रतं जग्राह । श्रावकोऽभूत् । भक्तामरस्तवं पठित्वाऽस्मार्षीच्च । सोऽन्यदा प्रभूताऽपि विभूतिस्त्यागभोगादिना क्षीयते निर्व्यवसायानामिति विमृश्य पुरपरद्वीपयोग्यभाण्डैर्वाहनपञ्चकमापूर्य शुभमुहूर्ते [१]नारिकेलादिभिः समुद्रपूजां कृत्वा [२]बोहित्थमारूढः । युगपच्चलितानि पक्षिवत् [३]केनिपातपक्षप्रेरणया [४]बहित्रकाणि। स्वल्पैर्दिनैः 'सिंहल'द्वीपं प्रापुः। जातो यथेप्सितो लाभः। मणिमुक्ताप्रवालकर्पूरचन्दनादीनि प्रतिभाण्डानि जगृहिरे। बोहित्थानि भृत्वा पूरितानि स्वदेशं प्रति । क्रमेणान्तःसागरं प्रविष्टेषु

यानपात्रेषु नाविका अचीकथन्-श्रेष्ठिन् ! इह विकटाक्षी देवी पशुबलिं गृह्णाति सांयात्रिकेभ्यः। ब्रूहि यथा तटवर्तिग्रामादानीय करं दद्मः, अन्यथा श्रेयो न। श्रेष्ठ्याऽऽह स्म-भो कर्णधाराः ! मह्यं पशुघातो न रुचितः। सर्वथा जीवान् न हन्मि न घातयामीति । भोगं निरेनसं यच्छामि देव्याः । यत उक्तं च -

''दमो देवगुरुपास्ति-र्दानमध्ययनं तपः ।
सर्वमप्येतदफलं, हिंसां चेन्न परित्यजेत् ॥१॥ - अनु०
हिंसा विघ्नाय जायेत, विघ्नशान्त्यै कृताऽपि हि ।
कुलाचारधियाऽप्येषा, कृता कुलविनाशिनी ॥२॥'' - अनु०

इति कथितेऽभ्युन्नता घनाः। ववुर्वाताः। वृत्तोक्तस्वरूपेऽम्भोधौ धनावहः स्तवं सस्मार। कलकलं कुर्वन्तः समकालमलपन् नाविकाः - श्रेष्ठिन् ! एकाग्रहो मा भूः। देव्युपदां देहि यथा कुशलं स्याद् वाहनानाम्। आत्मार्थे सर्वेऽधर्ममपि समाचरन्ति विज्ञाः । उक्तं च -

''त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥१॥- अनु०
आपदर्थे धनं रक्षेद्, दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद्, दारैरपि धनैरपि ॥२॥'' - अनु०

अल्पनाशे बहुरक्षणं युक्तम् ।

''सर्वनाशे समुत्पन्ने, अर्धं त्यजति पण्डितः ।
अर्धेन कुरुते कार्यं, सर्वनाशो हि दुस्तरः ॥१॥'' - अनु०

तत् सर्वथाऽप्यात्मा रक्ष्य एव । अतः पशुबलिं यच्छेत्युक्तोऽपि स्तवध्यानान्नाचलत् श्रेष्ठिसत्तमः। तस्मिंश्चत्वारिंशं वृत्तं जपति व्यन्तरी-

---

१ नालिकेरादिभिः । २ नावम् । ३ के-जले निपात्यन्ते-नीयन्ते नावोऽनेनेति केनिपातः-अरित्रम् । ४ प्रवहणानि ।

कृतोत्पाताः प्रलीनाः। विकटाक्षी प्रकटीभूताऽनर्घ्यं रत्नमढौकयत् । देव्युवाच-भो धर्ममते ! त्वन्निश्चलव्रतपालनतया चक्राज्ञया च तुष्टाऽस्मि । वरं ब्रूहि -

''अमोघा वासरे विद्यु-दमोघं निशि गर्जितम् ।

नारीबालवचोऽमोघ -ममोघं देवदर्शनम् ।।१।।'' - अनु०

इत्युक्ते श्रेष्ठी जीवहत्यावारणवरमयाचत । अमृतभुजां देवानां नोचितः पशुवधाभिलाषो निरर्थकः पापहेतुः । देव्याऽङ्गीकृतम् । ततः परं छुटिताः पशुबलेः पोतवणिजः। वाहनपञ्चकं स्तम्भतीर्थे क्षणेनायातं क्षेमेण। असङ्ख्यधनभाग् चक्रायुक्श्रीयुगादिजिनप्रासादमचीकरत् । तीर्थयात्रा नैकशः मूर्ति(सूत्रि?)ताः पवित्राः । अत्यन्तानन्दसुखभाजनमजनि धनावहः ।।

।। इति षड्विंशी कथा ।।

※ ※ ※

अथ रोगभयं भिन्दन्नाह - उद्भूतेत्यादि

हे कर्मव्याधिधन्वन्तरे ! मर्त्या-नराः उद्भूतभीषणजलोदरभारभुग्ना उत्पन्नरौद्रोदरवृद्धिव्याधिभरवक्रीकृता भग्ना वा पाठे मोटिताः शोच्यां दशामुपगताः-दीनामवस्थां प्राप्ताः च्युतजीविताशाः-त्यक्तजीवतव्यवाञ्छाः एवंभूताः त्वत्पादपङ्कजरजोऽमृतदिग्धदेहाः- भवच्चरणकमलरेणुसुधालिप्तवपुषो मकरध्वजतुल्यरूपाः-कामसममूर्तयः कमनीयकान्तयो भवन्ति । यथा सुधापानाभिषेकात् सर्वरोगनाशस्तथा भवत्पदपद्माश्रयणादपि सकलव्याधेरुपशमः इति वृत्तार्थः ।।४१।।

प्रभावप्रकटनं यथा -

चक्रेश्वरीप्रसादेन, ज्ञातौषधिचिकित्सया ।

राजहंसकुमारस्य, रोगा नेशुर्महाभयाः ।।१।। - अनु०

श्री 'उज्जयिन्यां' पुरी राजशेखरो राजा। पट्टदेवी विमला । तत्कुक्षिभूः

किंवि भवन्तम्? 'अनिमेषविलोकनीयं' निमेषो-नेत्रमीलनं तदभावः अनिमेषस्तेन विलोकयितुं योग्यस्तम्। दर्शने निमेषस्याप्यन्तराये महद्द्वैरस्याद् उत्फुल्लनेत्रतया जनैर्वीक्षणीय इति भावः, यद्वा अनिमेषाः-देवास्तेषामप्यतिशायिरुपत्वाद् वीक्षणयोग्यः, अत एव त्वां दृष्ट्वा नान्यत्र चक्षुर्विश्राम्यति। अर्थान्तरन्यासमाह-दुग्धसिन्धोः पयः पीत्वा जलनिधेः क्षारं जलं रसितुं अशितुं वा क इच्छेत्? अपि तु न कोऽपीत्यन्वयः।

'इच्छेत्' इति क्रियापदम्। अभिलषेदित्यर्थः। कः कर्ता? 'जनः'। किं कर्तुम्? 'रसितुं' अशितुं-उपभोक्तुं पातुमितियावत्। किं कर्मतापन्नम्? 'जलम्'। कस्य? 'जलनिधेः' लवणसमुद्रस्य। किंवि. जलम्? 'क्षारम्'। क्षारपदसन्निधानादेव जलनिधिसामान्यपदेन-लवणसमुद्रो गृह्यते। किं कृत्वा? 'पीत्वा'। किं कर्मतापन्नम्? 'पयः' दुग्धम्। कस्य? 'दुग्धसिन्धोः' क्षीरसमुद्रस्य। रसाधिक्यार्थमिदम्। किंवि. पयः? 'शशिकरद्युति' चन्द्रकिरणोज्ज्वलम्। पयःशब्देनात्र दुग्धमेव व्याख्येयं, न जलं, विशेषादान्तर्यध्वननात्॥

अथ समासा :- न निमेषः अनिमेषः- निमेषाभावः। 'क्वचित् प्रसज्यप्रतिषेधे नञ्समासः' इति भाष्यकारः। अनिमेषेण विलोकनीयः अनिमेषविलोकनीयस्तम्। शशः अस्मिन्नस्तीति शशी। आधारार्थे लौकिकप्रसिद्धिः सम्बन्धे ज्योतिः शास्त्रप्रतीतिः। यदुक्तं -

'अश्वः १ शशक २ वराहौ ३ श्येनो ४
घूक ५ स्तथा च मण्डूकः ६।
हुण्डु ७ घूक ८ कच्छपाः ९
स्यू रव्यादेर्वाहनानि पुनः ॥ १ ॥'

शशिनः कराः शशिकराः, शशिकरवद् द्युतिर्यस्य तत् शशिकरद्युति। दुग्धस्य सिन्धुः दुग्धसिन्धुः, तस्य दुग्धसिन्धोः। जलं नितरां धीयते अत्र जलनिधिः, तस्य जलनिधेः। 'रस रसने' धातोः रसितुमिति। 'अशश्(?) भोजने' इत्यस्य अशितुमिति वा॥ इति एकादशवृत्तस्यार्थः ॥ ११ ॥

અર્થ : નિમેષ રહિત જોવા લાયક એવા આપને જોઇને મનુષ્યની આંખ બીજે

राजहंसकुमारः सकलकलापारीणः शास्त्राभ्यासप्रवीणश्च। अथ दैवाद् विमलायां विपन्नायां कमला नाम पट्टराज्ञी जाता। सा राजहंसे द्वेषं धत्ते। अस्मिन् सपत्नीभवे राजवल्लभे सति मत्सुतस्य कथं राज्यम्?। अतः तन्मृतये छलं पश्यति। साऽन्यदा राज्ञि देशजयाय प्रस्थिते पश्चात् पुरस्थस्य राजहंसस्य बहुगदकरमगदमदापयत्। कुमारदेहे ज्वरजलोदरादयो रोगाः प्रादुरभूवन्। कुमारेण सपत्नीमातुश्चेष्टितमिति मान्त्रिकात् ज्ञातम्। अत्रस्थस्य मे मृत्युरेव (ग्रंथाग्रं १४००) उक्तं च -

''दुष्टा भार्या शठं मित्रं, भृत्याश्चान्तरदायकाः।
ससर्पगृहवासश्च, मृत्युरेव न संशयः ॥१॥''- अनु.

''शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥१॥ ''- पृथ्वी

नृपाङ्गणगते खले कथं जीव्यते इति ध्यात्वा जीवरक्षणायैकक एव निःसृतः पुरात्। कृच्छ्रेण गतो 'हस्तिनापुरम्'। सायं प्रतोल्यां स्थितः। तत्र मानगिरिर्नाम राजा। तत्पुत्री कलावती। सा जैनार्यिकाणां पार्श्वे-

''श्रीतीर्थेशस्य पूजा गुरुचरणयुगाराधनं जीवरक्षा
सत्पात्रे दानवृत्तिर्विषयविरमणं सद्विवेकस्तपश्च।
श्रीमत्सङ्घस्य पूजा जिनपतिवचसां लेखनं पुस्तकेषु
सोपानश्रेणिरेषा भवतु तनुभृतां सिद्धिसौधाधिरोहे ॥१॥''- स्रग्धरा

इति श्रुत्वा जैनधर्ममग्रहीत्। भक्तामरस्तोत्रं शुद्धं पपाठ। चतुःषष्ठिकलापारगा जाता। अन्यदा कुमार्यां सभागतायां राजाऽहंयुः[१] सभ्यसामन्तानुवाच। भो ! भवद्भिः कस्य कर्मणा भुज्यते राज्यलक्ष्मीः? त ऊचुः- देवकर्मणेति। साऽन्तर्जहास। राजाऽऽह-वत्से ! किमिति हसितम्? सा आह-सेवकाः स्वामिरुचितं जानन्तोऽपि कुर्वन्ति। उक्तं च-

"प्रणमत्युन्नतिहेतो- र्जीवितहेतोर्विमुञ्चति प्राणान्।
दु:खीयति सुखहेतो:, को मूर्ख: सेवकादन्य: ॥१॥"- आर्या

किञ्च-

" मौनान्मूक: प्रवचनपटुर्जल्पको वातलो वा
धृष्ट: पार्श्वे भवति च तथा दूरतश्चाप्रगल्भ:।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजात:
सेवाधर्म: परमगहनो योगिनामप्यगम्य:॥१॥"- मन्दाक्रान्ता

इति त्वत्कर्णामृतमनृतं ब्रुवतेऽमी। अतो हास:। राजा-शठे ! त्वं कथं जीवसि? सा स्वकर्मणेत्युवाच ।

"नमस्यामो देवान् ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्य: सोऽपि प्रतिनियतकर्मैकफलद:
फलं कर्मायत्तं यदि किममरै:? किं च विधिना?
नमस्तत् कर्मभ्यो विधिरपि न येभ्य: प्रभवति ॥१॥"- शिखरिणी

-(नीतिशतके श्लो. ९१)

" दैवेनासृजता स्वयं जगति यद् यस्य प्रमाणीकृतं
तत् तस्योपनयेन्मनागपि महान् नैवाश्रय: कारणम्।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्रा: पयोबिन्दव: ॥२॥" शार्दूल०

इत्युक्ते रुष्टो राजा रोगग्रस्तरङ्कनरानयनाय दुष्टभटानाजिज्ञपत्। ते लघुभूतकरचरणं मलव्याप्तकरणं ज्वरिणं दु:खदारिद्र्यशरणं राजहंसं गोपुरादानिन्यु: सभाम्। राजा सर्वालङ्कारांस्त्याजयित्वा दण्डीखण्डचीवरान् परिधाप्य तमनिच्छन्तं तां पर्यणाययत्। असमञ्जसकृद् राजेति मन्त्रिसामन्तादय: शुशुचु:, इत्यचिन्तयंश्च -

"सच्छंदं जंपिज्जइ, कत्थइ जं जं मणस्स पडिहाइ।
अयसस्स न वीहिज्जइ, पहुत्तणं तेण रमणीयम्॥१॥" - आर्या

१ अहङ्कारी ।

राजा-सत्यकर्मवादिनि ! भुङ्क्ष्व स्वकर्मणः फलमिति भणित्वा [१]शम्बलमात्रभर्तृयुतां तां नगरान्निरसीसरत्। साऽवक् -

" समीहितं यन्न लभामहे वयं प्रभो ! न दोषस्तव कर्मणो मम।
दिवाऽप्युलूको यदि नावलोकते तदाऽपराधः कथमंशुमालिनः? ॥१॥"-वंश०

इत्याद्युक्त्वा पतिं करे कृत्वा साश्रुपातं पुरीजने पश्यति चचाल कलावती। निशा समैत्। तदा हेमन्तर्तुः कलिरुपोऽस्ति। उक्तं च-

" निर्दग्धाः [२]कमलाकराः [३]सुमनसो मम्लुः [४]कलावानपि
प्रीत्यै नो किल [५]कृष्णवर्त्मसु जनः प्रायेण बद्धादरः।
जाड्येनोल्लसितं जगत् सुमहिते [६]मित्रेऽपि यन्मन्दता
तन्नूनं कलिरेष दुःसहतरः शीतर्तुना स्पर्धते ॥१॥" - शार्दूल.

इति। तत्र तरुकिशलयप्लोषकं पान्थमनोरथमालाशोषकं संयोगिजनतोषकं कन्दर्पदर्पपोषकं दरिद्रजातदूषकं शिशिरपातं दृष्ट्वा वने तरुपत्राण्यास्तीर्य [७]सक्थनि तन्मौलिं कृत्वाऽस्थात्। स कलावतीमवक्- प्रिये ! मुञ्च मां [८]कदर्यम्। को हेमावलीदृषदोर्मणिकाचयोर्गजीखरयोः[९] कल्पवल्लीपञ्चाङ्गुलयोर्मेलः[१०]?। त्वं (तु) सर्वत्र मानं लप्स्यसे। उक्तं च -

" शूराश्च कृतविद्याश्च, याश्च रूपधनाः स्त्रियः।
यत्र यत्र गमिष्यन्ति, तत्र तत्र कृतालयाः ॥१॥" - अनु.

साऽवक्-प्राणनाथ ! किमुच्यते? किं कुलस्त्रीचेष्टितं न जानीथ?-

"गतविभवं रोगयुतं, निर्वीर्यं भाग्यवर्जितं स्वपतिम्।
दैवतवत् सेवन्ते, कुलस्त्रियस्ता न शेषाः स्युः ॥१॥"- आर्या

उक्तं च-

---

१ पाथेयम्। २कमलानां-उत्पलानां आकराः-समूहाः, सरोवराणि वा, पक्षे कमलायाः-लक्ष्म्याः आकराः-गृहाणि। ३ पुष्पाणि, पक्षे पण्डिता देवा वा। ४ पक्षे चन्द्रः। ५ वह्नौ, पक्षे मलिनमार्गेषु। ६ सुहृदि, पक्षे सूर्ये। ७ जङ्घायाम्। ८ कुत्सितोऽर्यः-स्वामी कदर्यः, कृपण इत्यर्थः तम्। ९ हस्तिनीगर्दभयोः। १० एरण्डः।

" दिनानां च निशानां च, यथा ज्योतिर्विभूषणम् ।
सतीनां च यतीनां च, तथा शीलं विभूषणम् ॥१॥" - अनु.

इत्युक्ते विदितसर्वतत्स्वरूपः कुलीनेयमिति जोषं स्थितः तुतोष च । (तौ द्वावपि) प्रातः प्रयाणं चक्रतुः। मध्याह्ने तस्थतुः तरुतले पत्युः शय्या कृता (कलावत्या) । तस्मिन् शयाने सा पवित्रा पतिरोगोपशमनोपायं मार्गयमाणा भक्तामरस्तवैकचत्वारिंशद्वृत्तगुणनावसरे पत्युरुदरान्मुखे सर्पमुखं निःसृत्यास्थात्, आसन्नवल्मीकाग्रादपरं सर्पमुखं च। उभावपि भुजगौ चक्राधिष्ठितावन्योऽन्यं विवदन्तौ मर्म निजं निजमूचतुः। वल्मीकसर्प आह-रे दुराचार ! सत्पुरुषरुपविनाशक ! यदि कश्चन राजिकाम् अत्यम्लतक्रेण सहास्मै दत्ते, तदा त्वं स्थानाद् यासि। उदरसर्प आह-रे सञ्चयकर ! कदर्यवत् कश्चित् त्वद्बिलेऽत्युष्णं तैलं क्षिपति, तदा त्वदधिष्ठितं निधानधनं स विलसति, त्वं च विलीयसे इत्युक्त्वा स्वं स्वं स्थानमीयतुः सर्पौ। कलावती सर्वं ददर्श शुश्राव च। प्रत्यक्षीभूय चक्रेश्वरी स्तवजापप्रभावान्मयैतच्चक्रे इत्युक्त्वाऽन्तर्दधौ। सा तत्र स्थिता आसन्नगोकुलात् तक्रराजिकापानाद् भर्तुर्व्याध्युपशमं विदधे। स्वभावरुपो [१]जातरूपसमदेहकान्तिर्जातो राजहंसः। पत्ये कथयित्वा तैलक्षेपान्निधानं ललौ। ततः कलावती चक्रेश्वरीप्रभावाद् उरगयोर्नरवागभवदिति भर्त्रेऽभणत्। स तत्पृष्टः स्वपितृजन्मादिकमभाणीत्। तयोक्तः स्वराज्यमभजत्। सधनं भार्यासनाथं तं दृष्ट्वा तुष्टो राजशेखरनृपतिः। कुमारस्य कमलाराज्ञीदुर्विलसितमिति ज्ञात्वा दूरीकृत्वा सा। राजहंसस्य क्रमेण राज्यमभवत्। श्वशुरेणापि शुद्धिर्लब्धा। मानान्निवृतं चित्तम्। सर्वैः स्वकर्म भुज्यते इत्यङ्गीकृतं पुत्र्या वचः । उक्तं च -

" सव्वो पुव्वकयाणं, कम्माणं पावए फलविवागम्।
अवराहेसु गुणेसु अ, निमित्तमत्तं परो होइ ॥१॥ आर्या
सुखस्य दुःखस्य न कोपि दाता परो ददातीति कुबुद्धिरेषा ।
पुरा कृतं कर्म सदैव भुज्यते शरीर ! हे निस्तर यत् त्वया कृतम् ॥२॥"

- उपेन्द्र०

१ सुवर्णम् ।

इति विबुध्य मानगिरिनृपः कलावतीदुहितरमानाय्यापूजयत्। क्षमिता च। सर्वे सुखभाजनं बभूवुः। राजहंसो राजा जिनधर्ममाराधयत् प्रभावती-प्रतिबोधवचसा श्रीउदायिचरमराजर्षिवत् कलावतीपुण्यकथनेन। चिरं सुखिताभूत् कलावती ॥

॥ इति सप्तविंशतितमी कथा ॥

* * *

अथ बन्दिबन्धनभयं नुदन्नाह - आपादेत्यादि

हे अप्रतिचक्राचर्चितचरण ! आपादकण्ठं - पदगलं यावद् उरुश्रृ-ङ्खलवेष्टिताङ्गाः - गुरुलोहदामव्याप्तवपुषः गाढं - निबिडं बृहन्निगडकोटिनिघृष्टजङ्घाः - [1]विकटाष्टीलाग्रकषितनलकिनीका[2] मनुजाः - नराः त्वन्नाममन्त्रं - ॐ ऋषभाय नमः इति पदं अनिशं सदा जपन्तो-ध्यायन्ते सद्यः-तत्कालं स्वयं-आत्मनैव विगतबन्धनभयाः-ध्वस्तबन्ध-शङ्का भवन्ति-जायन्ते। इति वृत्तार्थः ॥४२॥

एतस्य महिमा पूर्वं श्रीमानतुङ्गाचार्याणां निबिडनिगडश्रृङ्खलाजाल-भञ्जनादभूत्। तदा त्वनेकेषां राजनियोगिनां [3]लोहान्दुकत्रुटिः (राजवृन्दे-च्छुटिः)

"म्लेच्छुलुप्तसुरत्रात-प्रभूतातिशये कलौ।

रणपालस्य सञ्जातं, निबिडान्दुकभञ्जनम्॥१॥"- अनु.

श्री 'अजयमेरु' दुर्गपरिसरबहुग्रामग्रामणीः सहजदानविनयगुणप्रीणित-दर्शनिमालो(?) रणपालोऽजनि राजपुत्रः।

"अन्नदानं महादानं, प्रणामो दर्शनेषु च।

अविरुद्धं द्वयं चैतत्, कर्तुर्महिमहेतवे॥१॥" - अनु.

इति पद्यं बह्वमंस्त। स च जैनमुनिसङ्गत्या भद्रकस्वभावो भक्तामरस्तवं पञ्चपरमेष्ठिमन्त्रमपाठीत्। श्रीयुगादिजिने भक्तिभरः स्तव-महिमार्थवेत्ता च स धर्मपालकतया साधूनां चेतसि शतपत्रमाल्यमिव

१ अष्टीला = दृषद्विशेषः। २ नलकिनी = जङ्घा। ३ अन्दूकं = श्रृङ्खला।

महोद्भटतया म्लेच्छानां हृदि शल्यमिवासीत् । एकदा 'अजयमेरु' दुर्गसस्थदुष्टमीरेण छलं लब्ध्वा स बद्धः सपुत्रः। कलियुगदुर्विलसितमेतत् । उक्तं च -

'सीदन्ति सन्तो विलसन्त्यसन्तः पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु रोषः पश्यन्तु लोकाः कलिखेलितानि ॥१॥ - इन्द्र०
सङ्कुचन्ति कलौ तुच्छाः, प्रवर्धन्ते महाधियः ।
ग्रीष्मे सरांसि शुष्यन्ति, कामं वार्धिस्तु वर्धते॥२॥'' - अनु.

अतो नाचलत् मनो धर्मात् तस्य महाशयस्य। सपुत्रश्चालितो 'योगिनी' पुरं प्रति प्राप्तश्च। तदा जलालदी(लुद्दी?)नसुरत्राणो राज्यं करोति । तेन जीर्ण'दिल्ली'दुर्गमध्ये गाढश्रृङ्खलनिगडैर्बद्धो [१]बन्दौ क्षेपितः सपुत्रः। तत्र रणपालः शुचिर्भक्तामरस्तवस्य द्विचत्वारिंशं वृत्तं दध्यावहर्निशम्। दशसहस्र्यां पूर्णायां निशीथिन्यां रणरणन्नूपुररवोज्जीवितमदना मणिमयमेखलाकलापकिङ्किणीक्वाणवशीकृतत्रिभुवना स्थूलनिस्तुलनिर्मलमुक्ताफलहारावलिदासीकृततारकव्राता कमलमृदुलसरलकराङ्गुलिपरिहितोर्मिकारत्नकान्तिदर्शनपूरितमानवसमीहितजाता भ्रमरश्रेणिकरणिवेणिदण्डमिषसेवकीकृतनागलोका श्रृङ्गारश्लोका काचिद् रमणी तरुणी रमणीयरूपा-वत्स ! (शीघ्रं) शीघ्रमुत्तिष्ठेति जल्पन्ती तत्पुरः प्रादुर्भूता। रणपालोऽजल्पत्- जननि ! का त्वं? देवी वा मानवी वा विद्याधरी वा? साऽवदत्गरुडवाहना श्रीयुगादिजिनभक्ता भक्तामरस्तोत्रस्मर्तुरक्षाकरी सुरी चक्रेश्वरी वर्तते, तस्या अहं किङ्करी प्रतिहारी त्वद्बन्दिमोचनाय प्रेषिताऽस्मि चक्रेश्वरीस्वमिन्येति। रणपालोऽरणत्-देवि ! त्वमेव मे चक्राधिकाऽसि, परं कथमुत्तिष्ठामि करचरणनियन्त्रितोऽ हम्? देव्युवाच-स्पृश करचरणौ। सोऽस्प्राक्षीत्, पुरःपतितनिगडाष्टीलकुलमद्राक्षीत्। पुत्रस्याप्यपतन् बन्धनानि। स्वयमुदघटिष्ट कारौकः [१]कपाटसम्पुटम् । तावुत्तिष्ठन्तौ

१ कारागृहे ।

वारितौ देव्या। रक्षाप्राहरिकास्तावदैयरु:। तौ तथैव दृष्ट्वा जग्मु:। देवीदर्शितसोपानपथेन दुर्गमारूढौ समुत्प्लुत्याध: पतितौ पट्टदुकूलच्छन्नहंसरोमशय्योपरीव। ततश्चेलतु: स्वग्रामं प्रति। साऽपि राजचमू: केटकेऽलगत्। तौ समायान्तीं सेनामपश्यताम्। सा न पश्यति स्म तौ। कटकं शाकम्भरीमजयमेरुदुर्गं च यावद् यात्वा व्यावर्तितम्। रणपाल: सनन्दन: श्रेयसा स्वस्थानमाशिश्राय। 'चित्रकूट'दुर्गे चिरं स्वकुटुम्बयुक् सुखमन्वभूद् धर्मं च पालयामास।।

।। इत्यष्टाविंशी कथा।।

※ ※ ※

अथाष्टभीनाशेन स्तवं संक्षिपन्नाह (ग्रं० १५००) - मत्तेत्यादि

हे अमेयमहिमन्! तस्य प्राणिनो भयं-भी: आशु-शीघ्रं भियेव-भयेनेव नाशं उपयाति-ध्वंसमायाति, यो मतिमान्-सप्रज्ञ: पुमान् तावकं-भवदीयम् इमं-प्रागुक्तस्वरूपं स्तवं-स्तोत्रम् अधीते-पठति। किंभूतं भयम्? मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च सङ्ग्रामश्च वारिधिश्च महोदरश्च बन्धनं च तेभ्य उत्था-उत्पत्तिर्यस्य तत्। भवत: तव मन्त्राध्यायप्रभविष्णु प्रभावयुतान्नराद् भयस्यापि भयं भवतीति युक्तोत्प्रेक्षा। भयभेत्तृत्वादेहिकार्थकृत्वादन्यसुरवत् तीर्थकृदपीति न चिन्त्यम्। यतो बुद्धस्य सिद्धस्य क्षीणकर्मणो भगवत: स्मरणात् तुष्टा: सद्भक्तसुरा: सर्वमर्थं सम्पादयति। वीतरागध्यानान्मुक्तिरेव मुख्यं फलम्, अन्यत् प्रासङ्गिकं, कृषे: पलालवदिति। अथ -

'' **अप्रसन्नात् कथं प्राप्यं, फलमेतदसङ्गतम्।**
चिन्तामण्यादय: किं न, फलन्त्यपि विचेतना:? ।।१।।'' अनु०

अत्र बहु वक्तव्यं तत् स्वधिया विचार्यं सुधीभि:।। इति वृत्तार्थ: ।।४३।।

※ ※ ※

१. कारायाः-बन्धनस्य ओकः-गृहम्।

अथ स्तवप्रभावसर्वस्वमाह - स्तोत्रेत्यादि

हे जिनेन्द्र ! - केवलिपते ! इह-जगत्यां यो जनोऽजस्रं-अनवरतं तव स्तोत्रं-तव संस्तवनं बहुपदसन्दर्भितत्वात् स्रगिव स्तोत्रस्रक् तां स्तोत्र-मालां कण्ठगतां धत्ते कण्ठपीठलुठितां करोति पठतीत्यर्थः। किंभूताम्? भक्त्या-भावपूर्वं मया-श्रीमानतुङ्गसूरिणा गुणैः-पूर्वोक्तैर्ज्ञानाद्यैर्निबद्धां रचि-ताम्, अथ (वा) जिनेन्द्रगुणैः-अर्हद्गुणैः स्वयंबुद्ध(त्व)सहजवैराग्यादिभि-र्निबद्धां-गुम्फितां, रुचिरा-मनोज्ञा वर्णा अकाराद्या द्विपञ्चाशदेव विचि-त्राणि यमकानुप्रासश्लेषद्व्यर्थव्यङ्ग्यादिविशेषेणाद्भुतानि स्पृहणीयाश्रय-णीयतया पुष्पाणीव यस्यां ताम्। लक्ष्मीः-राज्यस्वर्गापवर्गसत्का श्रीरवशा - तद्गतचित्ताऽवश्यं तं मानतुङ्गं चित्तोन्नत्युन्नतं स्तोत्रकविं वा समुपैति-समन्तात् पार्श्वमायाति। इति प्रथमोऽर्थः ।।१।।

अथ (वा) यो भक्त्या-विच्छित्या गुणैः-सूत्रतन्तुभिर्निबद्धां-ग्रथितां मानंमा तया मया प्रमाणेनोपलक्षितां रम्यपञ्चवर्णाद्भुतकुसुमां तव स्तोत्र-मिव स्रजं-वनमालां लुप्तोपमया पुष्पमालां कण्ठगतां धत्ते-धारयति लक्ष्मीः-शोभा अवशा-निश्चितं तं मानतुङ्गं-प्रतिष्ठाप्राप्त्युच्चं समुपैति। इति द्वितीयोऽर्थः ।।२।।

अथ (वा) यः स्तोत्रमिव स्रजं-वनमालाम्, लुप्तोपमा सर्वत्र ज्ञेया, मया-पद्मया भक्त्या-अनुरागेण जिनो-विष्णुरेव इन्द्रः-पतिस्तस्य गुणै-र्जिनेन्द्रगुणैः प्रभुत्वादिभिर्निबद्धां-न्यस्तां चारुद्युतिवैविधसन्तानकादिकु-सुमां कण्ठगतां धत्ते लक्ष्मीः-वार्धिकनी अः-कृष्णः तस्य वशा-योषित् केशवकलत्रं तं मानतुङ्गं-साभिमानं पुरुषोत्तममायाति ।। इति तृतीयोऽर्थः।।३।।

अथ (वा) जिनो-विष्णुः इन्द्रः - सुरेन्द्रस्तयोर्गुणैः-शौर्यैश्वर्यादिभिरुप-लक्षितो विक्रमी परमेश्वरो यः पुष्पमालां प्रोक्तस्वरूपां कण्ठगतां बिभर्ति, लक्ष्मीः-सकलभूमिश्रीः अवशा-तदायत्ता "वीरभोज्या वसुन्धरा" इति

वचनात् मानतुङ्गं - साहङ्कारं तं समुपैति ॥ इति चतुर्थोऽर्थः॥४॥

अथ (वा) यः सामान्योऽपि पुष्पदाम धारयति स लक्ष्मीवान् स्यात् । अथ यो अमया अलक्ष्म्या कलितोऽपि जनो भक्त्या बहुविधरतभङ्ग्या गुणैः - माधुर्याद्यैर्निबद्धां - स्ववशीकृतां रुचिरवर्णविचित्रपुष्पां - कान्तवपुर्द्युतिविशिष्टतिलकमाल्याभरणां, चित्रस्तिलक उच्यते, स्रजमिव कामिनीमिति गम्यम्, कण्ठगतां धत्ते - परिरभते, निरन्तरं भजत इत्यर्थः। लक्ष्मीस्तं मानतुङ्गं पुरुषगणनागण्यं समायाति अवशा-तदधीना ॥ इति पञ्चमोऽर्थः ॥५॥

पुष्पधारणाद् वरस्त्रीसेवनात् दरिद्रोऽपि पुमान् श्रीमान् स्यात् । उक्तं च

"शिरः सपुष्पं चरणौ सुपूजितौ वराङ्गनाऽसेवनमल्पभोजनम् ।

अनग्नशायित्वमपर्वमैथुनं चिरप्रनष्टां श्रियमानयन्ति ॥१॥"- वंश०

अथ (वा) यः पुमान् स्वयंवरे तद्गुणरञ्जितपतिं वराक्षिप्तां भक्त्या-रचनया मया-शोभया गुणैः-सुवर्णसूत्रैर्निबद्धां-नद्धां चारुरुचिनानाविधकुसुमां स्तोत्रमिव स्रजं मालां कण्ठगतां धत्ते, लक्ष्मीरिव लक्ष्मीः श्रीसमरूपा स्त्री अवशा-कामविह्वला तं मानतुङ्गं-वपुःप्रमाणप्राप्तं सरलसर्वलक्षण-पूर्णं समुपैति - दूरादपि तत्पार्श्वमायातीत्यर्थः ॥ इति षष्ठोऽर्थः॥६॥

अनेन पुरुषस्य सौभाग्यातिशयः प्रकाशितः । अन्यथा पतिमनुसरन्ती प्रौढाऽपि स्त्री मानहीना दुःखिता स्यात् । उक्तं च -

"गम्मइ पियस्स पासे, सुप्पइ सिच्छाय (इ) दिज्जए अहरो ।

विसएहिं पिज्जइ महू दुक्खे दियहा गमिज्जन्ति ॥१॥" - आर्या०

ध्वनिरिह पत्यनुसरणं मानिन्याः, प्रौढस्त्रीणां स्नेहो वर्धत एवाहरहः । उक्तं च -

"जम्मन्तरे न विहडइ पोढमहिलाण जं कियं पिम्मम् ।

कालं(लिं)दि कण्हविरहे अज्जवि कालं जलं वहइ ।१॥" - आर्या०

नवोढा तु विवोढारं व्रजन्ती भर्तुः सौभाग्यं विवृणोतितरां (इति) लक्ष्म्यभिगमनेनोक्तं भवति । स्तोत्रेऽप्यधीति जनः सौभाग्यकलितः श्रिया सदा समाश्रयिष्यते इति तात्पर्यार्थः ।

अत्र पुष्पमालाशब्दोऽभीष्टशकुनत्वेन महोत्सवानन्दहेतुः । उक्तमागमेऽपि

''समणं संजयं दंतं, सुमणं मोयगा दहिं ।
मीणं घंटं पडागं च, सिद्धमत्थं वियागरे ॥१॥'' - अनु०

शकुनार्णवेऽपि -

''पद्मिनी राजहंसाश्च, श्वेतभिक्षुतपोधनाः ।
यं देशमुपसर्पन्ति, तत्र देशे शुभं वदेत् ॥१॥'' - अनु०

पुष्पेषु प्राधान्यं पद्मानामिति । चतुर्दशस्वप्नेष्वपि कुसुमस्रक् प्रशस्या । तीर्थकृदाहारविहारसमवसृत्यवसरे कुसुमवृष्टिः शुभकृदुक्तेति विचार्यम् । स्तवान्ते लक्ष्मीशब्दो माङ्गल्यार्थवाची। तेन स्तोत्रं पिपठिषूणां शुश्रूषूणां व्याचिख्यासूनां निदिध्यासूनां च पुरुषाणामास्तवसमाप्तेरनारतं कल्याणपरम्परा भविष्यतीत्यर्थः । अथ (वा) प्राणिनां प्रतिष्ठाहेतुः श्रीरेव । उक्तं च

''वारांराशिरसौ प्रसूय भवतीं रत्नाकरत्वं गतो
विष्णुस्त्वत्पतितामवाप्य भुवने जातस्त्रिलोकीपतिः ।
कन्दर्पो जनचित्तनन्दन इति त्वन्नन्दनत्वादभूत्
सर्वत्र त्वदनुग्रहप्रणयिनी पद्मे ! महत्त्वस्थितिः ॥१॥''- शार्दूल०

अन्योऽपि शुभोऽर्थः सुधीभिः स्वधिया व्याख्येयः । इति चतुश्चत्वारिंशद्वृत्तार्थः सम्पूर्णः । तत्सम्पूर्तौ सम्पूर्णेयं भक्तामरस्तववृत्तिः सप्रभावककथानिकासंयुक्ता ॥

(अथ प्रशस्तिः -)

गिरां गुम्फधात्री कवीन्द्रेषु वाणी चतुर्वर्णवर्यश्चतुर्वर्णसङ्घः ।
गुरुश्चानुशास्ता सुधीः श्रोतृवर्गो जयेयुर्जगत्याममी आसमुद्रम् ॥१॥- भुजङ्ग०

श्री 'चन्द्र' गच्छेऽभयसूरिवंशे श्री 'रुद्रपल्लीय' गणाब्धिचन्द्राः ।

સ્થાને સંતોષ પામતી નથી (જેમ) ક્ષીરસાગરના ચન્દ્રકિરણ જેવા ઉજ્જવળ દૂધ પીને કયો માણસ લવણસમુદ્રનું ખારું પાણી પીવાને ઇચ્છે?

❊ ❊ ❊

अथैतादृग् रूपातिशयः कुत इत्याशङ्कानिरासाय प्राह -

यैः शान्तरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैकललामभूत !।
तावन्त एव खलु तेऽप्यणवः पृथिव्यां
यत् ते समानमपरं नहि रूपमस्ति ।।१२।।

दण्डान्वय :- त्रिभुवनैकललामभूत ! शान्तरागरुचिभिः यैः परमाणुभिः त्वम् निर्मापितः ते अपि अणवः पृथिव्याम् खलु तावन्तः एव यत् ते समानम् अपरम् रूपम् नहि अस्ति।

हे त्रिभुवनैकललामभूत ! - हे जगत्त्रितयाद्वैततिलकोपमान ! यैः परमाणुभिस्त्वं निर्मापितः असि इत्यन्वयः।

'असि' इति क्रियापदम्। कः कर्ता? 'त्वम्'। किंवि.? 'निर्मापितः' सम्पादितः। कैः कर्तृभिः? 'परमाणुभिः'। कः कर्मरूपः? 'त्वम्'। किं विशिष्टैः परमाणुभिः? 'शान्तरागरुचिभिः' व्यपगतरागकान्तिभिः। 'खलु' निश्चितम्। ते अणवः पृथिव्यामपि तावन्त एव सन्तीत्यन्वयः।

'सन्ति' इति क्रियापदम्। के कर्तारः? 'अणवः' सूक्ष्मा निर्विभागा भागाः। किंविशिष्टा अणवः? 'तावन्तः' तत्परिमाणाः, त्वद्देहनिर्माणपरिमेयाः। कस्याम्? 'पृथिव्यां' भूमौ। कथम्? 'अपि'। अत्र हेतुमाह यद् यस्मात् कारणात् ते - तव समानं अपरं रूपं हि-निश्चितं न अस्ति इत्यन्वयः।

'अस्ति' इति क्रियापदम्। किं कर्तृ? 'रूपम्', आकृतिविशिष्टः पिण्डः। किंविशिष्टं रूपम्? 'समानं' तुल्यम्। कस्य? 'ते' तव। यदि च त्वद्देहनिर्माणहेतुपरमाणुभ्योऽधिका अणवो भवेयुस्तर्हि तन्निर्मितमन्यदपि रूपं भवेत्, न चैतदस्ति, तस्मात् ते अणवोऽपि तावन्त एवेत्यनुमानालङ्कारः।।

श्रीचन्द्रसूरिप्रवरा बभुस्ते यद्भ्रातरः श्रीविमलेन्दुसंज्ञाः ॥२॥ - इन्द्रवज्रा
तत्पट्टे जिनभद्रसूरिगुरवः सल्लब्धिलब्धप्रभाः
सिद्धान्ताम्बुधिकुम्भसम्भवनिभाः प्रेङ्खन्मनीषाशुभाः ।
जातः श्रीगुणशेखराभिधगुरुस्तस्मात् तपोनिर्मलः
शीलश्रीतिलको जगत्तिलक इत्यासीद् गुरुग्रामणीः ॥३॥ शार्दूल०
सद्गद्यपद्यसुकविः कवितत्त्वधाता चारित्रचारुकरणः करणास्तकामः ।
तत्पट्टभूषणमणिर्गतदूषणोऽभूत् श्रीमान् मुनीन्द्रगुणचन्द्रगुरुर्गरिष्ठः॥४॥
- वसन्त०

सम्प्रत्यवनौ जयिनां, निर्देशादभयदेवसूरीणाम् ।
गुणचन्द्रसूरिशिष्यो, गुणाकरः सूरिरल्पमतिः ॥५॥ - आर्या
अद्भुतमहतीर्दधतीं, बहुश्रुतमुखश्रुताः प्रभावकथाः ।
भक्तामरस्तवस्या-भिनवां वृत्तिं व्यधादेनाम् ॥६॥ - आर्या
वर्षे षड्विंशाधिक-चतुर्दशशती (१४२६) मिते च वर्षर्तौ ।
मासि नभस्ये रचिता, 'सरस्वती' पत्तने वृत्तिः ॥७॥ - आर्या
यद् गदितमर्थकूटं, यल्लक्षणशब्दतश्च दुष्टमिह ।
तत् साधुभिः सुधीभिः, शोध्यं सद्यः प्रसद्य मयि ॥८॥ - आर्या
भक्तामरस्तवाक्षर- विवृत्तिं कृत्वा यदर्जितं सुकृतम् ।
तेनासौ सुकृतिजनो, निरामयः स्यात् सदाऽऽनन्दी ॥९॥ - आर्या
पञ्चदशशतान्यत्र द्वासप्ततिसमधिकानि गणितानि ।
निःशेषवर्णवृन्दा- न्यनुष्टुभां प्रायशः सन्ति ॥१०॥

ग्रन्थाग्रं १५७२ सकलाक्षरगुणनयेति ॥

इति सम्पूर्णा भक्तामरस्तवविवृत्तिः ॥

* * *

BHARAT GRAPHICS
New Market, Panjarapole, Relief Road, Ahmedabad-1
Ph. : 079-22134176, M : 9925020106

अथ समासा :- त्रयाणां भुवनानां समाहारस्त्रिभुवनं, *पात्रादित्वान्न ईप्, द्विगुसमासः*, एकं च तल्ललाम च एकललाम त्रिभुवने एकललाम त्रिभुवनैकललाम, त्रिभुवनैकललाम्नो भूतः- तुल्यस्त्रिभुवनैकललामभूतः, भूतशब्द उपमार्थे, तस्यामन्त्रणे हे त्रिभुवनैकललामभूत !। रागस्य रुचिः रागरुचिः, शान्ता रागरुचिर्येषु ते शान्तरागरुचयस्तैः, यद्वा शान्तो नाम नवमरसस्तस्य रागः- परमा प्रीतिस्तस्य रुचिर्येषु ते तथा तैः। परमाश्च ते अणवश्च परमाणवस्तै *र्निर्मापित इत्यत्र ण्यन्तत्वेन परमाणुभिरित्यत्र करणे तृतीयाव्याख्यानादीश्वरकर्तृकत्वं यद्यप्याक्षेपाल्लभ्यते, तथापि संवाहयतीत्यादिषु स्वार्थेऽपि ण्यन्तत्वस्य उचितत्वात् तत्तद्द्रव्यक्षेत्रकालभावानां साचिव्येनैव कार्यद्रव्योपपत्तेरीश्वरकल्पनाया अन्यथासिद्धत्वाच्च, अत एव शान्तरागरुचिभिरित्यत्र न ण्यन्तत्वम्, ईश्वरकर्तृकत्वे तु तत्रापि ण्यन्तत्वप्रसङ्गादित्यन्यत्र विस्तरः। ललामेति तिलकस्थानीयं माल्यं ललाम उच्यते। 'प्रभ्रष्टकं शिखालम्बि, पूरोन्यस्तं ललामकं' (अभि. का. ३, श्लो. ३१६) इति श्रीहेमसूरयः।*

"ललाम च ललामं च, लाम्बनध्वजवाजिषु।
मृगे प्रधाने भूषायां, रम्ये वालधिपुङ्ख्योः ॥१॥"

*इति **विश्वः**। इति द्वादशवृत्तस्यार्थः ॥ १२॥*

અર્થ : હે ત્રણ ભુવનના અદ્વિતીય લલામ તુલ્ય ! શાન્ત રસથી ચમકતા જે પરમાણુઓવડે આપ નિર્માયા છો, તે પરમાણુઓ પણ પૃથ્વીને વિષે નિશ્ચે તેટલા જ છે, કારણ કે આપની સમાન બીજું રૂપ નથી.

❋ ❋ ❋

अथ भगवद्रूपैकदेशेनापि उपमानामसाम्यमाह -

वक्त्रं क्व ते सुरनरोरगनेत्रहारि
निःशेषनिर्जितजगत्त्रितयोपमानम्।
बिम्बं कलङ्कमलिनं क्व निशाकरस्य
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥

दण्डान्वयः - सुरनरोरगनेत्रहारि निःशेषनिर्जितजगत्त्रितयोपमानम्

ते वक्त्रम् क्व? कलङ्कमलिनम् निशाकरस्य बिम्बम् क्व? यद् वासरे पाण्डुपलाशकल्पम् भवति।

द्वौ क्वशब्दौ महदन्तरं सूचयतः। हे नाथ ! ते-तव वक्त्रं-मुखं क्व? च-पुनः तत् निशाकरस्य बिम्बं क्व वर्तते? इत्यन्वयः। अनयोः सर्वथा सामान्यं लौकिकप्रतिपादितं युक्त्या न घटते एवेति वाक्यार्थः।

'वर्तते' इति क्रियापदम्। किं कर्तृ? 'वक्त्रं' वदनम्। कस्य? 'ते' तव। किंविशिष्टं वक्त्रम्? 'सुरनरोरगनेत्रहारि' सुरा-देवा नरा-मनुष्या उरगा-नागकुमारा देवाः, उपलक्षणाद् भवनपति-व्यन्तर-ज्योतिष्कादयः, तेषां नेत्राणि-नयनानि हरति-आक्षिपति-रञ्जयतीत्येवंशीलम्। पुनः किंवि. वक्त्रम्? 'निःशेषनिर्जितजगत्त्रितयोपमानं' वक्त्रस्य उपमानानि कमल-चन्द्र-दर्पणादीनि सर्वाणि तानि निर्जितानि-अवगणितानि, तेभ्योऽधिकशोभाकारित्वात्।

द्वितीयान्वयेऽपि 'वर्तते'(इति) क्रियापदम्। किं कर्तृ? 'बिम्बं' मण्डलम्। कस्य? 'निशाकरस्य' चन्द्रस्य । किंवि. बिम्बम्? 'कलङ्कमलिनं' श्यामतारूपदूषितम्। तदिति किं तत्? बिम्बं वासरे पाण्डुपलाशकल्पं भवतीत्यन्वयः।
'भवति' इति क्रियापदम्। किं कर्तृ? 'बिम्बम्'। किंवि. बिम्बम्? 'पाण्डुपलाशकल्पं' जीर्णपत्रतुल्यम्। कदा? 'वासरे' दिवसे ।।

अथ समासा :- सुराश्च नराश्च उरगाश्च सुरनरोरगाः, सुरनरोरगाणां नेत्राणि सुरनरोरगनेत्राणि, तानि हरतीति सुरनरोरगनेत्रहारि । *अत्र उद्गीर्ण - यष्टि-उपलादि-शब्दवत् हृञ्धातोरपि मनोहरेत्यादौ अर्थविशेषप्रत्यायकत्वेन औदार्यगुणकारित्वान्न दुष्टता।* त्रयोऽवयवा अस्य त्रितयं, जगतस्त्रितयं जगत्त्रितयं, जगत्त्रितये उपमानानि जगत्त्रितयोपमानानि, निर्गतं शेषादिति निःशेषं *तत्पुरुषः*, निःशेषं निर्जितानि जगत्त्रितयोपमानानि येन तन्निःशेषनिर्जितजगत्त्रितयोपमानम्। कलङ्केन मलिनं कलङ्कमलिनम्। *कलङ्केतिपदं दोषाभिप्रायसूचकम्।* निशां करोतीति निशाकरः, *'संख्याहर्.' इत्यादि सिद्धहेम (अ. ५, पा. १, सू. १०२) सूत्रात् टप्रत्ययः*, तस्य निशाकरस्य। पाण्डु च तत् पलाशं च पाण्डुपलाशं, ईषद्-असमाप्तं

पाण्डुपलाशं पाण्डुपलाशकल्पम्। *ईषदसमाप्तौ कल्पप्प्रत्ययः। 'पलाशं छदनं बर्हं पत्रं' (अभि. का. ४ श्लो. १८९) इति हेमसूरयः॥ इति त्रयोदशकाव्यार्थः॥ १३॥*

અર્થ : દેવ-મનુષ્ય અને નાગકુમારના નેત્રને હરણ કરનારું તથા સમગ્રપણે ત્રણે જગતની ઉપમાને જિતનારું એવું આપનું મુખ ક્યાં? (અને) કલંકથી મલિન એવું ચન્દ્રનું બિંબ ક્યાં? (કે) જે (ચન્દ્ર બિંબ) દિવસે ફીક્કા ખાખરાના પાન જેવું થાય છે.

* * *

अथ गुणसम्पदं वर्णयन्नाह।

सम्पूर्णमण्डलशशाङ्ककलाकलाप-
शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति।
ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं
कस्तान् निवारयति सञ्चरतो यथेष्टम्? ॥१४॥

दण्डान्वयः - हे त्रिजगदीश्वर ! सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः तव गुणाः त्रिभुवनम् लङ्घयन्ति, ये एकम् नाथम् संश्रिताः तान् यथेष्टम् सञ्चरतः कः निवारयति।

हे त्रिजगदीश्वर ! -हे त्रिभुवनस्वामिन्! तव गुणास्त्रिभुवनं लङ्घयन्ति इति सम्बन्धः।

'लङ्घयन्ति' इति क्रिया, अतिक्रामन्ति इत्यर्थः। के कर्तारः? 'गुणाः', स्वभावजा ज्ञानादयोऽपि विभावजा औदार्यादयो धर्माः। किं कर्मतापन्नम्? 'त्रिभुवनं' जगत्त्रयम्। किंवि. गुणाः? 'सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः' सम्पूर्णमण्डलः-पूर्णिमासमुद्गतः शशाङ्कः-चन्द्रस्तस्य कला-अंशास्तेषां कलापः-समूहः तद्वदुज्ज्वलाः।

अत्र अन्योक्तिहेत्वलङ्कारयोः सङ्करेणाह-ये एकं नाथं संश्रिताः इत्यन्वयः। 'संश्रिताः' इति क्रियापदम्। के कर्तारः? 'ये' जनाः। कं कर्मतापन्नम्? 'नाथं' स्वामिनम्। किंवि. नाथम्? 'एकं' अद्वितीयं-असाधारणम्।

यत्तदोर्नित्याभिसम्बन्धात् तान् जनान् को निवारयति? इत्यन्वयः।

'निवारयति' इति क्रियापदम्। कः कर्ता? 'कः' पुरुषः। कान् कर्मतापन्नान्? 'तान्'। किं कुर्वतस्तान्? 'यथेष्टं' यथेच्छया 'सञ्चरतः' प्रसरतः। तथाच समर्थस्वामिसेवकानां न कोऽपि कुत्रापि प्रतिरोधकः स्यादिति भवद्गुणानां स्वैरं प्रचारो युक्तः, सर्वोऽपि जनस्त्वद्गुणलिप्सुरिति भावः॥

अथ समासा :- सम्पूर्णं मण्डलं यस्य स सम्पूर्णमण्डलः, स चासौ शशाङ्कश्च सम्पूर्णमण्डलशशाङ्कः, तस्य कलाः, सम्पूर्णमण्डलशशाङ्ककलाः- तासां कलापः सम्पूर्णमण्डलशशाङ्ककलाकलापः, तद्वत् शुभ्राः सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः। त्रयाणां भुवनानां समाहारस्त्रिभुवनं, *पात्रादित्वान्न ईप्। लङ्घयन्तीत्यत्र 'प्रायः सर्वे चुरादयः' इति न्यायात् त्र्यन्तत्वम्। संश्रिता इत्यत्र वृश्रित्रश्च (?) कितः नेट्।* त्रयाणां जगतां समाहारस्त्रिजगत् *द्विगुः*, त्रिजगत ईश्वरस्त्रिजगदीश्वरस्तस्य सम्बोधने हे त्रिजगदीश्वर ! *'एकशब्दः सङ्ख्यान्यासहायाद्वितीये (यादि) षु वर्तते' इति बृहद्वृत्तिः। निवारयतीत्यत्र 'वर निवारणे' धातुः स्वार्थे त्र्यन्तः। सञ्चरत इत्यत्र तृतीयोपपदाभावान्नात्मनेपदम्। अत्र शशाङ्कशुभ्रा इत्यनुक्त्वा कलाकलापशुभ्रा इत्युक्तिः शशाङ्के श्यामलतासद्भावात् कलाकलापे तदसम्भवेनातिधवलत्वज्ञापनायेति।* इष्टं अनतिक्रम्येति यथेष्टम्। *'यथाशब्दोऽसादृश्ये' इत्यव्ययीभावः। इति चतुर्दशवृत्तार्थः ॥१४॥*

અર્થ : હે ત્રણ જગતના ઇશ્વર ! સંપૂર્ણ મંડળવાળા (પૂર્ણિમાના) ચન્દ્રની કળાના સમૂહ જેવા ઉજ્જવળ આપના ગુણો ત્રણ વિશ્વને ઓળંગે છે. (કારણ કે) જેઓ એક નાથને આશ્રીને રહ્યા હોય તેમને ઇચ્છા પ્રમાણે વિચરતાં કોણ અટકાવે?

❊ ❊ ❊

अथ प्रथमतो रागस्य दुर्जयत्वात् तज्जयमाह

चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि-
र्नीतं मनागपि मनो न विकारमार्गम्।
कल्पान्तकालमरुता चलिताचलेन
किं मन्दराद्रिशिखरं चलितं कदाचित्? ॥१५॥

दण्डान्वयः - यदि त्रिदशाङ्गनाभिः ते मनः मनाग् अपि विकारमार्गम् न नीतम् अत्र किम् चित्रम्? चलिताचलेन कल्पान्तकालमरुता किम् कदाचित् मन्दराद्रिशिखरम् चलितम्?

हे वीतराग ! चित्रं किमत्र यदि ते-तव मनस्त्रिदशाङ्गनाभिर्विकारमार्गं न नीतं इत्यन्वयः।

'नीतं' इति अशुद्धं क्रियापदम्। काभिः कर्त्रीभिः? 'त्रिदशाङ्गनाभिः' देववधूभिः। किं कर्म? 'मनः' चित्तम्। पुनः किं कर्म? 'विकारमार्गं' विषयरूपकुपथं, तद्वशं इत्यर्थः। *द्विकर्मको 'णी प्रापणे' धातुः, तत्रापि मन इत्यत्र प्रथमा, 'न्यादीनां कर्मणो मुख्यस्योक्तत्वं प्रत्यया' दिति वचनात्।*

हे वीतराग! अत्र-अस्मिन् अर्थे किं चित्रं भवति? न किमप्याश्चर्यम्। 'भवति' इति क्रियापदम्। किं कर्तृ? 'चित्रम्'। कथम्? 'मनागपि' अल्पमपि। *'उषा निशान्ते। अल्पे किञ्चिन्मनागीषच्च किञ्चन' इति* ***हैम****कोषः (का. ६, श्लो. १७२)।*

अत्रार्थे सन्देहपूर्वकं दृष्टान्तालङ्कारेण उपमां योजयति-कल्पान्तकालमरुता किं मन्दराद्रिशिखरं कदाचिच्चलितम्? अपितु न चलितमित्यन्वयः।

'चलितम्' इति क्रियापदम्। किं कर्तृ? 'मन्दराद्रिशिखरं' मन्दरनाम्नः पर्वतस्य श्रृङ्गम्। केन करणेन? 'कल्पान्तकालमरुता' युगान्तवायुना। *करणे तृतीया, 'गत्यर्था.' (सा. सू. १२७१) इति सूत्रेण, 'गत्यर्थाकर्मकपिबभुजेः' इति* ***हैम*** *(अ. ५, पा. १, सू. ११) सूत्रेण चलधातोर्गत्यर्थत्वेन कर्तरि क्तप्रत्ययः प्राप्तः।* कथंभूतेन कल्पान्तकालमरुता? 'चलिताचलेन' कम्पितान्यपर्वतेन। यथा कल्पान्तवातेन मेरुशिखरं कदाचिदपि-कस्मिन्नप्यवसरे न क्षोभमेति, तथा तवापि मनो देवीभिर्न योगमार्गात् क्षोभितमित्यर्थः॥

अथ समासा :- त्रिदशानां अङ्गनाः त्रिदशाङ्गनास्ताभिः। विकारस्य मार्गः विकारमार्गस्तम्। कल्पस्य अन्तः कल्पान्तः, स चासौ कालश्च कल्पान्तकालः, तस्य मरुत् कल्पान्तकालमरुत् तेन। चलिता अचला यस्मात् स चलिताचलस्तेन। मन्दरश्चासौ अद्रिश्च मन्दराद्रिः, तस्य शिखरं मन्दराद्रिशिखरम्। *कस्मिन्*

काले कदा, सामान्ये चित्प्रत्ययः। अत्र मरुतेत्यत्र कर्तरि तृतीया, तथा चलिता अचला येनेति अन्तर्भूतण्यन्तविवक्षया तृतीयाबहुव्रीहिणा व्याख्या कोशल्यां वर्तते। इति पञ्चदश-काव्यार्थः॥ १५॥

અર્થ : (હે પ્રભુ !) જો દેવાંગનાઓવડે આપનું મન જરા પણ વિકારના માર્ગ પ્રત્યે લઇ જવાયું નહિ, એમાં શું આશ્ચર્ય છે? (કાંઇપણ આશ્ચર્ય નથી. કારણ કે) પર્વતોને કંપાવનાર પ્રલયકાળના વાયુવડે શું ક્યારે પણ મેરુપર્વતનું શિખર કંપાવાયું છે. (નહિ જ.)

❊ ❊ ❊

अथ रागपराजयं उक्त्वा द्वेषपराजयमाह

निर्धूमवर्तिरपवर्जिततैलपूरः
कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि।
गम्यो न जातु मरुतां चलिताचलानां
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥

दण्डान्वयः- हे नाथ ! निर्धूमवर्त्तिः अपवर्जिततैलपूरः इदम् कृत्स्नम् जगत्त्रयम् प्रकटीकरोषि चलिताचलानाम् मरुताम् जातु न गम्यः जगत्प्रकाशः त्वम् अपरः दीपः असि।

हे नाथ! त्वं अपरः दीपः असि इति अन्वयः। 'असि' इति क्रियापदम्। कः कर्ता? 'त्वम्'। किं विशिष्टस्त्वम्? 'दीपः'। किं विशिष्टो दीपः? 'अपरः' अपूर्वः - अन्यदीपेभ्यो विसदृशधर्मा। कथमित्याह किंवि. त्वम्? 'निर्धूमवर्तिः' धूमः-कार्ये कारणोपचाराद् धूमहेतुः अग्निः, स च बाह्यो वह्निः, आन्तरः क्रोधः, अग्निर्माणवक इति प्रतीतेः, क्रोधितस्य मुखेऽपि श्यामलिकादेर्दर्शनाच्च, अत एव तेजोलेश्यावतां मुखाद् धूमनिर्गमोऽप्यागमे गीयते, वर्तयः-कामदशा दश कामशास्त्रप्रसिद्धाः-

अभिलाष १ श्चिन्ता २ स्मरणे ३ गुणकीर्तनं ४ तथोद्वेगः ५।
प्रलपन ६ मुन्मादो ७ रुग् ८ जडता ९ मृत्यु १० स्मरदशा स्ताः॥१॥

तद्रहितः। पुनः किंवि. त्वम्? 'अपवर्जिततैलपूरः' तैलं चात्र स्नेहः, *'तैलं स्नेहोऽभ्यञ्जनं च' (का. ३, श्लो. ८१) इति हेमसूरयः,* स्नेहश्चात्राध्यात्मिकः पितृमातृभ्रात्रादिषु सांसारिकोऽनुरागस्तस्य पूरः-समूहस्तद्रहितः।

पुनर्हे नाथ! त्वं कृत्स्नं जगत्त्रयं इदं प्रकटीकरोषि इत्यन्वयः। 'प्रकटीकरोषि' इति क्रियापदम्। प्रकाशयसीत्यर्थः। कः कर्ता? 'त्वम्'। किं कार्यम्? 'जगत्त्रयं' त्रिभुवनं ऊर्ध्वाधस्तिर्यग्लोकलक्षणम्। किं जगत्त्रयम्? 'कृत्स्नं' सकलम्। पुनः किं. जगत्त्रयम्? 'इदं' प्रत्यक्षम्।

तथा पुनर्हे नाथ ! त्वं जातु-कदाचित् मरुतां न गम्योऽसि। 'असि' इति क्रियापदम्। कः कर्ता? 'त्वम्'। किंविशिष्टस्त्वम्? 'गम्यो न' न आक्रमणीयः - पराभवनीयः। केषाम्? 'मरुतां' दुष्टोपसर्गकारिदेवानाम्। किं. मरुताम्? 'चलिताचलानां' कम्पितगिरीणां, बलवतामित्याशयः। लोकप्रसिद्धो हि दीपो धूमवर्तियुक्तः, तैलपूरसहितः, किञ्चित्स्थानभागस्य प्रकाशकः, अन्यच्च मरुतां-वातानां गम्यो विनाश्यः स्यात्; त्वं तु एतादृशो नासि, तथापि 'लोगपइवाणम्' (शक्रस्तवे) इत्यागमिकैः स्तूयसे। पुनः किं० त्वम्? 'जगत्प्रकाशः' भुवनावभासी॥

अथ समासा :- धूमश्च वर्तिश्च धूमवर्ती, धूमवर्तिभ्यां निर्गतः निर्धूमवर्ति स्तत्पुरुषः, *'प्रात्यव०' इति (अ. ३, पा.१, सू. ४७) सिद्धहैमसूत्रात् समासः,* तैलस्य पूरस्तैलपूरः, अपवर्जितस्तैलपूरो येन सः अपवर्जिततैलपूरः। जगतां त्रयं जगत्त्रयम्। अप्रकटं प्रकटं करोषि प्रकटीकरोषि, *अभूततद्भावे च्विप्रत्ययः।* गन्तुमर्हो गम्यः। चलिता अचला येन ते चलिताचलास्तेषाम्। जगत्सु प्रकाशो यस्य स जगत्प्रकाशः। *अत्र केषाञ्चिन्नेत्रोपनेत्रादीनां वस्तुप्रकटताकारित्वेऽपि न तादृक् प्रकाशकत्वं भावतोऽपि श्रुतज्ञानिनां जगत्प्रकटताकारित्वेऽपि न केवलप्रकाशवत्त्वम्, भगवति तु जगत्प्राकट्यहेतुत्वं केवलज्ञानित्वेन जगत्प्रकाशकत्वमित्युभयमस्तीति न पुनरुक्तिः, यद्वा स्तुतौ तस्या न दोष इति बोध्यम्॥ इति षोडशकाव्यार्थः॥१६॥*

અર્થ : હે નાથ ! (દ્વેષરૂપી) ધૂમાડા વગરના (અને કામદશા રૂપી) વાટ રહિત તથા સ્નેહ રૂપી તેલને પૂરવાનું તજનાર એવા આપ આ સમગ્ર ત્રણ જગતને પ્રગટ

કરો છે (તથા) પર્વતને કંપાવનાર એવા વાયુને ક્યારે પણ અગમ્ય એવા (તથા) જગતમાં પ્રકાશ કરનાર આપ અલૌકિક દીવારૂપ છો.

* * *

अथ जगत्प्रकाशकत्वमेव सूर्योपमाया निरासेन प्रकटयन्नाह

नास्तं कदाचिदुपयासि न राहुगम्यः
स्पष्टीकरोषि सहसा युगपज्जगन्ति ।
नाम्भोधरोदरनिरुद्धमहाप्रभावः
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥

दण्डान्वयः- कदाचित् अस्तम् न उपयासि, राहुगम्यः न, सहसा युगपत् जगन्ति स्पष्टीकरोषि अम्भोधरोदरनिरुद्धमहाप्रभावः न, मुनीन्द्र! लोके सूर्यातिशायिमहिमा असि।

हे मुनीन्द्र ! ऋषीणां स्वामिन् ! लोके त्वं सूर्यातिशायिमहिमाऽसि इत्यन्वयः।

'असि' इति क्रियापदम्। कः कर्ता? 'त्वम्'। अकर्मको धातुः। किंवि. त्वम्? 'सूर्यातिशायिमहिमा' आदित्यादधिकमाहात्म्यधरः।

तत् कथमित्याह - हे मुनीन्द्र! यद्-यस्मात् कारणात् त्वं कदाचित् न अस्तं उपयासि - प्राप्नोषि। 'उपयासि' इति क्रियापदम् । कः कर्ता? 'त्वम्' । किं कर्म? 'अस्तं' मरणं । *"दिष्टान्तोऽस्तं कालधर्मः" (अभि. का. २, श्लो. २३८) इति हैमपादाः।* कथम्? 'कदाचित्' कस्मिंश्चिदपि समये, सिद्धत्वेन जरामरण-रहितत्वात्।

पुनः कथमित्याह-हे मुनीन्द्र! त्वं सहसा युगपत् जगन्ति स्पष्टीकरोषि इति संबन्धः। 'स्पष्टीकरोषि' इति क्रियापदम्। प्रकटानि कुरुषे इत्यर्थः। कः कर्ता? 'त्वम्'। कानि कर्माणि? 'जगन्ति' सर्वभुवनानि। किंवि. त्वम्? 'न राहुगम्यः' राहुरत्र लक्षणया तमः - पापं ग्राह्यं, तस्य जातावेकवचनं, तेन न गम्यः - आक्रमणीयो नैव। पुनः किंवि० त्वम्? 'अम्भोधरोदरनिरुद्धमहाप्रभावः'

अम्भोधरा अत्र स्नेहधारिणः स्वजनास्तेषां उदरे-मध्येऽपि निरुद्धो-व्यपगतः प्रभावः - तेजः - स्वरूपं यस्य स ईदशो नैव, संसारमध्ये वसन्नपि न कर्मलिप्तः, ''पुरिसवरपुंडरीयाणम्'' इति (शक्रस्तव) वचनात् इति भावः। सूर्यस्तु सदैव अस्तं याति, राहुगम्यो भवति, क्रमेण जगदेकदेशं प्रकाशयति, अम्भोधरोदरनिरुद्धमहाप्रभावः-मेघपटलव्यालुप्तप्रकाशो भवति; हे मुनीन्द्र ! त्वं तु ततोऽन्यस्वरूप इत्यतः सूर्यादधिक इत्यर्थः॥

अथ समासा :- अस्तमित्यव्ययं नाशार्थे। राहोर्गम्यो राहुगम्यः। अस्पष्टानि स्पष्टानि करोषि स्पष्टीकरोषि, केवलज्ञानेन सर्वलोकालोकप्रकाशकत्वात्। सहसा शीघ्रार्थे, युगपत् समकालार्थेऽव्ययम्। अम्भो धरन्तीति अम्भोधराः, तेषां उदरं अम्भोधरोदरं, तत्र तेन वा निरुद्धः अम्भोधरोदरनिरुद्धः, महांश्चासौ प्रभावश्च महाप्रभावः, अम्भोधरोदरनिरुद्धः महाप्रभावो यस्य स तथा। सूर्यं अतिशेते इत्येवंशीलः सूर्यातिशायी, सूर्यातिशायी महिमा यस्य स तथा, *समासान्तविधेरनित्यत्वात् नात्र समासान्तः।* मुनीनां इन्द्र इव इन्द्रः मुनीन्द्रः, तत्सम्बोधनं हे मुनीन्द्र! ॥ *इति सप्तदशकाव्यार्थः ॥१७॥*

અર્થ : આપ કોઈ પણ વખત અસ્તને પામતા નથી. (તથા) રાહુ વડે અગમ્ય, (તથા) તત્કાળ એક સાથે ત્રણ જગતને પ્રગટ કરો છો. તથા મેઘના મધ્ય ભાગ વડે નહિ રોકાયેલા મહાપ્રભાવવાળા, (તેથી) હે મુનીશ્વર જગતમાં સૂર્યથી અધિક મહિમાવાળા આપ છો !

❊ ❊ ❊

अथ चन्द्रादपि भगवतोऽतिशयमाह

नित्योदयं दलितमोहमहान्धकारं
गम्यं न राहुवदनस्य न वारिदानाम्।
विभ्राजते तव मुखाब्जमनल्पकान्ति
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥

दण्डान्वयः - नित्योदयम् दलितमोहमहान्धकारम् राहुवदनस्य न

गम्यम् वारिदानाम् न अनल्पकान्ति जगत् विद्योतयत् तव मुखाब्जम् अपूर्वशशाङ्कबिम्बम् विभ्राजते।

हे मुनीन्द्र ! तव मुखाब्जं अपूर्वशशाङ्कबिम्बं विभ्राजते इत्यन्वयः।

'विभ्राजते' शोभते इति क्रियापदम्। किं कर्तृ? 'मुखाब्जं' वदनकमलम्। कस्य? 'तव' भवतः। किंविशिष्टम्? 'नित्योदयं' अहर्निशं सश्रीकम्, यद्वा उत्-प्राबल्येन अयः-शुभभाग्यं तद्युक्तम्। पुनः किंवि.? 'दलितमोहमहान्धकारं' निरस्तं अज्ञानरूपं तिमिरं (येन तत्)। पुनः किं.? 'राहुवदनस्य' राहुशब्देन अत्र कालः, अथ (वा) दुर्वादिवादः तस्य मुखस्य न आक्रमणीयं, कर्तरि षष्ठी, तथा 'वारिदानां न गम्यं,' वारिदाश्चात्र कामस्नेहदृष्टिरागास्त्रयोऽपि ग्राह्याः, तेषामपि परवशो नैव।

पुनः किं.? 'अनकल्पकान्ति' प्रबलप्रकाशम्। तथा मुखाब्जं किं कुर्वत्? 'जगत् विद्योतयत्' (विश्वं) प्रकाशयत्। अत एव पुनः किं. वि.? 'अपूर्वशशाङ्कबिम्बं' लोके दृश्यमानचन्द्रबिम्बादन्यस्वरूपं चन्द्रबिम्बं, तत्तुल्यमित्यर्थः, दृश्यमानं हि चन्द्रबिम्बं नित्योदयं न, नापि मोहतिमिरपराकरणसमर्थं, तथा राहुवदनं (नस्य) पराभवनीयं, लोकैकदेशप्रकाशकं चेति युक्तं अपूर्वत्वम्।।

अथ समासा :- नित्यं उदयो यस्य स तत् नित्योदयं, *'नेर्ध्रुवे' इत्यनेन त्यप्रत्ययः सिद्धहैमे (अ. ६, पा. ३, सू. १७)।* महांश्चासौ अन्धकारश्च महान्धकारः, मोह एव महान्धकारः मोहमहान्धकारः, दलितो मोहमहान्धकारो येन तद् दलितमोहमहान्धकारम्। राहोर्वदनं राहुवदनं, तस्य राहुवदनस्य। वारि ददत इति वारिदास्तेषाम्। मुखमेव अब्जं मुखाब्जम्। न अल्पा अनल्पा, (अनल्पा) कान्तिर्यस्य तत्। न पूर्वं अपूर्वं, शशाङ्कस्य बिम्बं शशाङ्कबिम्बं, अपूर्वं च तत् शशाङ्कबिम्बं च अपूर्वशशाङ्कबिम्बम्।। *इति अष्टादशकाव्यार्थः।।१८।।*

અર્થ : નિરંતર ઉદયપામતું મોહ રૂપી અંધકારનો નાશ કરનારું, રાહુના મુખને અગમ્ય, મેઘને પણ અગમ્ય, ઘણી કાન્તિવાળું તથા સમગ્ર જગતને પ્રકાશિત કરતું અપૂર્વ ચન્દ્રબિંબ જેવું આપનું મુખ કમળ શોભે છે.

❊ ❊ ❊

अथ भगवद्वर्णने जगति तन्मयत्वं पश्यन्नित्याह

किं शर्वरीषु शशिनाऽह्नि विवस्वता वा?
युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ !।
निष्पन्नशालिवनशालिनि जीवलोके
कार्यं कियज्जलधरैर्जलभारनम्रैः? ।।१९।।

दण्डान्वयः- हे नाथ ! तमस्सु युष्मन्मुखेन्दुदलितेषु शर्वरीषु शशिना वा अह्नि विवस्वता किम् जीवलोके निष्पन्नशालिवनशालिनि जल-भारनम्रैः जलधरैः कियत् कार्यम्?।

हे नाथ ! शर्वरीषु शशिना किं कार्यं भवति? अथवा अह्नि विवस्वता-सूर्येण किं कार्यं भवति? इति वाक्यद्वयम्।

'भवति' इति क्रियापदम्। किं कर्तृ ? 'कार्यम्' । केन ? 'शशिना' चन्द्रेण। कासु? 'शर्वरीषु' रात्रिषु । 'वा' अथवा। केन? 'विवस्वता' सूर्येण । कस्मिन् ? 'अह्नि' दिवसे। उभाभ्यामपि न किञ्चित् कार्यमिति भावः। केषु सत्सु? 'तमस्सु युष्मन्मुखेन्दुदलितेषु' सत्सु, तमस्सु अन्धकारेषु युष्माकं वदनचन्द्रेण पराकृतेषु सत्सु।

अत्र दृष्टान्तमाह - हे नाथ ! जलधरैः कियत् कार्यं भवति इत्यन्वयः। 'भवति' इति क्रियापदम्। किं कर्तृ? 'कार्यम्'। किंविशिष्टं कार्यम्? 'कियत्' किंपरिमाणम्, स्तोकमपि कार्यं नैवेत्यर्थः। कैः करणैः? 'जलधरैः'। किंवि. जलधरैः ? 'जलभारनम्रैः' अतीव जलभृतैः। कस्मिन् सति? 'जीवलोके' प्रत्यक्षे मर्त्यलोके 'निष्पन्नशालिवनशालिनि' सम्पन्नधान्यक्षेत्रैः शोभमाने सति। धान्येषु निष्पन्नेषु न मेघप्रयोजनम्, तथा त्वन्मुखप्रभाप्रकाशिते जगति न चन्द्रेण सूर्येण (वा) कार्यमिति भावः। अत्र मुखप्रकाशेन सूर्याचन्द्रमसोर्यद्यपि वस्तुतो न निरर्थकत्वं तथापि कवेस्तथाभावोल्लासान्न दोषः,

"तदोजसस्तद्यशसः स्थिताविमौ
वृथेति चित्ते कुरुते यदा तदा।

तनोति भानोः परिवेषकैतवात्
तदा विधिः कुण्डलनां विधोरपि ॥१॥''

— *वंशस्थम्०*

इति नैषधीय (स. १, श्लो. १४) वचनात्।

तथा हे नाथ ! इत्यत्रैकवचनेन युष्मन्मुखेन्दु० इत्यत्र बहुत्वेन असङ्गतिस्तथापि 'सुता न यूयं किमु तस्य राज्ञः' इति महाकाव्येषु एकस्मिन्नर्थेऽपि बहुत्वस्य युक्तत्वान्न दुष्टम्॥

अथ समासा :- शशः अस्यास्तीति शशी, तेन। विवस-ओजो अस्यास्तीति विवस्वान्, तेन। मुखमेव इन्दुर्मुखेन्दुः, युष्माकं मुखेन्दुर्युष्मन्मुखेन्दुः, तेन दलितानि युष्मन्मुखेन्दुदलितानि तेषु। शालीनां वनानि शालिवनानि, निष्पन्नानि च तानि शालिवनानि च निष्पन्नशालिवनानि, तैः शालते-शोभते इत्येवंशीलो निष्पन्नशालिवनशाली, तस्मिन्। जीवानां लोको जीवलोकः, तस्मिन्। जलानि धरन्तीति जलधराः, तैः। जलानां भारो जलभारः, नमनशीला नम्राः, जलभारेण नम्रा जलभारनम्राः, तैः। *शशिनेत्यादौ तृतीया किमित्यव्यययोगात् ॥ इति काव्यार्थः ॥१९॥*

અર્થ : હે નાથ ! જો પાપરૂપ અંધકાર આપના મુખરૂપી ચન્દ્ર વડે હઠી જતો હોય, તો રાત્રિને વિષે ચન્દ્ર વડે શું ? અથવા દિવસે સૂર્ય વડે શું કાર્ય છે ? જેમ દુનિયામાં પાકેલા ચોખાથી લચી પડતાં વનો હોય તો જળના ભારથી નમી ગયેલા મેઘ વડે શું કાર્ય છે?

❋ ❋ ❋

अथ दृश्यमानज्योतिर्मयपदार्थादधिकत्वं प्रतिपाद्य मतान्तरीयाभ्युपगतदेवेभ्योऽधिकत्वं दर्शयन्नाह

ज्ञानं यथा त्वयि विभाति कृतावकाशं
नैवं तथा हरिहरादिषु नायकेषु।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं
नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥

दण्डान्वयः - **कृतावकाशम् ज्ञानम् यथा त्वयि विभाति तथा**

हरिहरादिषु नायकेषु न एवम् यथा स्फुरन्मणिषु तेजः महत्त्वम् याति एवम् तु किरणाकुले अपि काचशकले न।

हे नाथ ! त्वयि ज्ञानं विभाति इति सम्बन्धः। 'विभाति' शोभते इति क्रियापदम्। किं कर्तृ? 'ज्ञानं' यथार्थो वस्त्ववबोधः। कस्मिन्? 'त्वयि' भवति। किंवि. ज्ञानम्? 'कृतावकाशं' (कृतः-) विहितः अवकाशः- स्थानं प्रकाशो वा येन तत्।

यत्तदोरभिसम्बन्धात् तथा-तेन प्रकारेण हरिहरादिषु ज्ञानं न विभाति इत्यन्वयः। योजना प्राग्वत्। केषु? 'हरिहरादिषु' कृष्णेश्वरप्रमुखेषु। किंवि.? 'नायकेषु' देशाधिपत्येन प्रसिद्धेषु लोकैर्देवत्वेन स्थापितेषु।

अत्रार्थान्तरन्यासमाह-तेजो यथा स्फुरन्मणिषु महत्त्वं याति-प्राप्नोति। 'याति' इति क्रियापदम्। किं कर्तृ? 'तेजः' कान्तिजालम्। किं कर्म? 'महत्त्वं' माहात्म्यं गौरवं वा। केषु? 'स्फुरन्मणिषु' महारत्नेषु-इन्द्रनीलादिषु। कथम्? यथा येन प्रकारेण तथा काचशकले तेजः महत्त्वं-शोभां मूल्यं वा न यातीति। किंवि. काचशकले? 'किरणाकुले' कान्तिव्याप्तिमति। 'अपि' विस्मये, एवं अवधारणे, तुशब्दोऽत्यन्तवैलक्षण्यद्योतकः। *अत्र केचिदज्ञाः त्वयेत्यत्र एकवचनेन हरिहरादिष्वित्यत्र बहुत्वेन उपमाभ्रमात् काचशकलेनार्हन्तं स्फुरन्मणिभिर्हरिहरादीनुपमार्थं दूषयन्ति तदयुक्तं, अर्थान्तरन्यासे तददोषात्। अत्रैव 'वक्तुं गुणान्' इति (चतुर्थ) काव्ये 'गुणान्' इत्यत्र बहुत्वं 'अम्बुनिधिं' इति एकत्वं; तथा त्रिदशाङ्गनाभिरित्यत्र बहुत्वं मरुतेत्यत्र एकत्वं; तथा-शशिना विवस्वता वा इत्यत्र एकत्वं, जलधरैरित्यत्र बहुत्वम्, कल्याणमन्दिरस्तवेऽपि सामान्यतोऽपि इति अस्मादृशामिति बहुत्वं कौशिकशिशुरित्यत्र एकत्वं इति महाकवीनां बहुस्थलेषु तथाप्रवृत्तेः, अथवा व्याख्यान्तरं-यथा तु अयि पदच्छेदात् हे नाथ ! तुशब्दद्वयं महदन्तरे अस्ति, अयीति आमन्त्रणे, नायकेषु युष्मासु इत्यत्र बहुत्वं अनधिकारप्राप्तं, प्राच्यकाव्ये युष्मन्मुखेन्दु० इत्यत्रोक्तयुष्मच्छब्देनान्वयात्, न चैतदयुक्तं, किरातार्जुनीयत्रयोदशसर्गे (श्लो. ५३) ''चञ्चलं वसु नितान्तमुन्नता'' इति काव्यवृत्तौ घण्टापथे 'अन्यश्लोकगतो भवच्छब्दोऽत्र विभक्तिपरिणामेन द्रष्टव्यः, अन्यथा मध्यमपुरुषः स्यात्' इत्येवं अन्वय-*

योजनस्य उक्तत्वात्। एतानि च यैः शान्तरागरुचिभिरित्यादीनि ज्ञानमित्यादिकाव्यान्तानि प्रातः पठ्यमानानि बुद्धिसम्पद्वृद्धये भवन्तीति सूरिमन्त्र कल्पे।।

अथ समासा :- कृतः अवकाशो येन तत् कृतावकाशम्। हरिश्च हरश्च हरिहरौ, तौ आदौ येषां ते हरिहरादयस्तेषु। स्फुरन्तश्च ते मणयश्च स्फुरन्मणयः, तेषु स्फुरन्मणिषु। महतो भावः महत्त्वम्। काचस्य शकलं काचशकलं, तस्मिन्। किरणैराकुलं किरणाकुलं, तस्मिन्।।

अत्र 'तेजो मणौ समुपयाति यथा महत्त्वं नैवं तु काचशकलेषु रुचाकरेषु' इत्ययमपि पाठोऽस्तीति कश्चित्, तथा च सर्वं सुस्थमिति काव्यार्थः।।२०।।

અર્થ : (હે પ્રભુ !) અનંતપર્યાયવાળા વસ્તુઓને વિષે પ્રકાશ કરનારું કેવળજ્ઞાન જે પ્રકારે આપને વિષે શોભે છે તે પ્રકારે હરિહર વગેરે નાયકોને વિષે એવું શોભતું નથી. જેમ દેદીપ્યમાન મણિયોને વિષે તેજ મોટાઇને પામે છે તેમ કિરણો વડે સહિત એવા પણ કાચના કકડામાં (તેજ) મોટાઈને પામતું નથી.

* * *

अथान्यदेवेभ्य एवाधिकत्वं रचनान्तरेणाह

मन्ये वरं हरिहरादय एव दृष्टा
दृष्टेषु येषु हृदयं त्वयि तोषमेति।
किं वीक्षितेन भवता भुवि येन नान्यः
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ।।२१।।

दण्डान्वयः- हरिहरादयः एव दृष्टाः वरम् मन्ये येषु दृष्टेषु हृदयम् त्वयि तोषम् एति वीक्षितेन भवता किम् येन नाथ ! भुवि भवान्तरेपि अन्यः कश्चिद् मनः न हरति ।

हे नाथ ! अहं तद् वरं मन्ये ।

'मन्ये' इति क्रियापदम्। कः कर्ता? 'अहम्'। किं कर्मतापन्नम् ? 'तत्' हरिहरादिदर्शनम्। किंवि.? 'वरं' प्रधानम्।

तच्छब्देन यच्छब्दापेक्षयाऽऽह-यत् मया हरिहरादय एव दृष्टाः।

'दृष्टाः' इति क्रिया.। केन कर्त्रा? 'मया'। के कर्मतापन्नाः? 'हरिहरादयः' कृष्णेश्वरादयो देवाः। कथम्? 'यत्' यदिति अव्ययम्।

अत्रार्थे हेतुमाह-हे नाथ ! येषु दृष्टेषु हृदयं त्वयि तोषमेति-प्राप्नोति इत्यन्वयः।

'एति' इति क्रिया.। किं कर्तृ? 'हृदयं' मनः। कं कर्मतापन्नम्? 'तोषं' हर्षम्। कस्मिन्? 'त्वयि' भवति। केषु सत्सु? 'येषु हरिहरादिषु दृष्टेषु' सत्सु पूर्वं विलोकितेषु सत्सु। पूर्वं हरिप्रमुखान् दृष्ट्वा त्वद्दर्शने मम महत् प्रमोदकारणं सम्पन्नं, तेभ्यः सातिशयगुणत्वात्, लोहाभ्यासवतः स्वर्णदर्शन-वत् इति भावः।

इदमेव भङ्ग्यन्तरेण द्रढयति-हे नाथ ! भवता वीक्षितेन किं स्यादिति सम्बन्धः।

'स्यात्' इति क्रियापदम्। किं कर्तृ? 'किं' हर्षकारणं विशेषतः। केन? 'भवता' त्वया। किं विशिष्टेन? 'वीक्षितेन' दृष्टेन।

तत् कथमित्याह-येन कारणेन भवान्तरेऽपि न अन्यः कश्चिन्मनो हरति-वशीकुरुते इत्यन्वयः।

'हरति' इति क्रियापदम्। कः कर्ता? 'कश्चित् अन्यः' अपरो देवनाथोऽपि। किं कर्मतापन्नम्? 'मनः' चित्तम्। कस्मिन्? 'भवान्तरेऽपि' परभवेऽपि, त्वत्तोऽधिकसौन्दर्यादिगुणवतस्त्रैलोक्येऽपि अभावादिति भावः॥

अथ समासा :- मन्ये इत्यव्ययं तिबन्तप्रतिरूपकम्। हरिश्च हरश्च हरिहरौ, तौ आदी येषां ते हरिहरादयः। एकस्माद् भवादन्यो भवो भवान्तरं तस्मिन्, *मयूरव्यंसकादित्वात् समासः। दृष्ट्वा भवन्तमित्यादिना काव्येनास्य पौनरुक्त्यं न ज्ञेयं, निन्दास्तुतित्वेन विषयभेदादिति काव्यार्थः॥२१॥*

અર્થ : (હે સ્વામી !) હરિહરાદિક દેવો જોવાયા તે સારું થયું એમ હું માનું છું (કેમકે) જે હરિહરાદિક દેવો જોવાથી મારું મન તમારે વિષે સંતોષને પામે છે. જોવાયેલા એવા તમારા વડે શું ફળ? (કે જે તમને જોવાથી હે નાથ !) આ પૃથ્વી પર અન્યભવમાં પણ બીજો કોઇપણ દેવ મારા મનને નહીં હરે.

❋ ❋ ❋

अथ केचित् परमेष्ठिनमलक्षजन्मत्वादनादिमाहुस्तन्मतनिरासेन जिनमातरं वर्णयन्नाह -

स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्
नान्या सुतं त्वदुपमं जननी प्रसूता।
सर्वा दिशो दधति भानि सहस्ररश्मिं
प्राच्येव दिग् जनयति स्फुरदंशुजालम्॥२२॥

दण्डान्वयः - स्त्रीणाम् शतानि शतशः पुत्रान् जनयन्ति त्वदुपमम् सुतम् अन्या जननी न प्रसूता, सर्वाः दिशः भानि दधति प्राची एव दिक् स्फुरदंशुजालम् सहस्ररश्मिम् जनयति।

हे नाथ ! स्त्रीणां शतानि शतशः पुत्रान् जनयन्ति-प्रसुवते इति सम्बन्धः। 'जनयन्ति' इति क्रियापदम्। कानि कर्तॄणि? 'स्त्रीणां शतानि' बहवो नार्यस्तत्स्वभावात्। कान् कर्मतापन्नान्? 'शतशः' बहुशतानि 'पुत्रान्' तनयान्।

तथापि हे नाथ ! त्वदुपमं सुतं अन्या काचित् स्त्री न प्रसूता-न सुषुवे इत्यन्वयः। 'प्रसूता' इति क्रिया.। का कर्त्री? 'अन्या' जननी-माता, तव जनन्याः मरुदेव्याः इति शेषः। किं कर्म. ? 'सुतम्'। किंवि.? 'त्वदुपमं' तव तुल्यम्। मरुदेव्याः पुत्रत्वं श्रीऋषभप्रभोः परसमयेऽपि प्रसिद्धं, यदुक्तं **भागवते** प्रथमस्कन्धे —

"अष्टमे मरुदेव्यां तु, नाभेर्जात उरुक्रमः।
दर्शयन् वर्त्म धीराणां, सर्वाश्रमनमस्कृतः॥१॥" -- अनु०

अत्रार्थे दृष्टान्तमाह-सर्वा दिशो भानि दधति-धरन्ति इति सण्टङ्कः। 'दधति' इति क्रिया.। काः कर्त्र्यः? 'दिशः सर्वाः' प्राच्यादयः सकलाः काष्ठाः। कानि कर्मतापन्नानि? 'भानि' नक्षत्राणि।

तथापि सहस्ररश्मिं प्राच्येव दिग् जनयति-प्रसूते। 'जनयति' इति क्रिया.। का कर्त्री? 'प्राची दिग्' पूर्वाऽऽशा। कं कर्मतापन्नम्? 'सहस्ररश्मिं' सूर्यम्।

किंवि.? 'स्फुरदंशुजालं' विलसत्किरणसमूहम्। एवकारो निश्चयार्थः। प्राच्येव नान्या दिग् इत्यर्थः॥

अथ समासा :- शतं शतं इति शतशः, *'बह्वादेः (कारकात्) शस्'* *(सा. सू. ६७८)। जनयन्तीत्यत्र 'चल्याहारार्थेङ्बुधयुधप्रुद्रुस्त्रुनशजनः' (अ. ३, पा.३, सू. १०८) इति हैमसूत्रात् परस्मैपदम्।* तव उपमा यस्य स त्वदुपमस्तम्। सहस्रं रश्मयो यस्य स सहस्ररश्मिस्तम्। तथा अंशूनां जालं अंशुजालं, स्फुरद् अंशुजालं यस्य स तथा तम्। अत्र सर्वाश्च ता दिशश्च सर्वादिशः *कर्मधारयः, सर्वा इति पृथक् पदं वा इति, तथा जनयतीत्यत्र नामधातुरिति कोशल्यां दृश्यते। इति काव्यार्थः ॥२२॥*

અર્થ : સેંકડો સ્ત્રીઓ સેંકડો પુત્રોને જન્મ આપે છે (પરંતુ) આપના જેવા પુત્રને બીજી માતાએ જન્મ આપ્યો નથી. (કેમકે) સર્વદિશાઓ નક્ષત્રોને ધારણ કરે છે. (પરંતુ) પૂર્વ જ દિશા દેદીપ્યમાન કિરણોના સમૂહવાળા સૂર્યને ઉત્પન્ન કરે છે.

❊ ❊ ❊

अथ लब्धजन्मत्वेन ऋषभस्य भगवतो न परमपुरुषत्वं, किन्तु परमपुरुषस्य अंशावतारोऽयं हयग्रीवादिवदिति परमतं दूषयन्नाह -

त्वामामनन्ति मुनयः परमं पुमांस-
मादित्यवर्णममलं तमसः परस्तात्।
त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥

दण्डान्वयः- मुनयः त्वाम् परमम् पुमान्सम् आदित्यवर्णम् अमलम् तमसः परस्तात् आमनन्ति त्वाम् एव सम्यक् उपलभ्य मृत्युम् जयन्ति मुनीन्द्र ! शिवपदस्य शिवः अन्यः पन्थाः न ।

हे मुनीन्द्र !-योगिनां स्वामिन् ! त्वां मुनयः परमं पुमांसमामनन्ति इत्यन्वयः। 'आमनन्ति' अभ्यस्यन्ति इति क्रियापदम्। के कर्तारः? 'मुनयः'। कं कर्म? 'त्वाम्'। किंवि. त्वाम्? 'परमं पुमांसं' सत्त्वरजस्तमोगुणातीतं

त्रिजगद्ध्येयं निर्विकारम्। पुनः किंवि. त्वाम्? 'आदित्यवर्णं' सूर्यप्रभं (भगवतोऽपि सुवर्णवर्णत्वात्)। कथम्? 'पुरस्तात्' (अग्रे)। कस्य? 'तमसः' अस्पष्टातिनिबिडान्तरान्धकारस्य अज्ञानस्य (परस्तादिति पाठे तमोविषयात् दूरे इत्यर्थः)। पुनः किं. त्वां? 'अमलं' निर्मलज्योतिष्मन्तम्।

योगिनो ध्यानान्तस्त्वामेव सम्यग् उपलभ्य मृत्युं जयन्तीति संबन्धः। 'जयन्ति' इति क्रिया.। के कर्तारः? 'मुनयः'योगभाजः। कं कर्मतापन्नम्? 'मृत्युं' कालम्। अजरामरा भवन्ति इति भावः। किं कृत्वा? 'त्वां सम्यग् उपलभ्य' त्वत्स्वरूपं यथार्थतया ज्ञात्वा, त्वद्ज्ञानाभावे योगस्यापि विफलत्वात् नाजरामरत्वं मुनीनां स्यात्, अत एवोक्तमन्यैः-

''ज्ञानिनो धर्मतीर्थस्य, कर्तारः परमं पदम्।
गत्वाऽऽगच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥१॥'' -- अनु०

तेनात्र एवोऽवधारणे। अत्र व्यतिरेकमाह-हे मुनीन्द्र! भवतः अन्यः शिवपदस्य पन्था नास्ति। 'अस्ति' इति क्रिया.। कः कर्ता? 'पन्थाः' मार्गः। कस्य? 'शिवपदस्य' मोक्षस्थानस्य। किंवि.? 'शिवः' निरुपद्रवः। कथंभूतः? भवतः 'अन्यः' अपरः, अतो मुक्तिकारणत्वेन त्वमेव परमः पुमान् इति निर्णयः, न च जन्यरूपत्वान्न तथेति वाच्यं, परैरपि 'मनुष्यजन्माऽपि सुरासुरान् गुणैर्भवान् भवोच्छेदकरैः करोत्यधः' इति माघकाव्ये पुराणपुरुषस्य तथैवोक्तेः॥

अथ समासा :- *'म्ना अभ्यासे' धातुः। मन इत्यादेशः।* परा मा-ज्ञानं यस्य स परमः तम्। आदित्य(स्येव) वर्णो यस्य स तम्। न विद्यते मलो यस्मिन् सः अमलः तम्। शिवं च तत् पदं च शिवपदं तस्य। मुनीन्द्र इति प्राग्वत्। *तमस इत्यत्र 'रिरिष्टास्तात्' (अ. २, पा. २, सु.८२) इति हैमसूत्रात् षष्ठी॥ इति काव्यार्थः॥२३॥*

અર્થ :- મુનીઓ આપને ઉત્કૃષ્ટ પુરુષરૂપ, સૂર્ય જેવી કાન્તિવાળા, નિર્મળ (અને) અંધકારથી દૂર રહેલા માને છે. (તથા) તમને જ સારી રીતે પામીને મૃત્યુને જીતે છે. હે મુનીન્દ્ર ! મોક્ષ પદનો બીજો ઉપદ્રવ રહિત માર્ગ કોઈપણ નથી.

❊ ❊ ❊

अथ सर्वदेवस्वरूपेणापि परमपुरुषत्वमेव द्रढयति

त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं
ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम्।
योगीश्वरं विदितयोगमनेकमेकं
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥

दण्डान्वयः- सन्तः त्वाम् अव्ययम् विभुम् अचिन्त्यम् असंख्यम् आद्यम् ब्रह्माणम् ईश्वरम् अनन्तम् अनङ्गकेतुम् योगीश्वरम् विदितयोगम् अनेकम् एकम् ज्ञानस्वरूपम् अमलम् प्रवदन्ति।

हे मुनीन्द्र ! - भगवन् ! सन्तः- पण्डिताः सत्पुरुषा वा त्वां अव्ययं प्रवदन्ति इत्येवं एकैकं विशेषणं गृहीत्वा अन्वयः। 'प्रवदन्ति' पारम्पर्येण प्रतिपादयन्ति। 'प्रवदन्ति' इति क्रियापदम्। के कर्तारः? 'सन्तः'। कं कर्मतापन्नम्? 'त्वाम्'। किंविशिष्टं त्वाम्? 'अव्ययं' क्षयरहितं, नित्यमित्यर्थः, द्रव्यार्थिकनयापेक्षया जीवस्वरूपेण नित्यत्वात्, 'भाविनि भूतोपचार' इति न्यायेन चरमशरीरभाजः सिद्धत्वेन विवक्षणाद् वा। पुनः किंविशिष्टम्? 'विभुं' तव ज्ञानस्य विश्वप्रकाशकत्वात्, 'इयत्तानवच्छिन्नपरिमाणयोगित्वं विभुत्वं' इति नैयायिकाः, ज्ञानस्य घटादेर्वस्तुनो ग्रहणरूपपरिणामेन केनचित् प्रकारेण साकारत्वेन विश्व-व्यापकत्वस्वीकारणे जैनमतेऽपि तल्लक्षणं न दुष्टमिति, यद्वा विभवति - कर्मोन्मूलने समर्थो भवति (इति) विभुस्तम्। पुनः किंविशिष्टं त्वाम्? अचिन्त्यं' अनाकलनीयस्वरूपं, लोकोत्तरलिङ्गधारित्वात्, परमयोगिभिरपि तव यथास्थितस्वरूपानवधारणात्। पुनः किंविशिष्टं त्वाम्? 'असङ्ख्यं' न विद्यते सङ्ख्यं-युद्धं यस्य स तम्, यद्वा सङ्ख्यया-गुणानां गणनया रहितम्। पुनः किंविशिष्टं त्वाम्? 'आद्यं' आदिपुरुषतया प्रसिद्धं, 'आदिविद्वान् सिद्धः' इति कापिलाः, तीर्थङ्करेष्वाद्यं-प्रथमं वा। पुनः किंविशिष्टं त्वाम्? 'ब्रह्माणं' तीर्थादिकरत्वेन धर्मसृष्टिप्रणयनाद् विधात्तारम्। पुनः किंविशिष्टम्? 'ईश्वरं' त्रैलोक्यपूजनीयत्वेन अनन्यतुल्यैश्वर्यधारिणं, जटाशालित्वेन महाव्रतित्वेन वृषभान्वितत्वेन सुमङ्गलापतित्वेन वा ईश्वरमिव प्रतीयमानं वा। पुनः किंविशिष्टं त्वाम्? 'अनन्तं' अन्तो - मृत्युस्तद्रहितं अनन्तं बलं बलभद्रसाहचर्याद्

विष्णुरूपमित्यर्थः,रामकृष्णयोरैक्यत्वेन प्रतीतत्वात्, अत एव -

'वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ।।१।।' –शार्दूल०

इत्यष्टपद्यामप्युक्तम्। पुनः किं० त्वाम्? 'अनङ्गकेतुं' कन्दर्पस्य नाशकत्वेन केतुतुल्यं, बुद्धदेव मित्यर्थः, बुद्धस्य मारलोकजयित्वेन प्रसिद्धत्वात्। अत एव-

''सुगत एव विजित्य जितेन्द्रिय-
स्त्वदुरुकीर्तितनुं यदनाशयत्।
नव तनूमवशिष्टवतीं ततः
समिति भूतमयीमहरद्धरः ।।१।।'' --द्रुतविलम्बितम् ०

इति नैषधीये (स. ४, श्लो. ८०) अपि प्रोक्तम्। पुनः किं.? 'योगीश्वरं' योगिनां ध्येयं, साङ्ख्यमते परमर्षितया प्रसिद्धम्। पुनः किं. त्वां? 'विदितयोगं' ज्ञाताष्टाङ्गयोगमार्गं, नैयायिकमते गौतमं, पातञ्जलिमते पतञ्जलिं वा, योगसाधनवीथीनामुपदेशकत्वेन प्रसिद्धत्वात्। पुनः किं० त्वाम्? 'अनेकं' अनेकगुणसंयुक्तं, सृष्टिकारकं मन्वादिकं वा, केषाञ्चिन्मते सृष्टिकारकाणां मन्वादीनां अनेकत्वात्, इत्यनेन मीमांसकमतसंमतिर्दर्शिता। पुनः किं० त्वाम्? 'एकं' सङ्ग्रहनयापेक्षया जीवद्रव्यस्य एकत्वात्, अत एव 'एगे आया' इति स्थानाङ्गसूत्रम्, परमतेऽपि-

'एक एव हि भूतात्मा, देहे देहे व्यवस्थितः।
एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ।।१।।' - अनु०

इति, अनेन वेदान्तिनां मतं सूचितम्। पुनः किं० त्वाम्? 'ज्ञानस्वरूपं' केवलज्ञानमयं इति, अनेन ज्ञानाद्वैतमतं दर्शितं, तेषां मते ज्ञाता ज्ञेयं च नास्ति, केवलं ज्ञानमेवेति, यद्वा शुद्धबुद्धस्वभाव इत्यौपनिषदमतं ज्ञापितम्। पुनः किं. त्वाम्? 'अमलं' निर्मलं अष्टादशदोषरहितं निर्लेपमात्रं वा इति, अनेन लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपतमतं सूचितम् । सर्वेष्वपि दर्शनेषु तत्तन्नाम्ना तत्तथारूपाध्यवसायेन त्वामेव देवत्वेन तीर्थान्तरीयाः प्रपन्नाः सन्तीति भावः ।।

अथ समासा :- न विद्यते व्ययो यस्य सः अव्ययस्तम्। चिन्तयितुं योग्यश्चिन्त्यः, न चिन्त्योऽचिन्त्यस्तम्। न विद्यते सङ्ख्यं सङ्ख्या वा यस्य सः असङ्ख्यस्तम्। *'युद्धं तु सङ्ख्यं कलिः'* *(अभि. का. ३, श्लो. ४६०) इति हेमपादाः।* आदौ भव आद्यस्तम्। बृंहति-अनन्तानन्देन वर्धते इति ब्रह्मा तम्। न विद्यते अन्तो यस्य स अनन्तस्तम्। अनङ्गस्य केतुरिव केतुरनङ्गकेतुस्तम्। केतुर्धूमकेतुरित्युच्यते, पदैकदेशे पदसमुदायोपचारात्, धूमकेतुग्रहस्तु विनाशाय स्यादिति। योगिनामीश्वरो योगीश्वरस्तम्। विदितो योगो येन स तम्। न एकः अनेकस्तम्। ज्ञानमेव स्वरूपं यस्य स तम्। न विद्यते मलः-कर्मलेपो यस्य सः अमलस्तम्। गभीरार्थं च इदं काव्यं विशेषज्ञेभ्यो ज्ञेयम्॥ इति काव्यार्थः॥२४॥

અર્થ :- સત્પુરુષો આપને અવ્યય, વિભુ, અચિન્ત્ય, અસંખ્ય,પ્રથમ, બ્રહ્મારૂપ ઈશ્વરરૂપ, અનંત, કામદેવનો નાશ કરવામાં કેતુ સમાન, યોગીશ્વર, યોગજ્ઞ, અનેક, અદ્વિતીય, જ્ઞાનસ્વરૂપ (અને) પાપરૂપ મલરહિત કહે છે.

❊ ❊ ❊

अथ बाहुल्येन प्रसिद्धदेवस्वरूपेण वर्णयन्नाह

बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्
त्वं शङ्करोऽसि भुवनत्रयशङ्करत्वात् ।
धाताऽसि धीर ! शिवमार्गविधेर्विधानाद्
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥

दण्डान्वयः- विबुधार्चितबुद्धिबोधात् त्वम् एव बुद्धः भुवनत्रयशंकरत्वात् त्वम् शंकरः असि धीर ! शिवमार्गविधेः विधानात् धाता असि भगवन् ! त्वम् एव व्यक्तम् पुरुषोत्तमः असि।

हे धीर ! त्वमेव बुद्धोऽसि इत्यन्वयः। 'असि' इति क्रिया. । कः कर्ता ? 'त्वम्' । किंविशिष्टः? 'बुद्धः' बुद्धनामा बौद्धानां देवः, कृष्णस्य बुद्धावतारो वा । एवकारो अत्र निर्णये । कस्मात् ? 'विबुधार्चितबुद्धिबोधात्' विबुधैः-

पण्डितैर्देवैर्वा अर्चिता-सम्मानिता या बुद्धिः-ज्ञानं तस्य (बोधात्-) प्रकाशात्, यथार्थतया बुद्धत्वं त्वयि एव घटते इत्यर्थः।

हे धीर ! त्वं शंङ्करोऽसि इत्यन्वयः प्राग्वत्। (किंविशिष्टः शंङ्करः ईश्वरः)। कस्मात्? 'भुवनत्रयशङ्करत्वात्' जगत्त्रितयसुखकारित्वात्। हे धीर ! त्वं धाताऽसि। कस्मात्? 'शिवमार्गविधेर्विधानात्' मोक्षमार्गरूपो यो विधिः-धर्माचारः तस्य निष्पादनात्। हे भगवन् ! त्वं पुरुषोत्तमः व्यक्तः-प्रकटमेव असि, सर्वपुरुषेषु त्वत्तो नान्यः पुरुषोत्तमः, जगद्वन्द्यत्वेन त्वं पुरुषोत्तमो निश्चीयत एवेति न तत्र हेतोरपेक्षा इति, अनेन शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, सर्वज्ञो बुद्ध इति बौद्धा इत्युपासते, तेऽपि त्वामेव प्रपन्नाः सन्तीति सूचितम् ॥

अथ समासा :- विबुधैरर्चिता विबुधार्चिता, सा चासौ बुद्धिश्च विबुधार्चितबुद्धिस्तस्य बोधो विबुधार्चितबुद्धिबोधस्तस्मात्। शं-सुखं करोतीति शङ्करः, भुवनानां त्रयं भुवनत्रयं, तस्य शङ्करो भुवनत्रयशङ्करस्तस्य भावः शङ्करत्वं तस्मात्। शिवस्य मार्गः शिवमार्गः, तस्य विधिः शिवमार्गविधिस्तस्य। भगो ज्ञानं अस्यास्तीति भगवान्, तस्यामन्त्रणं हे भगवन्!। पुरुषेषु उत्तमः पुरुषोत्तमः ॥ इति काव्यार्थः ॥ २५ ॥

અર્થ :- હે દેવોથી પૂજાયેલા પ્રભુ ! પદાર્થોમાં બુદ્ધિનો પ્રકાશ કરવાથી આપ જ બુદ્ધ નામના દેવ છો, ત્રણ ભુવનના પ્રાણીઓને સુખકરનાર હોવાથી આપ જ શંકર છો. હે ધીર ! મોક્ષમાર્ગની વિધિના બતાવવાથી ધાતા આપ જ છો. (તથા) હે ભગવાન ! આપ જ પ્રગટ રીતે પુરુષોત્તમ છો.

※ ※ ※

सर्वदेवस्वरूपत्वं व्याख्याय भगवतो नमस्कारं कुर्वन् निर्णयमुद्घोषयति -

तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !
तुभ्यं नमः क्षितितलामलभूषणाय।
तुभ्यं नमस्त्रिजगतः परमेश्वराय
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥

दण्डान्वयः- हे नाथ ! त्रिभुवनार्तिहराय तुभ्यम् नमः क्षितितलामलभूषणाय तुभ्यम् नमः त्रिजगतः परमेश्वराय तुभ्यम् नमः जिन ! भवोदधिशोषणाय तुभ्यम् नमः।

हे नाथ ! तुभ्यं नमः। अस्त्विति शेषः। 'अस्तु' इति क्रिया.। किं कर्तृ? 'नमः' प्रणामः। कस्मै? 'तुभ्यं' भवते। नमःशब्दयोगे चतुर्थी। किंलक्षणाय तुभ्यं? 'त्रिभुवनार्तिहराय' त्रिजगतः पीडानिवारकाय, बाह्या-रोगादयः आन्तराः-कर्मोद्भवाः पीडास्तासां तव नाम्ना विनाशात्। पुनः हे नाथ ! तुभ्यं नमः। किंविशिष्टाय तुभ्यम्? 'क्षितितलामलभूषणाय' भूलोकालङ्करणाय। पुनः हे नाथ! तुभ्यं नमः। किंविशिष्टाय? 'त्रिजगतः परमेश्वराय' त्रैलोक्यनायकाय। पुनः हे जिन! तुभ्यं नमः। कथंभूताय? 'भवोदधिशोषणाय' संसारसागरलाघवकारकाय। एतद्विशेषणचतुष्टयेन अर्हतोऽसाधारणधर्मरूपं लक्षणं निवेदितं, परमताङ्गीकृतदेवेषु तथास्वरूपाभावात्॥

अथ समासा :- त्रयाणां भुवनानां समाहारः त्रिभुवनं, *पात्रादित्वान्न ईप्*, त्रिभुवनस्य आर्तिस्त्रिभुवनार्तिस्तां हरतीति त्रिभुवनार्तिहरस्तस्मै। क्षितेस्तलं क्षितितलं, अमलं च तद् भूषणं च अमलभूषणं, क्षितितले अमलभूषणमिव क्षितितलामलभूषणं तस्मै। *'सिंहाद्यैः पूजायाम्' (अ.३,पा.१,सू.८९) इति हैमवचनात् तत्पुरुषः।* त्रयाणां जगतां समाहारस्त्रिजगत्, *द्विगुः* (तस्य)। परमश्चासावीश्वरश्च परमेश्वरस्तस्मै। उदधिरिव उदधिः, भवश्चासौ उदधिश्च भवोदधिः, *उपमितिसमासः, 'उपमेयं व्याघ्राद्यैः' (अ.३,पा.१,सू.१०२) इति हैमवचनात् ।* भवोदधेः शोषणं यस्मात् स भवोदधिशोषणः, तस्मै ॥ *इति काव्यार्थः ॥२६॥*

अर्थ :- હે નાથ ! ત્રણ જગતના જીવોની પીડાને હરનારા આપને નમસ્કાર હો! પૃથ્વીતલના નિર્મળ આભૂષણ એવા આપને નમસ્કાર હો ! ત્રણ જગતના પરમેશ્વર એવા આપને નમસ્કાર હો ! તથા હે જિનેશ્વર ! સંસાર રૂપી સમુદ્રનું શોષણ કરનાર એવા આપને નમસ્કાર હો !

❊ ❊ ❊

अथ जन्मभाजो गुणदोषसाहचर्यात् कथं परमपुरुषत्वं वृषभजिने भवतीत्याशङ्कां निरस्यन्नाह -

को विस्मयोऽत्र यदि नाम गुणैरशेषै -
स्त्वं संश्रितो निरवकाशतया मुनीश ! ।
दोषैरुपात्तविविधाश्रयजातगर्वैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ।।२७।।

दण्डान्वयः- हे मुनीश । यदि नाम निरवकाशतया अशेषैः गुणैः त्वम् संश्रितः अत्र कः विस्मयः उपात्तविविधाश्रयजातगर्वैः दोषैः कदाचिद् अपि स्वप्नान्तरे अपि न इक्षितः असि।

हे मुनीश! नभिति कोमलामन्त्रणे, यदि त्वं अशेषैः गुणैः संश्रितः-आश्रितः इत्यन्वयः। 'संश्रितः' इति क्रिया०। कैः कर्तृभिः? 'गुणैः' विशुद्धधर्मैः। कः कर्मतापन्नः? 'त्वं' भगवान्। किंविशिष्टैः गुणैः? 'अशेषैः' समस्तैः स्वभावजैः ज्ञानादिभिः विभावजैरौदर्यादिभिः। कया? 'निरवकाशतया' निःस्थानकभावेन, तव तुल्यस्य अन्यस्य अभावात्, स्थानं विना तादृशा गुणाः क्व तिष्ठन्तीति भावः।

हे मुनीश! दोषैः रागद्वेषमोहादिभिः स्वप्नान्तरेऽपि कदाचिदपि न ईक्षितः असि इत्यन्वयः। 'असि' इति क्रियापदम्। कः कर्ता? 'त्वम्'। किंविशिष्टः? 'ईक्षितः'। कैः कर्तृभिः? 'दोषैः'। किं० दोषैः? 'उपात्तविविधाश्रयजातगर्वैः' प्राप्तनानास्थानसमुत्पन्नदर्पैः। कस्मिन्? स्वप्नान्तरेऽपि' स्वापावस्थायामपि। कथम्? 'कदाचिदपि' कस्मिन्नपि काले। दोषरूपाः पुरुषास्त्वां निद्रायामपि न अपश्यन्नित्यर्थः। द्वौ अपिशब्दौ निर्णये स्तः।

हे मुनीश ! अत्र वार्ताद्वयेऽपि विस्मयः कः स्यात् ? अपि तु न कोऽपि स्यादित्यन्वयः। 'स्यात्' इति क्रियापदम्। कः कर्ता? 'विस्मयः' आश्चर्यं, प्रागुक्तलक्षणे वीतरागे त्वयि वार्त्ताद्वयस्य प्रमाणसिद्ध्या (स्थित्या) प्रतीतेरिति भावः, ऋषभो भगवान् परमः पुमान् तमोनाशकत्वमृत्युंजयत्वादिगुणयुक्तत्वात्

सम्प्रतिपन्नवदित्यनुमाने जन्यत्वोपाधेः परैर्दत्तस्य व्याप्तिविघटनाय पुनरनुमानान्तरमत्र सूचितम्-ऋषभो भगवान् परमः पुमान् सकलज्ञानादिगुणवत्त्वाद् निर्दोषत्वाद् वेति, जन्यत्वमुपाधिः संदिग्ध इति ज्ञेयं, तथा च ऋषभो न परमपुरुषः जन्यत्वादिति प्रत्यनुमानं तुच्छं, विपक्षे बाधकतर्काभावात्, वर्द्धमानो न सर्वज्ञः वक्तृत्वात् रथ्यापुरुषवदित्यनुमानप्रयोगवदित्यन्यत्र विस्तरः।।

अथ समासा :- न विद्यते शेषं येषां ते अशेषाः तैः। अवकाशात् निर्गता निरवकाशाः, तेषां भावो निरवकाशता तया। मुनीनां ईशो मुनीशः, तस्यामन्त्रणे हे मुनीश !। विशिष्टा विधाः- प्रकारा येषां ते विविधाः, ते च ते आश्रयाश्च विविधाश्रयाः, उपात्ताश्च ते विविधाश्रयाश्च उपात्तविविधाश्रयाः, तैर्जातो गर्वो येषां ते तथा तैः। स्वप्नस्य अन्तरं स्वप्नान्तरं तस्मिन्। *'नामप्राकाश्यकुत्सयोः' इत्यनेकार्थः।* अत्र केचित् स्वप्नस्य भगवति सम्बन्धं विधाय स्वप्ने सत्यपारमैश्वर्यादिभिः अर्थं दूषयन्ति तदसत्, दोषाणामेव पुरुषधर्मारोपात्, अत एव गर्वोल्लासोऽपि संगच्छते, यद्वा छाद्मस्थ्योऽपि त्वं दोषैः- लोकविरुद्धभावैर्न स्पृष्टः, तर्हि सार्वस्यैतत्प्राप्तिः कुत इति व्याख्येयम्। इति काव्यार्थः।।२७।।

અર્થ :- હે મુનીશ ! બીજે ક્યાંય જગ્યા ન મળવાથી તમામ ગુણો વડે આપ જ આશ્રય કરાયા છો ખરેખર ! એમાં શું આશ્ચર્ય છે? (કેમકે) પ્રાપ્ત થયેલા જુદા જુદા સ્થાનોથી ઉત્પન્ન થયેલા ગર્વવાળા દોષો વડે આપ સ્વપ્નમાં પણ ક્યારેય જોવાયા જ નથી.

❊ ❊ ❊

अथ निश्चयनयेन स्तुत्वा व्यवहारनयेन स्तोतुं प्रातिहार्याण्याह -

उच्चैरशोकतरुसंश्रितमुन्मयूख-
माभाति रूपममलं भवतो नितान्तम्।
स्पष्टोल्लसत्किरणमस्ततमोवितानं
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ।।२८।।

दण्डान्वयः- उच्चैः अशोकतरुसंश्रितम् उन्मयूखम् अमलम् भवतः रुपम् स्पष्टोल्लसत्किरणम् अस्ततमोवितानम् पयोधरपार्श्ववर्ति रवेः बिम्बम् इव नितान्तम् आभाति।

हे मुनीश ! भवतो रूपं उच्चैः आभाति इत्यन्वयः। 'आभाति' शोभते इति क्रिया.। किं कर्तृ? 'रूपं' शरीराकारः। कस्य? 'भवतः' तव। कथम्? 'उच्चैः' अतिशयेन। किंवि०? 'अशोकतरुसंश्रितं' अशोकनामके वृक्षे सामीप्येन आश्रितम्। पुनः किंवि०? 'उन्मयूखं' प्रबलकिरणम्। पुनः किंवि.? 'अमलं' स्वेदादिरहितम्। कथम्? 'नितान्तं' निरन्तरम्। अत्र उपमामाह- इवोपमीयते 'रवेर्बिम्बमिव' इव-यथा रवेर्बिम्बं आभाति। किंवि बिम्बम्? 'स्पष्टोल्लसत्किरणं' प्रकटप्रसरत्कान्ति। पुनः किंवि०? 'अस्ततमोवितानं' विध्वस्तान्धकारपटलम्। पुनः किंवि०? 'पयोधरपार्श्ववर्ति' मेघसमीपस्थम्। अशोकस्य मेघेन भगवद्रूपस्य सूर्यबिम्बेनोपमा ज्ञेया।।

अथ समासा :- उदञ्चति उच्चैः *'न्युञ्च्यां चकैस् (सिद्ध. उणा. १००३) इति साधुः।* न विद्यते शोको यस्मिन् पार्श्वस्थिते इत्यशोकः, *सापेक्षकत्वेऽपि गमकत्वात् समासः,* अशोकश्चासौ तरुश्च अशोकतरुः, तस्मिन् संश्रितं अशोकतरुसंश्रितम्। उत्-ऊर्ध्वं मूयखा यस्य तत् उन्मयूखम्।

''उत् प्राधान्ये प्रकाशे च, प्राबल्यास्थाख्यशक्तिषु।
विभागे बन्धने मोक्षे, भावे लाभोदूर्ध्वकर्मणोः ।।१।।'' - अनु.

इत्यनेकार्थः। तथा रुपं तुं श्लोकशब्दयोः। ''पशावाकारे सौन्दर्ये, नाणके नाटकादिके'' इत्यनेकार्थः। उल्लसन्तश्च ते किरणाश्च उल्लसत्किरणाः, स्पष्टा उल्लसत्किरणा यस्मिन् तत् तथा। तमसां वितानं तमोवितानं, अस्तं तमोवितानं येन तत् तथा।

'वितानं कदके यज्ञे, विस्तारे क्रतुकर्मणि।
तुच्छे मन्दे वृत्तिभेदे, सूत्यावसरयोरपि ।।१।।' - अनु.

तथा 'बिम्बं तु प्रतिबिम्बे स्यात्, मण्डले बिम्बिकाफले' इत्यनेकार्थः। पयो धरतीति पयोधरः, तस्य पार्श्वे वर्तते इति पयोधरपार्श्ववर्ति।। *इति काव्यार्थः।।२८।।*

અર્થ :- ઉંચા અશોકવૃક્ષના આશ્રયે રહેલું અધિક કિરણોવાળુ (અને) નિર્મળ એવું આપનું શરીર, સ્પષ્ટ રીતે દેદીપ્યમાન કિરણોવાળું (તથા) અંધકારના સમૂહનો નાશ કરનારું (તથા) વાદળાની પાસે રહેલું સૂર્યનું બિંબ જેમ શોભે તેમ અત્યંત શોભે છે.

* * *

अथ अशोकं व्यावर्ण्य सिंहासनं व्यावर्णयन्नाह –

सिंहासने मणिमयूखशिखाविचित्रे
विभ्राजते तव वपुः कनकावदातम्।
बिम्बं वियद्विलसदंशुलतावितानं
तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥२९॥

दण्डान्वयः- मणिमयूखशिखाविचित्रे सिंहासने कनकावदातम् तव वपुः वियद्विलसदंशुलतावितानम् तुंगोदयाद्रिशिरसि सहस्त्ररश्मेः बिम्बम् इव विभ्राजते।

हे मुनीश ! सिंहासने तव वपुर्विभ्राजते इत्यन्वयः। 'विभ्राजते' शोभते इति क्रियापदम्। किं कर्तृ? 'वपुः' शरीरम्। कस्य? 'तव'। कस्मिन्? 'सिंहासने' सौवर्णपादपीठे। किंलक्षणे? 'मणिमयूखशिखाविचित्रे' रत्नकिरणाग्रैर्नानावर्णे। किंवि वपुः? 'कनकावदातं' स्वर्णवत् पीतम्। *'अवदातं तु विमले मनोज्ञे सितपीतयोः' इत्यनेकार्थः।* इवोपमीयते। किमिव? 'सहस्त्ररश्मेर्बिम्बं इव', इव-यथा सहस्त्ररश्मेः-सूर्यस्य बिम्बं-मण्डलं विभ्राजते। कस्मिन्? 'तुङ्गोदयाद्रि-शिरसि' उच्चतरपूर्वाचलशिखरे। किंवि. बिम्बम्? 'वियद्विलसदंशुलतावि-तानं' आकाशप्रसरत्किरणरूपवल्लिविस्तारम्॥

अथ समासा :- सिंहोपलक्षितं आसनं सिंहासनं तस्मिन्। मणीनां मयूखास्तेषां शिखास्ताभिर्विचित्रं मणिमयूखशिखाविचित्रं तस्मिन्। कनकमिव कनकं तच्च तत् अवदातं च कनकावदातम्। *'उपमानं सामान्यैः' इति हैम (अ. ३, पा. १, सू. १०१) सूत्रात् समासः।* विलसन्तश्च ते अंशवश्च विलसदंशवः, वियति विलसदंशवो वियद्विलसदंशवः, लता इव लताः, वियद्विलसदंशवश्च ता लताश्च वियद्विलसदंशुलता, *उपमितसमासः,* तासां

वितानं यस्य तत्। उदयत्यत्र इत्युदयः, स चासौ अद्रिः उदयाद्रिः, तुङ्गश्चासौ उदयाद्रिश्च तुङ्गोदयाद्रिः, तस्य शिरस्तस्मिन्। सहस्रं रश्मयो यस्य स सहस्ररश्मिस्तस्य।। *इति काव्यार्थः।।२९।।*

અર્થ :- રત્નની કાન્તિના સમૂહથી ચિત્ર-વિચિત્ર એવા સિંહાસન ઉપર સુવર્ણ જેવું ઉજ્જ્વળ આપનું શરીર, આકાશને વિષે દેદીપ્યમાન કિરણોરૂપ લતા મંડપને ફેલાવનારું (તથા) ઉંચા ઉદયાચલપર્વતના શિખર ઉપર રહેલું સૂર્યનું બિંબ જેમ શોભે તેમ શોભે છે.

* * *

अथ चामरवर्णनमाह —

कुन्दावदातचलचामरचारुशोभं
विभ्राजते तव वपुः कलधौतकान्तम्।
उद्यच्छशाङ्कशुचिनिर्झरवारिधार-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ।।३०।।

दण्डान्वयः- कुन्दावदातचलचामरचारुशोभम् कलधौतकान्तम् तव वपुः उद्यच्छशांकशुचिनिर्झरवारिधारम् शातकौम्भम् सुरगिरेः उच्चैःतटम् इव विभ्राजते।

हे मुनीश ! तव वपुर्विभ्राजते इत्यन्वयः। योजना प्राग्वत्। किंरूपं वपुः? 'कुन्दावदातचलचामरचारुशोभं' कुन्दपुष्पवदुज्ज्वलचलाचलवालव्यजनैर्विशिष्टलक्ष्मीधरम्। पुनः किंरूपम्? 'कलधौतकान्तं' स्वर्णवन्मनोहरम्। किमिव? 'सुरगिरेः उच्चैस्तटमिव' मेरुपर्वतस्य उन्नतं शृङ्गमिव। किंरूपं तटम्? 'उद्यच्छशाङ्कशुचिनिर्झरवारिधारं' उदयं प्राप्नुवन् यः शशाङ्कः तद्वत् शुचयः-उज्ज्वला निर्झराणां वारिधारा-जलप्रवाहा यस्मिन् तत्। पुनः किंरूपं तटम्? 'शातकौम्भं' सुवर्णमयम्। चामराणां निर्झरोपमा भगवद्वपुषो मेरुशृङ्गोपमा ।।

अथ समासा :- कुन्दस्य पुष्पाणि कुन्दानि, *'लुब् बहुलं पुष्पमूले' (सिद्ध. अ. ६ पा. २ सू. ५७) इति तद्धितलूप्,* कुन्दानीव कुन्दानि, तानि च अवदातानि कुन्दावदातानि, तानि च चलानि कुन्दावदातचलानि, तानि च

चामराणि कुन्दावदातचलचामराणि, तैश्चार्वी शोभा यस्य तत्। कलधौतमिव कलधौतं, तच्च तत् कान्तं च कलधौतकान्तम्। उद्यंश्चासौ शशाङ्कश्च उद्यच्छशाङ्कस्तद्वत् शुचयः उद्यच्छशाङ्कशुचयः, निर्झराणां वारीणि निर्झरवारीणि, तेषां धाराः (निर्झर.), उद्यच्छशाङ्कशुचयो निर्झरवारिधारा यत्र तत् तथा। सुराणां गिरिः सुरगिरिस्तस्य। शातकुम्भस्य विकारः शातकौम्भम्॥ *इति काव्यार्थः ॥३०॥*

અર્થ :- મોગરાના પુષ્પ જેવા ઉજ્જવળ (અને) વીંઝાતા બે ચામરો વડે મનોહર શોભાવાળું સુવર્ણ જેવું સુંદર આપનું શરીર, ઉદય પામતા ચન્દ્ર જેવા ઉજ્જવળ ઝરણાના જળની બે ધારાવાળું સુવર્ણમય મેરુગિરિનું ઊંચુ શિખર જેમ શોભે તેમ શોભે છે.

* * *

अथ छत्रस्तवनमाह -

छत्रत्रयं तव विभाति शशाङ्ककान्त-
मुच्चैः स्थितं स्थगितभानुकरप्रतापम्।
मुक्ताफलप्रकरजालविवृद्धशोभं
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥३१॥

दण्डान्वयः- शशाङ्ककान्तम् उच्चैः स्थितम् स्थगितभानुकरप्रतापम् मुक्ताफलप्रकरजालविवृद्धशोभम् त्रिजगतः परमेश्वरत्वम् प्रख्यापयत् तव छत्रत्रयं विभाति।

हे मुनीश! तव छत्रत्रयं विभाति-शोभते इत्यन्वयः। 'विभाति' इति क्रियापदम्। किं कर्तृ? 'छत्रत्रयम्'। किंरूपम्? 'उच्चैः' उपरि 'स्थितम्'। कस्य? 'तव'। किंविशिष्टं छत्रत्रयम्? 'शशाङ्ककान्तं' चन्द्रवन्मनोहरम्। पुनः किंरूपं छत्रत्रयम्? 'स्थगितभानुकरप्रतापं' आच्छादितसूर्यकान्तितेजस्कम्। पुनः किं.? 'मुक्ताफलप्रकरजालविवृद्धशोभं' मौक्तिकसमूहस्य जालं - संदर्भविशेषस्तेन अतिशयितशोभाधरम्। अत्र छत्राणां त्रिसङ्ख्यायामुत्प्रेक्षामाह - किं छत्रत्रयम्? 'त्रिजगतः परमेश्वरत्वं' उत्कृष्टनाथत्वं 'प्रख्यापयत्' सूचयत्-कथयत्, त्रित्वादिति शेषः, भगवान् त्रयाणां जगतां स्वामी अतस्त्रीणि छत्राणि वर्तन्ते इति भावः॥

अथ समासा :- छत्राणां त्रयं छत्रत्रयम्। शशाङ्क इव शशाङ्कस्तच्च तत् कान्तं शशाङ्ककान्तम्। भानोः कराः भानुकराः, तेषां प्रतापो भानुकरप्रतापः, स्थगितो भानुकरप्रतापो येन तत् तथा। मुक्ता एव फलानि मुक्ताफलानि, तेषां प्रकरः-जालं तेन विवृद्धा शोभा यस्य तत् तथा। त्रयाणां जगतां समाहारस्त्रिजगत् तस्य। परमश्चासावीश्वरः (च) परमेश्वरः, तद्भावः परमेश्वरत्वम् ॥ *इति काव्यार्थः ॥३१॥*

અર્થ :- ચન્દ્ર જેવું મનોહર, ઉંચે આપના મસ્તક ઉપર રહેલું, સૂર્યના કિરણોના પ્રતાપને ઢાંકનારું, મોતીની સમૂહની રચનાથી વૃદ્ધિ પામેલી શોભાવાળું (તથા) ત્રણ જગતના પરમેશ્વરપણાને પ્રસિદ્ધ કરતું એવું આપનું છત્રત્રય શોભે છે.

☼ ☼ ☼

अथ चत्वारि प्रातिहार्याण्युक्त्वा अतिशयसम्पदं संक्षेपेणाह -

उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-
पर्युल्लसन्नखमयूखशिखाभिरामौ ।
पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥

दण्डान्वयः- हे जिनेन्द्र ! उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूखशिखाभिरामौ तव पादौ यत्र पदानि धत्तः तत्र विबुधाः पद्मानि परिकल्पयन्ति ।

हे जिनेन्द्र ! - जिननायक ! तव पादौ-चरणौ यत्र स्थले पदानि धत्तः इति सम्बन्धः। 'धत्तः' इति क्रियापदम्। कौ कर्तारौ? 'पादौ'। कानि कर्मतापन्नानि? 'पदानि' भूमौ आकारन्यासरूपाणि।

यत्तदोर्नित्याभिसम्बन्धात् तत्र स्थाने विबुधाः-देवाः पद्मानि-कमलानि परिकल्पयन्ति रचयन्ति-विकुर्वन्ति। 'परिकल्पयन्ति' इति क्रियापदम्। के कर्तारः? 'विबुधाः'। अवसरज्ञताव्यञ्जकमेतत्। कानि कर्मतापन्नानि? 'पद्मानि'। कुत्र? 'तत्र' यत्र तव पादौ पदानि धत्तः। कथंभूतौ पादौ? 'उन्निद्रहेमनवपङ्कजपुञ्ज-

कान्तिपर्युल्लसन्नखमयूखशिखाभिरामौ' एतदर्थः समासादेवेति, स चैवम्- उद्गता निद्रा येषां तानि उन्निद्राणि-विकस्वराणि, सुवर्णस्य नवानि-नूतनानि नव सङ्ख्याकानि वा यानि पङ्कजानि-कमलानि हेमनवपङ्कजानि, उन्निद्राणि च तानि हेमनवपङ्कजानि च उन्निद्रहेमनवपङ्कजानि, तेषां पुञ्जः-समूहस्तस्य प्रभा तया पर्युल्लसन्तो - वृद्धिं गच्छन्तो ये नखानां मयूखाः - कराः उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूखाः, तेषां शिखा - अग्राणि ताभिः अभिरामौ - मनोहरौ उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूख-शिखाभिरामौ। मयूखशब्दः कवर्गीयोपान्त्यः। जिनेषु इन्द्रो जिनेन्द्रः, तत्सम्बोधने हे जिनेन्द्र !॥ अत्र पूर्वार्द्धे समासभूयस्त्वाद् गौडीयरीतिः, परार्द्धे न तथेति वैदर्भी रीतिः, न च रीतिभ्रंशदोषः, वस्तुतः पूर्वार्द्धस्य भिन्नत्वादेव, अत एव सन्धिकार्यमपि न, पादस्य तु रीतिभेदे न दुष्टमिति। अत्र देवकृतः अर्हत्पदस्थाने देवाः स्वर्णमयानि नव पद्मानि स्थापयन्तीत्यतिशयः सूचितः, तदुपलक्षणात् सर्वेऽपि चतुस्त्रिंशदतिशया ज्ञेयाः *॥ इति काव्यार्थः ॥३२॥*

અર્થ :- હે જિનેન્દ્ર ! વિકસ્વર સુવર્ણના નવીન કમળોના સમૂહની કાન્તિવાળા, (તથા) ચોતરફ પ્રસરતા નખના કિરણોની શ્રેણિવડે મનોહર એવા આપના બે ચરણ જ્યાં ધારણ કરાય છે ત્યાં દેવતાઓ કમળોને રચે છે.

❊ ❊ ❊

अथोपसंजिहीर्षुराह -

इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !
धर्मोपदेशनविधौ न तथा परस्य।
यादृक् प्रभा दिनकृतः प्रहतान्धकारा
तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥३३॥

दण्डान्वयः- हे जिनेन्द्र ! इत्थम् धर्मोपदेशनविधौ यथा तव विभूतिः अभूत्, तथा परस्य न, प्रहतान्धकारा दिनकृतः प्रभा यादृक् तादृक् विकाशिनः अपि ग्रहगणस्य कुतः।

हे जिनेन्द्र ! इत्थं - अनेन प्रकारेण यथा तव विभूतिरभूदित्यन्वयः। 'अभूत्' इति क्रियापदम्। का कर्त्री? 'विभूतिः' समृद्धिः। कस्य? 'तव' कथम्? 'इत्थं' पूर्वोक्तप्रकारेण। कस्मिन्? 'धर्मोपदेशनविधौ' व्याख्यानक्रियायाम्। तथा-तेन प्रकारेण अपरस्य कस्यापि देवस्य न अभूत्, तेन बाह्ययोगमहिम्नाऽपि निश्चीयते यत् त्वमेव परमः पुमानिति, सिंहावलोकनन्यायेन प्रागुक्तं दृढीकृतम्, तेन

''देवागमनभोयान-चामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान्॥१॥''

इति समन्तभद्रोक्तमष्टसहस्त्रीसूत्रं प्रत्याहतं, प्रातिहार्यातिशयप्रमुखबाह्ययोगविभूतेर्भगवद्रूपादिसंसर्गेण वर्णनात् तथारूपा हि विभूतिर्न देवाधिदेवव्यभिचारिणी, मायाविलक्षैरपि भगवद्रूपस्य साम्यं कोट्यंशेनापि न कर्तुं शक्यमित्यास्तां विस्तरः, तथा च सुष्ठूक्तं (वीतरागस्तोत्रे प्र. ४ श्लो. ७) हेमसूरिपादैः-'बाह्योऽपि योगमहिमा, नाप्तस्तीर्थकरैः परै'रिति। अत्र दृष्टान्तमाह दिनकृतः- सूर्यस्य यादृक् प्रभा-कान्तिर्भवति तादृक्-तद्रूपा ग्रहगणस्य प्रभा कुतः कारणात् संभवति? नैव संभवतीत्यर्थः। कथंभूतस्य ग्रहगणस्य? 'विकाशिनोऽपि' प्रकाशवतोऽपि। कथंभूता दिनकृतः प्रभा? 'प्रहतान्धकारा' निरस्ततिमिरा ।।

अथ समासा :- जिनेन्द्र पदे प्राग्वत्। धर्मस्य उपदेशनं धर्मोपदेशनं, तस्य विधिः धर्मोपदेशनविधिस्तस्मिन्। तथा दिनं करोतीति दिनकृत् तस्य। प्रहतं अन्धकारं यया सा प्रहतान्धकारा निरस्ततिमिरा। ग्रहाणां-नक्षत्रादीनां गणो ग्रहगणस्तस्य। विकाशोऽस्यास्तीति विकाशी, तस्य विकाशिनः॥ इति काव्यार्थः ॥३३॥

અર્થ :- હે જિનેન્દ્ર ! આ પ્રમાણે ધર્મના ઉપદેશની વિધિમાં જેવી આપની અતિશય રૂપ સમૃદ્ધિ હતી, તેવી બીજાને (હરિહરાદિક દેવને) ન હોતી (કારણ કે) અંધકારને હણનારા સૂર્યની કાન્તિ જેવી છે તેવી કાન્તિ વિકસ્વર એવા પણ ગ્રહોના સમૂહની ક્યાંથી હોય ? (ન જ હોય.)

❊ ❊ ❊

अथ भगवतः सर्वभयनाशकत्वं वर्णयन्नष्टमहाभयनाशकत्वमाह -

श्च्योतन्मदाविलविलोलकपोलमूल-
मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।
ऐरावताभमिभमुद्धतमापतन्तं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥

दण्डान्वयः- श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमर-नादविवृद्ध- कोपम् ऐरावताभम् उद्धतम् आपतन्तम् इभम् दृष्ट्वा भवदाश्रितानाम् भयं नो भवति ।

हे जिनेन्द्र ! भवदाश्रितानां लोकानां भयं नो भवतीत्यन्वयः। 'भवति' इति क्रियापदम्। किं कर्तृ ? 'भयं' भीतिः। केषाम्? 'भवदाश्रितानां' भवन्तं-त्वां आश्रिताः-स्वामित्वेन प्रपन्नास्तेषां भीतिरपि न, तर्हि कुतो दुःखमिति भावः। किं कृत्वा? 'दृष्ट्वा' विलोक्य। कं कर्मतापन्नम्? 'इभं' हस्तिनम्। किंविशिष्टं इभम्? 'ऐरावताभं' इन्द्रगजसदृशम्, तथा 'उद्धतं' अविनीतम्। किं कुर्वन्तम्? 'आपतन्तं' सम्मुखमागच्छन्तम्। पुनः किंभूतम्? 'श्च्योतन्मदाविलविलोलक-पोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धकोपं' अस्यार्थः समासादेव, स चैवम्-श्च्योतन्-क्षरन् स चासौ मदो-दानं श्च्योतन्मदः, तेन आविला-व्याप्ताः श्च्योतन्मदा-विलाः, कपोलयोः मूले कपोलमूले, विलोले च ते कपोलमूले च विलोलकपोलमूले, भ्रमन्तः-चलन्तश्च ते भ्रमरा-भ्रमद्भ्रमराः, विलोलकपोलमू-लयोः मत्तभ्रमद्भ्रमरा विलोलकपोलमूलमत्तभ्रमंद्भ्रमराः, श्च्योतन्मदाश्च ते विलोलकपोलमूलमत्तभ्रमद्भ्रमराः श्च्योतन्मदा., तेषां नादः-शब्दस्तेन विवृद्धः पुष्टः कोपो-मन्युर्यस्य स तथा तम्। अनेनात्यन्तव्याकुलत्वेन दुर्वारत्वमाह। ऐरा-वतस्य आभेव आभा यस्य स तथा तं, *'उष्ट्रमुखा०' (सिद्ध. अ.३, पा.१, सू.२३) इत्यादिना समासः।* भवन्तं आश्रिताः भवदाश्रिताः तेषाम्॥ *इति काव्यार्थः॥३४॥*

अर्थ :- ઝરતા મદ વડે વ્યાપ્ત અને ચપળ તથા ગંડસ્થળને વિષે મદોન્મત્તપણે ભમતા એવા ભમરાઓના ઝંકાર વડે વૃદ્ધિપામેલા કોપ વાળા (તથા) ઐરાવત હાથી જેવા મોટા, (તથા) ઉદ્ધત (અને) સન્મુખ આવતા હાથીને જોઇને આપના આશ્રિતજનોને ભય થતો નથી.

अथ सिंहभयमाह -

भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त-
मुक्ताफलप्रकरभूषितभूमिभागः ।
बद्धक्रमः क्रमगतं हरिणाधिपोऽपि
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥

दण्डान्वयः- भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकर- भूषितभूमिभागः बद्धक्रमः हरिणाधिपः अपि क्रमगतम् ते क्रमयुगाचलसंश्रितम् न आक्रामति ।

हे जिनेन्द्र ! हरिणाधिपोऽपि ते-तव क्रमयुगाचलसंश्रितं पुरुषं न आक्रामति-न पराभवतीत्यन्वयः। 'आक्रामति' इति क्रियापदम्। कः कर्ता? 'हरिणाधिपः' सिंहोऽपीति, उपलक्षणाद् व्याघ्रादिहिंस्रजीवः। कं कर्मतापन्नम्? ते-तव 'क्रमयुगाचलसंश्रितं' चरणद्वयरूपपर्वतमाश्रितं, पुरुषमिति शेषः। किंभूतम्? 'क्रमगतं' सिंहस्य चरणाग्रे प्राप्तम्। कथंभूतः हरिणाधिपः? 'बद्धक्रमः' शृङ्खलितपादः। पुनः किंविशिष्टो हरिणाधिपः? 'भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तः', (अस्य) अर्थः समासादेव, (स चैवं) भिन्नो-विदारितः स चासौ इभो-हस्ती भिन्नेभः, तस्य कुम्भौ भिन्नेभकुम्भौ, फलानीव फलानि, मुक्ताश्च तानि फलानि च मुक्ताफलानि, शोणितेन-रूधिरेण अक्तानि-खरण्टितानि-शोणिताक्तानि, तानि च तानि मुक्ताफलानि च शोणिताक्तमुक्ताफलानि, उज्ज्वलानि-शुक्लानि च तानि शोणिताक्तमुक्ताफलानि च उज्ज्वलशोणिताक्तमुक्ताफलानि, भिन्नेभकुम्भेभ्यो गलन्ति च तानि उज्ज्वलशोणिताक्तमुक्ताफलानि च भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलानि, तेषां प्रकरः-समूहस्तेन भूषितः-शोभावान् कृतः भूमेर्भागो येन सः। बद्धाः क्रमा यस्य स बद्धक्रमः। (क्रमे गतः) क्रमगतस्तम्। हरिणानां अधिपः हरिणाधिपः। क्रमयोर्युगं क्रमयुगं, अचल इव अचलः, क्रमयुगं स चासौ अचलश्च क्रमयुगाचलः, तं संश्रितः क्रमयुगाचलसंश्रितः तं तथा *॥ इति काव्यार्थः* ॥३५॥

અર્થ :- ભેદેલા હાથીના કુંભસ્થળથી પડતા, ઉજ્જવળ અને રુધિરથી ખરડાયેલા મોતીના સમૂહ વડે પૃથ્વીના ભાગને શોભાવનાર (તથા) ફાળ ભરવા

માટે તૈયાર કરેલા પગવાળો એવો સિંહ પણ (પોતાની એક જ) ફાળમાં આવે તેવા આપના ચરણાચલાશ્રિત (સેવક) ને મારી શકતો નથી.

* * *

अथ वह्निभयनाशमाह —

कल्पान्तकालपवनोद्धतवह्निकल्पं
दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् ।
विश्वं जिघत्सुमिव सम्मुखमापतन्तं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥३६॥

दण्डान्वयः- कल्पान्तकालपवनोद्धतवह्निकल्पम् ज्वलितम् उज्ज्वलम् उत्स्फुलिङ्गम् विश्वम् जिघत्सुम् इव सन्मुखम् आपतन्तम् अशेषम् दावानलम् त्वन्नामकीर्तनजलम् शमयति ।

हे जिनेन्द्र ! त्वन्नामकीर्तनजलं दावानलं शमयतीत्यन्वयः। 'शमयति' विध्यापयति इति क्रियापदम्। किं कर्तृ? 'त्वन्नामकीर्तनजलं' भवदभिधानस्य यत् कीर्तनं-स्तवनं तल्लक्षणं जलं-पानीयम्। कं कर्मतापन्नम्? 'दावानलम्'। ''*दवो दावो वनवह्निः' (अभि. का. ४, श्लो. १६७) इति हेमसूरयः, वनपदसन्निधानादुत्कदत्वं ध्वन्यते*, तदेव स्पष्टयति-कीदृशं दावानलं? 'कल्पान्तकालपवनोद्धतवह्निकल्पं' कल्पान्तकालस्य यः पवनो-वायुस्तेन उद्धतो-दुर्वारो यः वह्निः-अग्निस्तस्य कल्पः-आचारो यस्य, तत्तुल्यमित्यर्थः, *नात्र ईषन्न्यूनार्थे कल्पप्रत्ययः, तथा सती उत्कटताभङ्गात्।* पुनः कीदृशं दावानलम्? 'ज्वलितं' प्रदीप्यमानं-प्रवर्द्धमानावस्थं, न प्रशाम्यन्तमिति भावः। पुनः कीदृशम्? 'उज्ज्वलं' विकासितं-प्रसरमाप्तम्। *'उज्ज्वलस्तु विकाशिनि, शृङ्गारे विशदे दीप्ते' इत्यनेकार्थः (श्लो. १२२६-१२२७), 'उज्ज्वलं रक्तम्' इति कौशल्याम्।* पुनः किंविशिष्टरूपम्? 'उत्स्फुलिङ्गं' वह्निकणैः प्रबलम्। इवोत्प्रेक्षते। पुनः कीदृशम्? 'विश्वं जिघत्सुमिव' जगद्भक्षितुमुत्सुकमिव। किं कुर्वन्तम्? सम्मुखं यथा (स्यात्) तथा आपतन्तं-आगच्छन्तम्, अत्र यद्यपि आपतन्तमित्यनेन सम्मुखत्व-

मुक्तार्थं तथापि सम्मुखपदसन्निधानात् आपतन्तं-शीघ्रमागच्छन्तमित्येवं व्याख्येयम्, अन्यथा पौनरुक्तत्वात्। पुनः कीदृशम्? 'अशेषं' सर्वम् ॥

अथ समासा :- कल्पश्चासौ अन्तश्च कल्पान्तः, स चासौ कालश्च कल्पान्तकालः, तस्य पवनेन उद्धतः स चासौ वह्निश्च तस्य कल्प-आचारो यस्य स तथा तम्। दावश्चासौ अनलश्च दावानलस्तम् (तत्)। उर्ध्वं स्फुलिङ्गा यस्य स तम्। जिघत्सुमित्यत्र अत्तुमिच्छति-जिघत्सति इति जिघत्सुस्तम्। *अद्धातोः 'घस्लृसनद्यतनीघञ्चलि' (अ. ४, पा. ४, सू. १७) इति सिद्धहैमसूत्रात् घस् आदेशो, 'घसृ अदने' धातुर्वा।* तव नाम त्वन्नाम, त्वन्नाम्नः कीर्तनं त्वन्नामकीर्तनं, तच्च तज्जलमिव त्वन्नामकीर्तनजलम्। *शमयतीत्यत्र 'शमोऽदर्शने' (अ. ४, पा. २, सू. २८) हैमसूत्रात् ह्रस्वः ।* न विद्यते शेषं यस्य स अशेषस्तम् *॥ इति काव्यार्थः॥ ३६ ॥*

અર્થ :- પ્રલયકાળના વાયુવડે ઉદ્ધત થયેલા, અગ્નિજેવા જાજ્વલ્યમાન ઊંચી જ્વાળાવાળા, ઉડતા તણખાવાળા, આખા જગતને જાણે ગળી જવાની ઈચ્છાવાળા, સન્મુખ આવતા એવા, (તથા વજ્રાગ્નિ - વીજળી વગેરે) સમસ્ત પ્રકારના દાવાનળને આપના નામરૂપી કીર્તન જળ શમાવે છે.

❊ ❊ ❊

अथ सर्पभयनाशमाह –

रक्तेक्षणं समदकोकिलकण्ठनीलं
क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।
आक्रामति क्रमयुगेन निरस्तशङ्क-
स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥

दण्डान्वयः- यस्य पुंसः हृदि त्वन्नामनागदमनी रक्तेक्षणम् समदकोकिलकण्ठनीलम् क्रोधोद्धतम् उत्फणम् आपतन्तम् फणिनम् निरस्तशङ्कः क्रमयुगेन आक्रामति।

हे मुनिनाथ ! जिनेन्द्र ! यस्य पुंसः हृदि त्वन्नामनागदमनी भवतीत्यन्वयः। 'भवति' इति क्रियापदम्। का कर्त्री? 'त्वन्नामनागदमनी'। भवतो यदभि (धानं

तदेव नागदमनी-सर्पदमनकारिणी यस्य जनस्य हृदि हृदये वर्त्तते स) फणिनं क्रमयुगेन आक्रामति-पराभवतीत्यन्वयः। 'आक्रामति' इति क्रियापदम्। कः कर्ता? 'सः' पुरुषः। कं कर्मतापन्नम्? 'फणिनं' सर्पम्। फणिनमित्युक्त्या अतिभीषणता सूचिता। तामेवाह -'रक्तेक्षणं' आरक्तलोचनम्। पुनः किंविशिष्टम्? 'समदकोकिलकण्ठनीलं' मदेन-स्मयेन युक्तो यः कोकिलः-पिकस्तस्य कण्ठवन्नीलं-श्यामम्। पुनः किंविशिष्टम्? 'क्रोधोद्धतं' कोपदुर्धरम्। पुनः किं.? 'उत्फणं' उत्-ऊर्ध्वं फणाधारिणम्। किं कुर्वन्तम्? 'आपतन्तं' शीघ्रमागच्छन्तम्। केन आक्रामति? 'क्रमयुगेन' पद्युगलेन । भयं विना पद्भ्यां संघट्टते इत्यर्थः। कीदृशः स पुरुषः? 'निरस्तशङ्कः' सर्वथा भयवर्जितः॥

अथ समासा :- रक्ते ईक्षणे यस्य स तम्। मदेन सह वर्तते यः स समदः, स चासौ कोकिलश्च समदकोकिलः, तस्य कण्ठस्तद्वन्नीलः समदकोकिलकण्ठनीलः तम्। क्रोधेन उद्धतः क्रोधोद्धतः तम्। फणा अस्यास्तीति फणी तम्। उत्-ऊर्ध्वं फणा यस्य स उत्फणः तम्। क्रमयोर्युगं क्रमयुगं तेन। निरस्ता शङ्का यस्य स निरस्तशङ्कः। तव नाम त्वन्नाम, नागा दम्यन्ते यया सा नागदमनी, त्वन्नामैव नागदमनी त्वन्नामनागदमनी॥ *इति काव्यार्थः ॥ ३७ ॥*

અર્થ :- જે પુરુષના હૃદયને વિષે આપના નામરૂપી નાગદમની રહેલી છે તે પુરુષ, રક્ત નેત્રવાળા મદોન્મત્ત કોયલના કંઠ જેવા શ્યામવર્ણવાળા ક્રોધથી ઉદ્ધત થયેલા ઊંચી ફણાવાળા (અને) સન્મુખ આવતા એવા સર્પને શંકારહિત થયેલો પોતાના બન્ને પગ વડે આક્રમણ કરે (સ્પર્શે) છે.

❊ ❊ ❊

अथात्यन्तघोरत्वेन युद्धभयनाशं काव्यद्वयेनाह —

वल्गत्तुरङ्गगजगर्जितभीमनाद-
माजौ बलं बलवतामपि भूपतीनाम् ।
उद्यद्दिवाकरमयूखशिखापविद्धं
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥३८॥

दण्डान्वय :- आजौ वल्गत्तुरङ्गगजगर्जितभीमनादम् बलवताम् अपि भूपतीनाम् बलम् त्वत्कीर्तनात् उद्यद्दिवाकरमयूखशिखापविद्धम् तम इव आशु भिदाम् उपैति।

हे जिनेन्द्र ! आजौ-सङ्ग्रामे त्वत्कीर्तनात् भूपतीनां बलं आशु-शीघ्रं भिदां उपैतीत्यन्वयः। 'उपैति' प्राप्नोति इति क्रियापदम्। किं कर्तृ? 'बलं' सैन्यम्। कां कर्मतापन्नाम्? 'भिदां' विनाशम्। (कथम्?) 'आशु' शीघ्रम्। बलं केषाम्? 'भूपतीनां' राज्ञाम्। कस्मात्? 'त्वत्कीर्तनात्' तव स्तवनात्। कस्मिन्? 'आजौ' सङ्ग्रामे। कथंभूतानां भूपतीनाम्? 'बलवतां' ओजस्विनाम्। कीदृशं बलम्? 'वल्गत्तुरङ्गगजगर्जितभीमनादं' वल्गन्तो-मिलन्तो ये तुरङ्ग-अश्वा गजा-हस्तिनस्तेषां गर्जितानि तैर्भीमो-रौद्रो नादः-शब्दो यत्र तत्। इवोपमीयते। किमिव? तम इव। यथा तमः- अन्धकारं भिदां उपैति। किं विशिष्टं तमः? 'उद्यद्दिवाकरमयूखशिखापविद्धं' उद्यन्-उदयं प्राप्नुवन् यः दिवाकरः-सूर्य-स्तस्य मयूखाः-किरणाः तेषां शिखा-अग्राणि ताभिरपविद्धं-पराहतम्।।

अथ समासा :- तुरङ्गाश्च गजाश्च तुरङ्गगजं, सेनाङ्गत्वादेकवद्भावः, वल्गच्च तत् तुरङ्गगजं च वल्गत्तुरङ्गगजं, तस्य गर्जितानि वल्गत्तुरङ्गगजगर्जि-तानि, तैः भीमो नादो यत्र तत्। बलं येषां ते बलवन्तस्तेषाम्। भुवः पतयो भूपतयस्तेषाम्। उद्यंश्चासौ दिवाकरश्च उद्यद्दिवाकरः, तस्य मयूखा उद्यद्दिवाक-रमयूखाः, तेषां शिखास्ताभिः अपविद्धं उद्यद्दिवाकरमयूखशिखापविद्धम्। तव कीर्तनं त्वत्कीर्तनं तस्मात् ।। *इति काव्यार्थः ।। ३८ ।।*

अर्थ :- युद्धने विषे दोडता घोडाओवाळुं, हाथीओना गर्जारव (तथा) योद्धाओना भयंकर नादवाळुं, बळवान एवा पण राजाओनुं सैन्य, आपनुं नाम ग्रहण करवाथी ज उदय पामता सूर्यना किरणोना अग्रभाग वडे वींधायेला अंधकारनी जेम शीघ्र पणे नाशने पामे छे.

किञ्च —

कुन्ताग्रभिन्नगजशोणितवारिवाह-
वेगावतारतरणातुरयोधभीमे।
युद्धे जयं विजितदुर्जयजेयपक्षा-
स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ।।३९।।

दण्डान्वय :- कुन्ताग्रभिन्नगजशोणितवारिवाह-वेगावतारतरणातुर-योधभीमे युद्धे विजितदुर्जयजेयपक्षाः त्वत्पादपङ्कजवनाश्रयिणः जयम् लभन्ते।

हे जिनेन्द्र! पुरुषा युद्धे जयं लभन्ते इत्यन्वयः। 'लभन्ते' इति क्रियापदम्। के कर्तारः? 'पुरुषाः' इत्यध्याहारः। कं कर्मतापन्नं? 'जयं' सर्वतोऽभ्युदयम्। कीदृशाः पुरुषाः? 'त्वत्पादपङ्कजवनाश्रयिणः' तव चरणस्वरूपकमलवनाश्रयभाजः। कमलवनाश्रयात् अत्यन्तसौकुमार्यख्यापनेन लीलयैव जयप्राप्तिरित्यतिशयालङ्कारः। पुनः कीदृशाः पुरुषाः? 'विजितदुर्जयजेयपक्षाः' पराभूतदुर्द्धरवैरिसमूहाः। कस्मिन्? 'युद्धे'। कीदृशे? 'कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधभीमे'। अस्यार्थः समासादेव, स चैवम्-कुन्ता-भल्लास्तेषां अग्राणि तैर्भिन्ना - विदारिता ये गजास्तेषां शोणितानि-रुधिराणि तान्येव वारीणि-जलानि तेषां वाहाः - प्रवाहास्तेषु वेगेन अवतार-उत्तरणं तस्मात् तरणं-प्लवनं तैरातुरा-व्याकुला ये योधाः-सुभटास्तैर्भीमं तस्मिन्, तथा जेतुं योग्या जेयास्तेषां पक्षा जेयपक्षाः, दुर्-दुःखेन जीयन्ते इति दुर्जयास्ते च ते जेयपक्षाश्च दुर्जयजेयपक्षाः, विजिता दुर्जयजेयपक्षा यैस्ते विजितदुर्जयजेयपक्षाः। *अत्र 'क्षय्यजय्यौ' (अ. ४, पा. ३, सू. ९०) इति हैमसूत्रात् जय्य इति स्यादेवं न चिन्त्यं, जेतुं शक्यो जय्यः शत्रुरिति शक्यार्थविषयत्वात् तस्य, अत्र तु जेतुं अशक्यानामपि पक्षाणां विजयस्य वाच्यत्वात् अत एव दुर्जय इति विशेषणं युक्तमिति न तथा ।।*

अथ समासा :- तव पादौ त्वत्पादौ, पङ्काज्जायन्त इति पङ्कजानि, तेषां वनं-पङ्कजवनं, त्वत्पादावेव पङ्कजवनं त्वत्पादपङ्कजवनं, तत् आश्रयन्ते इत्येवंशीलाः त्वत्पादपङ्कजवनाश्रयिणः।। *इति काव्यार्थः।। ३९ ।।*

અર્થ :- ભાલાના અગ્રભાગવડે ભેદાયેલા હાથીના રૂધિરરૂપી જળપ્રવાહમાં શીઘ્રપણે પ્રવેશ કરીને તરવામાં આતુર થયેલા યોદ્ધાઓથી ભયંકર એવા યુદ્ધને વિષે લડાઇમાં ન જીતી શકાય તેવા શત્રુઓને જીતી લઇને પણ આપના ચરણકમળના વનનો આશ્રય કરનારા મનુષ્યો જીત જ મેળવે છે. ※

समुद्रभयनाशमाह —

अम्भोनिधौ क्षुभितभीषणनक्रचक्र-
पाठीनपीठभयदोल्बणवाडवाग्नौ।
रङ्गत्तरङ्गशिखरस्थितयानपात्रा-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ।।४०।।

दण्डान्वय :- क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नौ अम्भोनिधौ रङ्गत्तरङ्गशिखरस्थितयानपात्राः भवतः स्मरणात् त्रासम् विहाय व्रजन्ति ।

हे जिनेन्द्र ! जना भवतः स्मरणात् व्रजन्ति-यान्ति इत्यन्वयः। 'यान्ति' इति क्रियापदम्। के कर्तारः? 'जनाः' । किं कर्मतापन्नम्? 'स्वस्थानम्' इति शेषः। कस्मात्? 'भवतः स्मरणात्' मनसि चिन्तनात्। किं कृत्वा? 'त्रासं विहाय' (आकस्मिकं भयं) परित्यज्य। कीदृशा जनाः? अम्भोनिधौ-समुद्रे रङ्गन्तः-सर्वतश्चलन्तो ये तरङ्गाः-कल्लोलास्तेषां शिखराणि-अग्राणि तेषु स्थितानि यानपात्राणि-प्रवहणानि येषां ते। कीदृशे अम्भोनिधौ? 'क्षुभितभीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नौ'। अर्थस्तु समासादेव, स चैवम्-नक्राणां-जलचराणां चक्राणि-समूहा नक्रचक्राणि, पाठीनाश्च पीठाश्च मत्स्यभेदौ पाठीनपीठाः, भयं दत्ते इति भयदः, स चासौ उल्बणः-प्रकटश्च भयदोल्बणः विशेषणसमासः, भयदोल्बणश्चासौ वाडवाग्निः-वडवानलश्च भयदोल्बणवाडवाग्निः, भीषणानि-रौद्राणि च तानि नक्रचक्राणि च भीषणनक्रचक्राणि, भीषणनक्रचक्राणि च पाठीनपीठाश्च भयदोल्बणवाडवाग्निश्च भीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नयः, क्षुभिताः-क्षोभं गता भीषणनक्रचक्रपाठीनपीठभयदोल्बणवाडवाग्नयो यत्र स तथा तस्मिन्। अम्भसां निधिरम्भोनिधिस्तस्मिन्। रङ्गेत्यादिसमासः प्रागुक्तः एव ।। *इति काव्यार्थः।।४०।।*

અર્થ :- ભયંકર મગરમચ્છોના ટોળાવાળા, પાઠીન-પીઠ નામના માછલા વાળા અને ભયંકર આકરા વડવાનલ અગ્નિવાળા તથા ખળભળેલા એવા સમુદ્રમાં ઉછળતા કલ્લોલના શિખરે ચઢી જતાં વહાણવાળા લોકો આપના સ્મરણથી (કોઈપણ પ્રકારના) ત્રાસ વિના ચાલ્યા જાય છે. ※

अथ रोगभयभेदमाह -

उद्भूतभीषणजलोदरभारभुग्नाः
शोच्यां दशामुपगताश्च्युतजीविताशाः ।
त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥

दण्डान्वय :- उद्भूतभीषणजलोदरभारभुग्नाः शोच्याम् दशाम् उपगताः च्युतजीविताशाः मर्त्याः त्वत्पादपङ्कजरजोमृतदिग्धदेहाः मकरध्वजतुल्यरुपाः भवन्ति।

हे जिनेन्द्र ! मर्त्या मकरध्वजतुल्यरूपा भवन्ति इत्यन्वयः। 'भवन्ति' इति क्रियापदम्। के कर्तारः? 'मर्त्याः' मनुष्याः। किंविशिष्टाः? 'मकरध्वजतुल्यरूपाः' कन्दर्पसदृशाकाराः। पुनः किंविशिष्टाः? 'उद्भूतभीषणजलोदरभारभुग्नाः' उद्भूतः-प्रादुर्भूतो भीषणो-रौद्रो यो जलोदरो-रोगविशेषः तस्य भारेण-संघट्टेन भुग्नाः-वक्राः। पुनः किं.? 'शोच्यां' शोकयोग्यां 'दशां' अवस्थां 'उपगताः' प्राप्ताः। पुनः किं.? 'च्युत०' च्युता-गलिता जीवितस्य-आयुष आशा-अभिलाषो येषां ते तथारूपाः। पुनः किंविशिष्टरूपाः? 'त्वत्पादपङ्कजरजोऽमृतदिग्धदेहाः' तव चरणकमलरेणुलिप्तगात्राः॥

अथ समासा :- भीषणं च जलोदरं च भीषणजलोदरं, जलभृतं उदरं जलोदरं, उद्भूतं चासौ भीषणजलोदरं च उद्भूतभीषणजलोदरं, तस्य भारेण भुग्ना उद्भूतभीषणजलोदरभारभुग्नाः। शोचितुं योग्या शोच्या ताम्। च्युता जीवितस्य आशा येषां ते तथा। तव पादौ त्वत्पादौ, त्वत्पादावेव पङ्कजे त्वत्पादपङ्कजे, तयो रजः त्वत्पादपङ्कजरजः, तदेव अमृतं त्वत्पादपङ्कजरजोऽमृतं, तेन दिग्धो देहो येषां ते तथा। मकरो ध्वजे यस्य स मकरध्वजः, मकरध्वजेन तुल्यं रूपं येषां ते तथा ॥ *इति काव्यार्थः ॥ ४१ ॥*

અર્થ :- પ્રગટેલા ભયંકર જલોદર રોગના ભારથી વળી ગયેલા દયા ઉપજે એવી દશાને પામેલા, (અને) જીવવાની આશા વગરના લોકો આપના ચરણ કમળની ધૂળરૂપી અમૃતથી લેપાયેલા શરીરવાળા (થાય છે ત્યારે) કામદેવ જેવા રૂપાળા થાય છે. ❊

अथ बन्धभयनाशमाह –

आपादकण्ठमुरुश्रृङ्खलवेष्टिताङ्गा
गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।
त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः
सद्यः स्वयं विगतबन्धभया भवन्ति ।।४२।।

दण्डान्वय :- आपादकण्ठम् उरुशृङ्खलवेष्टिताङ्गाः गाढम् बृहन्निगडकोटिनिघृष्टजङ्घाः मनुजाः अनिशम् त्वन्नाममन्त्रम् स्मरन्तः सद्यः स्वयम् विगतबन्धभयाः भवन्ति।

हे जिनेन्द्र ! मनुजा विगतबन्धभया भवन्ति इति क्रियासण्टङ्कः। 'भवन्ति' इति क्रियापदम्। के कर्तारः? 'मनुजाः' मानवाः। कीदृशाः? 'विगतबन्धभयाः' रोधादिकष्टभीतिवर्जिताः। कथम्? 'सद्यः' शीघ्रम्। केन? 'स्वयं' आत्मना, न तु परप्रयोगेण। किं कुर्वन्तः? अनिशं-सदा त्वन्नाममन्त्रं स्मरन्तः-ध्यायन्तः। पुनः कीदृशाः? 'आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गाः' आपादकण्ठं चरणगलप्रदेशं यावत् उरूः-महान् यः शृङ्खलो-लोहरज्जुस्तेन नियन्त्रितशरीराः। पुनः कीदृशाः? 'गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः' गाढं-अत्यन्तं बृहत्-गुरुर्यो निगडो - लोकप्रसिद्धः पादपाशस्तस्य कोटिः- अग्रं तेन संघट्टितजङ्घादेशाः।।

अथ समासा :- पादौ च कण्ठश्च पादकण्ठं, प्राण्यङ्गत्वादेकवद्भावः, पादकण्ठं मर्यादीकृत्य इति आपादकण्ठं, विभक्त्यर्थे अव्ययीभावः। उरुश्चासौ शृङ्खलश्च उरुशृङ्खलः, तेन वेष्टितं अङ्गं येषां ते तथा, बृहच्चासौ निगडश्च बृहन्निगडः, तस्य कोटिः, तया निघृष्टे जङ्घे येषां ते तथा। तव नाम त्वन्नाम, मन्त्र इव मन्त्रः, त्वन्नाम चासौ मन्त्रश्च त्वन्नाममन्त्रस्तम्। बन्धस्य भयं बन्धभयं, विगतं बन्धभयं येषां ते तथा। *आपादकण्ठमित्यत्राव्ययीभावेऽपि 'आङावधौ' (सिद्ध. अ. २, पा. २, सू. ७०) इति पञ्चमी, तस्याश्च न अमादेश इति तेन क्रियाविशेषणत्वाद् द्वितीया। इति काव्यार्थः।।४२।।*

અર્થ :- પગથી આરંભીને કંઠ સુધી મોટી સાંકળોથી વીંટાયેલા શરીરવાળા (તથા) અત્યંત મોટી બેડીના અગ્રભાગ વડે ઘસાતી જંઘાવાળા મનુષ્યો નિરન્તર

આપના નામરૂપ મન્ત્રનું સ્મરણ કરતાં એવા તત્કાળ પોતાની મેળે જ બન્ધનના ભયથી રહિત થાય છે. (બન્ધનો તૂટી જાય છે.)

* * *

अथ युगपदष्टभयनाशेन स्तुवन्नाह –

मत्तद्विपेन्द्र-मृगराज-दवानला-हि-
सङ्ग्राम-वारिधि-महोदर-बन्धनोत्थम्।
तस्याशु नाशमुपयाति भयं भियेव
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३ ॥

दण्डान्वयः- यः मतिमान् तावकम् इमम् स्तवम् अधीते तस्य मत्तद्वीपेन्द्रमृगराजदवानल-अहिसङ्ग्रामवारिधिमहोदरबन्धनोत्थम् भयम् भीया इव आशु नाशम् उपयाति।

हे जिनेन्द्र ! यः मतिमान् इमं प्रत्यक्षं तावकं स्तवं अधीते-पठति इत्यन्वयः। 'अधीते' इति क्रियापदम्। कः कर्ता? 'यः' मतिरस्यास्तीति 'मतिमान्'। कं कर्मतापन्नम् ? 'इमं स्तवं' स्तोत्रम्।

यत्तदोर्नित्याभिसम्बन्धात् तस्य पुरुषस्य आशु-शीघ्रं भयं नाशं उपयाति-प्राप्नोति। 'उपयाति' इति क्रियापदम्। किं कर्तृ? 'भयम्'। किं कर्मतापन्नम्? 'नाशम्'। इवोत्प्रेक्ष्यते (क्षणे?)। 'भिया इव' भीत्या इव। भयस्यापि भीतिर्जायते तेन अष्टधा भयं तस्य न स्यादिति भावः। कीदृशं भयम्? 'मत्तद्विपेन्द्र-मृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनोत्थं' मत्तो-मदवान् द्विपेन्द्रो-हस्ती मृगराजः-सिंहः दावानलो-दावाग्निः अहिः-सर्पः सङ्ग्रामो-रणः वारिधिः-समुद्रः महोदरं-जलोदररोगः बन्धनं रोधः, तेभ्यो जातम्॥

अथ समासा :- द्विपानां इन्द्रो-द्विपेन्द्रः, मत्तश्चासौ द्विपेन्द्रश्च मत्तद्विपेन्द्रः, मृगाणां राजा मृगराजः, महच्च तत् उदरं च महोदरं, बाहुलकात् समासः, मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च सङ्ग्रामश्च वारिधिश्च महोदरं च बन्धनं च मत्तद्विपेन्द्रमृगराजदवानलाहिसङ्ग्रामवारिधिमहोदरबन्धनानि, तेभ्य उत्तिष्ठते इति मत्त०, एतदुपलक्षणात् सर्वमपि भयं याति॥ *इति काव्यार्थः॥ ४३ ॥*

અર્થ :- જે બુદ્ધિશાળી આપનું આ સ્તવન ભણે છે તેના મદોન્મત્ત હાથી-સિંહ-દાવાનળ-સર્પ-યુદ્ધ-સમુદ્ર-જળોદર (અને) બંધન (આ આઠ) થી ઉત્પન્ન થયેલો ભય જાણે પોતેજ ભય પામ્યો હોય તેમ એકદમ નાશને પામે છે.

* * *

अथ कविः स्वनामसूचापूर्वं स्तोत्रमाहात्म्यसर्वस्वमाह –

स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां
भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।
धत्ते जनो य इह कण्ठगतामजस्रं
तं 'मानतुङ्ग'मवशा समुपैति लक्ष्मीः ।।४४।।

दण्डान्वयः- जिनेन्द्र ! भक्त्या मया गुणैः निबद्धाम् रुचिरवर्ण-विचित्रपुष्पाम् तव स्तोत्रस्रजम् इह यः जनः अजस्रम् कण्ठगताम् धत्ते तम् मानतुङ्गम् अवशा लक्ष्मीः समुपैति।

हे जिनेन्द्र ! तं पुरुषं अवशा-शीघ्रं लक्ष्मीः समुपैति। सं-सम्यक्प्रकारेण उपैति-व्याप्नोतीत्यर्थः। 'समुपैति' इति क्रियापदम्। का कर्त्री ? 'लक्ष्मीः'। कं कर्मतापन्नम्? 'तं पुरुषम्'। कथम्? 'अवशा' शीघ्रार्थे अव्ययम्, यद्वा कीदृशी लक्ष्मीः? 'अवशा'व्याहृतचित्ता। कीदृशं तम्? 'मानतुङ्ग' मानेन-ज्ञानेन बहुमानेन वा तुङ्ग-प्रौढम्।

तच्छब्दो यच्छब्दमपेक्षते। तं कम्? यः पुरुष इह लोके तव स्तोत्रस्रजं अजस्रं कण्ठगतां धत्ते-बिभर्ति। 'धत्ते' इति क्रियापदम्। कः कर्ता? 'यः पुरुषः'। कां कर्मतापन्नाम्? 'स्तोत्रस्रजं' स्तवनलक्षणां मालाम्। कीदृशीम्? 'कण्ठे गतां' प्राप्ताम्। कथम् ? 'अजस्रं' निरन्तरम्। कस्य ? 'तव' अर्थादितां प्रस्तुताम्। कीदृशीम्? 'गुणैः' ज्ञानौदार्यादिभिर्भक्त्या मया-कविना निबद्धाम्, अन्याऽपि या स्रक् भवति सा गुणैः- दवरकैर्बद्धा भवति, तां कण्ठे दधानः पुमान् लक्ष्म्या - कमलया शोभया वा आश्रीयते । पुनः किं. स्तोत्रस्रजम्? 'रुचिरवर्णविचित्रपुष्पां' रुचिरा-मनोहरा ये वर्णा-अक्षराणि त एव विचित्राणि नानाप्रकाराणि पुष्पाणि-कुसुमानि यस्यां सा इति व्याख्येयम्।।

अथ समासा :- स्तोत्रमेव स्रक् स्तोत्रस्रक् ताम् । रुचिराश्च ते वर्णाश्च रुचिरवर्णाः, त एव विचित्राणि पुष्पाणि यस्यां सा ताम् । कण्ठे गतां कण्ठगता ताम् । मानेन तुङ्गो मानतुङ्गस्तम् । अत्र काव्ये मानतुङ्ग इति कविनामख्यातिः। *तथा लक्ष्मीरितिपदं मङ्गलार्थमुपन्यस्तं चक्रेश्वरीबीजं च प्रतिपदं संदर्भितम्, अन्यच्चात्र स्तोत्रे काव्येष्वव्ययबाहुल्यं शास्त्राध्येतॄणामव्ययप्रतिपत्त्यर्थमिति जयति युगादिप्रभुः ॥*

सूरिः श्री विजयप्रभप्रभुमुखादेशाच्छिशूनां हितो-
देशाद् वृत्तिमिमां व्यधत्त विधिना श्रीमेघनामा कविः ।
शिष्यः श्रीसुधियां कृपादिविजयाख्यानाममुष्यां पुन-
र्यद् दृब्धं तदिह प्रसादसदनैः शोध्यं विशुद्धाशयैः ॥१॥-शार्दूल.

॥ इति श्री भक्तामरस्तवराजवृत्तिः सम्पूर्णा ॥

श्रीरस्तु ॥ सकलभट्टारकशिरोमणिभट्टारक श्री श्री श्री श्री श्री १०८ श्रीविजयप्रभसूरीश्वर-चरण-कमलसेवकमहोपाध्यायश्रीमेघविजयगणिभिर्विरचितेति श्रेयः। श्लोकसङ्ख्या ग्रन्थाग्रं १००० ॥ सकलभट्टारकशिरोमणिभट्टारक श्री ५ श्रीविजयदेवसूरीश्वरचरणकमलसेवकमहोपाध्यायनयविजयगणितच्छिष्य पं. हस्तिविजयगणितच्छिष्य पं० रूपविजयगणितच्छिष्यमुनिकस्तूरविजयलिखिता ॥ संवत् १७८२ वर्षे वैशाख शुदि ३ दिने शनिवासरे। शुभं भवतु श्रीजगवल्लभप्रसादात्, लिखितं नागोरीसरामध्ये ॥

અર્થ :- હે જિનેશ્વર ! ભક્તિથી મારાવડે (માનતુંગસૂરિવડે) પૂર્વે કહેલા જ્ઞાનાદિગુણોથી ગૂંથેલી (તથા) મનોહર અકારાદિક અક્ષરો રૂપી વિચિત્ર પુષ્પોવાળી (આ) આપની સ્તોત્રરૂપ માળાને આ જગતમાં જે મનુષ્ય નિરંતર કંઠમાં રાખેલી ધારણ કરે છે તે ચિત્તની ઉન્નતિવાળા પુરુષને (અથવા) માનતુંગસૂરિને પોતાની મેળે લક્ષ્મી પ્રાપ્ત થાય છે.

❊ ❊ ❊

श्रीकनककुशलगणिविरचिता

।। भक्तामरस्तोत्रवृत्तिः ।।

श्रीऋषभनाथाय नमः । श्रीसरस्वत्यै नमः ।।

प्रणम्य परमानन्द-दायकं परमेश्वरम् ।
वृत्तिं भक्तामरस्याहं, कुर्वे बालहितैषिणीम् ।। १ ।।

भक्तामर० यः संस्तुत० इत्यनयोर्व्याख्या-किलेति सत्ये। तं प्रथमं जिनेन्द्रं अहमपि स्तोष्ये इत्यन्वयः। रागादीनां जेतृत्वाज्जिनाः-सामान्यकेवलिनस्तेषामिन्द्रः-तीर्थकरस्तं अहमिति-मानतुङ्गाचार्यः कविः स्तोष्ये-स्तवनं विधास्ये। न केवलं सुरेन्द्रा एव स्तुवन्तः, किन्त्वहमपीत्यपेक्षया अपिशब्दो ज्ञेयः। जिनानामिन्द्रो जिनेन्द्रः तं 'तत्पुरुषः'। जिनेन्द्रं किंलक्षणम्? 'प्रथमम्' आद्यम्, ऋषभमित्यर्थः। पुनः किंलक्षणं तं तमिति यच्छब्दापेक्षम्। तं कम्? 'यः सुरलोकनाथैः संस्तुतः'। 'संस्तुतः' इति क्रियापदम्। कैः कर्तृभिः? 'सुरलोकनाथैः' सुराणां लोकाः सुरलोकाः 'तत्पुरुषः', सुरलोकानां नाथाः सुरलोकनाथाः तैः 'तत्पुरुषः' देवनिवास(?) प्रभुभिः, इन्द्रैरित्यर्थः। 'संस्तुतः' सम्यग्भक्तिबहुमानपुरःसरं भगवदतिशायिगुणपरिज्ञानपूर्वकं वा स्तुतो-वन्दितः। सुरलोकनाथैः किंलक्षणैः? 'उद्भूतबुद्धिपटुभिः' उद्भूता-प्रकटिता या बुद्धिः-मतिस्तया पटवो-दक्षाः तैः। उद्भूता चासौ बुद्धिश्च उद्भूतबुद्धिः 'कर्मधारयः', उद्भूतबुद्ध्या पटवः उद्भूतबुद्धिपटवः तैः 'तत्पुरुषः'। कुतः ईदृशैः? 'सकलवाङ्मयतत्त्वबोधात्' सकलं-समस्तं यद् वाङ्मयं-शास्त्रं तस्य तत्त्वं-परमार्थस्तस्य बोधो-ज्ञानं तस्मात्। वाचा निवृत्तं वाङ्मयं 'तत्पुरुषः',

सकलं च तद् वाङ्मयं च सकलवाङ्मयं 'कर्मधारयः', सकलवाङ्मयस्य तत्त्वं सकलवाङ्मयतत्त्वं 'तत्पुरुषः', सकलवाङ्मयतत्त्वस्य बोधः सकलवाङ्मयतत्त्वबोधस्तस्मात् 'तत्पुरुषः', सर्वशास्त्रावगमादित्यर्थः। कैः कृत्वा संस्तुतः? 'स्तोत्रैः' स्तवनैः। किंलक्षणैः स्तोत्रैः? 'जगत्त्रितयचित्तहरैः' जगतां-भुवनानां त्रितयं स्वर्ग-मर्त्य-पाताललक्षणं तस्य चित्तानि-मनांसि तानि हरन्ति-रञ्जयन्तीति तानि तैः। जगतां त्रितयं जगत्त्रितयं 'तत्पुरुषः', जगत्त्रितयस्य चित्तानि जगत्त्रितयचित्तानि 'तत्पुरुषः', जगत्त्रितयचित्तानि हरन्तीति जगत्त्रितयचित्तहराणि तैः 'तत्पुरुषः', जगत्त्रितयजन्तुमनआवर्जकैः। अत एव 'उदारैः' महार्थैरुद्भटैर्वा। किं कृत्वा स्तोष्ये? 'प्रणम्य' प्रकर्षेण नत्वा। प्रणमनं पूर्वं प्रणम्य। कथम्? 'सम्यग्' भक्तिबहुमानयुक्तं गुणावबोधसहितं वा। किं कर्मतापन्नम्? 'जिनपादयुगं' जिनस्य-प्रथमतीर्थकृतः पादौ-चरणौ तयोर्युगं-युग्मम्। जिनस्य पादौ जिनपादौ 'तत्पुरुषः', जिनपादयोर्युगं जिनपादयुगं तत् 'तत्पुरुषः'। जिनपादयुगं किंलक्षणम्? 'आलम्बनम्' आधारम्। केषाम्? 'जनानां' लोकानाम्। जनानां किं कुर्वताम्? 'पततां' ब्रुडताम्। कस्मिन्? 'भवजले' भवः-संसारः स एव जलम्-उदकं तस्मिन्। भव एव जलं भवजलं तस्मिन् 'कर्मधारयः'। कस्मिन् काले जिनपादयुगमालम्बनं? 'युगादौ' अवसर्पिणीतृतीयारकपर्यन्तकाले। युगस्यादिर्युगादिः 'तत्पुरुषः' तस्मिन् युगादौ। जिनपादयुगं कीदृशम्? 'उद्द्योतकं' उद्दीपकम्-उद्द्योतकारकम्। कासाम्? 'भक्तामरप्रणतमौलिमणिप्रभाणां' भक्ता-भक्तिमन्तो ये अमरा-देवास्तेषां प्रणता-नम्रा ये मौलयः-शिरोमुकुटानि तेषां तेषु (वा) मणयो-रत्नानि इन्द्रनीलादीनि तेषां प्रभा-दीप्तयस्तासाम्। भक्ताश्च ते अमराश्च भक्तामराः 'कर्मधारयः', प्रणताश्च ते मौलयश्च प्रणतमौलयः 'कर्मधारयः', भक्तामराणां प्रणतमौलयः भक्तामरप्रणतमौलयः 'तत्पुरुषः',

भक्तामरप्रणतमौलीनां मणयः भक्तामरप्रणतमौलिमणयः 'तत्पुरुषः', भक्तामरप्रणतमौलिमणीनां प्रभा भक्तामरप्रणतमौलिमणिप्रभाः तासां 'तत्पुरुषः', भगवत्पादयुगलस्यातिदीप्तत्वात् तासामपि प्रकाशकमित्यर्थः। पुनः किंलक्षणं जिनपादयुगम्? 'दलितपापतमोवितानं' दलितं-क्षिप्तं पापमेव-किल्बिष-मेव तमोवितानम्-अन्धकारजालं येन तत्। तमसो वितानं तमोवितानं 'तत्पुरुषः', पापमेव तमोवितानं पापतमोवितानं 'कर्मधारयः', दलितं पापतमोवितानं येन तत् (तद्) 'बहुव्रीहिः'।

इति प्रथमद्वितीयवृत्तार्थः ।।१-२।।

❊ ❊ ❊

अथ कविः स्वौद्धत्यपरिहारार्थमाह - बुद्ध्येत्यादि

व्याख्या - हे 'विबुधार्चितपादपीठ !' हे देवपूजितचरणासन !। पादयोः पीठं पादपीठं 'तत्पुरुषः', विबुधैरर्चितं विबुधा० 'तत्पुरुषः', विबुधार्चितं पादपीठं यस्य स विबुधार्चितपादपीठः 'बहुव्रीहिः', तस्य सम्बोधनं हे विबुधार्चितपादपीठ !। अहं विगतत्रपोऽस्मि इत्यन्वयः। 'अस्मि' इति क्रियापदम्। कः कर्ता? 'अहम्'। अहं कीदृशः? 'विगतत्रपः' निर्लज्जः। विगता त्रपा यस्मात् सः 'बहुव्रीहिः'। यतोऽहं कीदृशः? 'समुद्यतमतिः' सज्जीभूतबुद्धिः। समुद्यता मतिर्यस्य सः 'बहुव्रीहिः'। किं कर्तुम्? 'स्तोतुं' नोतुम्। कथम्? 'विना' ऋते। कया? 'बुद्ध्या' शेमुष्या। उक्तार्थसमर्थनार्थमर्थान्तरन्यासमाह-कोऽन्यो जनः सहसा इन्दुबिम्बं ग्रहीतुं इच्छति? अपि तु न कश्चिदेवेत्यन्वयः। 'इच्छति' इति क्रियापदम्। कः कर्ता? 'जनः' लोकः। 'इच्छति' वाञ्छति। जनः पुनः किंभूतः? 'कः'। पुनः किंलक्षणो जनः? 'अन्यः' अपरः। किं कर्तुम्? 'ग्रहीतुम्' आदातुम्। किं कर्मतापन्नम्? 'इन्दुबिम्बं' चन्द्रमण्डलम्। इन्दोर्बिम्बं इन्दुबिम्बं (तत्) 'तत्पुरुषः'। कथम्? 'सहसा'

झटिति। इन्दुबिम्बं किंभूतम्? 'जलसंस्थितम्' उदकमध्यस्थितम्। जले संस्थितं जलसंस्थितं (तत्) 'तत्पुरुषः'। किं कृत्वा? 'विहाय' त्यक्त्वा। कं कर्मतापन्नम्? बालमज्ञं शिशुम्। कोऽर्थः? रात्रौ जलप्रतिबिम्बितं चन्द्रमण्डलं बालो यथा आदातुमुद्यतो भवति, तथाऽहमपि बुद्धिविकलः सन् त्वां स्तोतुं समुद्यतोऽस्मि। इति तृतीयवृत्तार्थः ।।३।।

❊ ❊ ❊

कुतो विगतलज्ज इत्याह — वक्तुमित्यादि

व्याख्या - हे 'गुणसमुद्र !' हे गुणरत्नाकर !। गुणानां समुद्रो गुणसमुद्रः तस्य सम्बोधने हे गुणसमुद्र ! 'तत्पुरुषः'। ते गुणान् वक्तुं कः क्षमोऽस्ति? कर्त्रुक्तिः, अपि तु न कोऽपि। यत्रान्यक्रियापदं न श्रूयते तत्रास्ति भवतीत्यादि पुरः प्रयुज्यत इति न्यायादत्रास्तीत्युच्यते। 'अस्ति' इति क्रियापदम्। कः कर्ता?। 'कः' जनः। किंलक्षणः? 'क्षमः' समर्थः। किं कर्तुम्? 'वक्तुं' भाषितुम्। कान् कर्मतापन्नान्? 'गुणान्' ज्ञानदर्शन-चारित्रादीन्। कस्य? 'ते' तव। गुणान् कथंभूतान्? 'शशाङ्ककान्तान्' चन्द्रवदुज्ज्वलान्। शशोऽङ्के यस्य शशाङ्कः 'बहुव्रीहिः', शशाङ्कवत् कान्ताः शशाङ्ककान्तास्तान् 'तत्पुरुषः'। कः किदृशोऽपि? 'सुरगुरुप्रति-मोऽपि' बृहस्पतितुल्योऽपि। सुराणां गुरुः सुरगुरुः 'तत्पुरुषः', सुरगुरोः प्रतिमः सुरगुरुप्रतिमः 'तत्पुरुषः'। कया? 'बुद्ध्या' शेमुष्या। उक्तार्थ-दाढ्यार्थमर्थान्तरं न्यस्यति-को वा अम्बुनिधिं तरीतुमलं - समर्थो भवेत् ? अपि तु न कश्चिदेव। 'भवेत्' इति क्रियापदम् (अध्याहार्यम्) । कः कर्ता? 'कः'। 'भवेत्' स्यात् । कथम्? 'अलं' समर्थः। किं कर्तुम्? 'तरीतुम्' उल्लङ्घयितुम्। कं कर्मतापन्नम्? 'अम्बुनिधिं' समुद्रम्। अम्बु निधीयतेऽस्मिन्नित्यम्बुनिधिस्तम्। काभ्याम्? 'भुजाभ्यां' बाहुभ्याम्। कीदृ-शमम्बुनिधिम्? 'कल्पान्तकालपवनोद्धतनक्रचक्रं' कल्पान्तकालस्य-युग-

क्षयस्य पवनेन-वायुना उद्धतानि-दुर्दर्शनानि ऊर्ध्वं चलितानि वा नक्रचक्राणि-यादोवृन्दानि यत्र (स तम्)। कल्पस्यान्तः कल्पान्तः 'तत्पुरुषः', कल्पान्तश्चासौ कालश्च कल्पान्तकालः 'कर्मधारयः', कल्पान्तकालस्य पवनः कल्पान्तकालपवनः 'तत्पुरुषः', कल्पान्तकालपवनेनोद्धतानि कल्पान्तकालपवनोद्धतानि 'तत्पुरुषः', नक्राणां चक्राणि नक्रचक्राणि 'तत्पुरुषः', कल्पान्तकालपवनोद्धतानि नक्रचक्राणि यत्र स तं 'बहुव्रीहिः'। यथा प्रलयमरुत्प्रेरितदुष्टजलजन्तुजातसंयुतयुगान्तक्षुब्धाब्धितरणं दुःशकं, तथा अर्हद्गुणकीर्तनमपि दुर्घटं तत्राहं प्रवृत्तः। इति चतुर्थवृत्तार्थः ॥४॥

❊ ❊ ❊

अथ स्तवनकरणप्रवृत्तौ कारणमाह – सोऽहमित्यादि

व्याख्या - यद्यपि तव गुणान् वक्तुं न कोऽपि शक्तस्तथापि हे मुनीश ! -हे गणधरादियतिस्वामिन् ! मुनीनामीशो मुनीशस्तस्य सम्बोधनं हे मुनीश ! 'तत्पुरुषः', सोऽहं तव स्तवं कर्तुं प्रवृत्तोऽस्मीत्यन्वयः। 'अस्मि' इति क्रियापदम्। कः कर्ता? 'अहम्'। अहं किंलक्षणं? 'प्रवृत्तः'। किं कर्तुम्? ('कर्तुम्') विधातुम्। कं कर्मतापन्नम्? 'स्तवं' स्तोत्रम्। कस्य? 'तव' भवतः। अहं कीदृशोऽपि? 'विगतशक्तिरपि' सामर्थ्यहीनोऽपि। विशेषेण गता विगता, विगता शक्तिर्यस्य स 'बहुव्रीहिः'। अहं किंभूतः? 'सः'। कथम्? 'तथापि'। कस्मात्? 'भक्तिवशात्' आन्तरभावतः। भक्तेर्वशो भक्तिवशस्तस्मात् 'तत्पुरुषः'। अत्राप्यर्थसमर्थनमाह-मृगः किं मृगेन्द्रं-सिहं नाभ्येति? अपि तु अभ्येति। 'अभ्येति' इति क्रियापदम्। कः कर्ता? 'मृगः' हरिणः। 'अभ्येति' आभिमुख्येन भवति, सम्मुखमागच्छतीत्यर्थः। कं कर्मतापन्नम्? 'मृगेन्द्रं' सिंहम्। मृगाणामिन्द्रो मृगेन्द्रस्तं 'तत्पुरुषः'। किमर्थम्? 'परिपालनार्थं' रक्षणार्थम्। परिपालनायेति परिपालनार्थं 'तत्पुरुषः'। कस्य? 'निज-

शिशोः' आत्मबालकस्य। निजस्य शिशुर्निजशिशुस्तस्य 'तत्पुरुषः'। किं कृत्वा? 'अविचार्य' अपर्यालोच्य। किं कर्मतापन्नम्? 'आत्मवीर्यं' निजबलम्। आत्मनो वीर्यमात्मवीर्यं तत् 'तत्पुरुषः'। कया? 'प्रीत्या' स्नेहेन। कथम्? 'किम्'। यथा मृगो निजबालरक्षणार्थं सिंहाभिमुखं प्रवर्तते, तथाऽहमपि तव स्तवं कर्तुं प्रवृत्तः। इति पञ्चमवृत्तार्थः ॥५॥

* * *

अथ कविरसामर्थ्ये सति स्तुतिकरणे वाचालताहेतुमाह - अल्पेत्यादि

व्याख्या - हे नाथ ! त्वद्भक्तिर्मां मुखरीकुरुते इत्यन्वयः। 'मुखरीकुरुते' इति क्रियापदम्। का कर्त्री? 'त्वद्भक्तिः' त्वद्रागः। 'मुखरीकुरुते' वाचालं विधत्ते इत्यर्थः। तव भक्तिस्त्वद्भक्तिः 'तत्पुरुषः'। अमुखरं मुखरं कुरुते इति मुखरीकुरुते। कं कर्मतापन्नम्? 'मां' मानतुङ्गाचार्यम्। कथम्? 'एव' निश्चयेन । कस्मात्? 'बलात्' हठात्। मां किंलक्षणम्? 'अल्पश्रुतं' स्तोकशास्त्रम्। अल्पं श्रुतं यस्य स तं 'बहुव्रीहिः'। अत एव मां किंभूतम्? 'परिहासधाम' हास्यास्पदम्। परिहासस्य धाम परिहासधाम तत् 'तत्पुरुषः'। केषाम्? 'श्रुतवतां' दृष्टशास्त्राणाम्। श्रुतं विद्यते येषां ते श्रुतवन्तस्तेषां 'बहुव्रीहिः'। अर्थदृढनार्थमाह-किलेति सत्ये। यत् कोकिलो मधौ मधुरं विरौतीत्यन्वयः। 'विरौति' इति क्रियापदम्। कः कर्ता? 'कोकिलः' पिकः। 'विरौति' कूजति ब्रूते। किं कर्मतापन्नम्? 'मधुरं' प्रियम्। कस्मिन्? 'मधौ' वसन्ते। कथंभूतं मधुरम्? यत् तत् चारुचूतकलिकानिकरैकहेतुरस्ति। 'अस्ति' इति क्रियापदम्। किं कर्तृ? 'तत्' तदतिमधुरम्। तत् कथंभूतम्? 'चारुचूतकलिकानिकरैकहेतुः' चारुः-मनोज्ञो यः चूतः-आम्रस्तस्य कलिका-मञ्जर्यस्तासां निकरः-समूहः स एवैकः-अद्वितीयो हेतुः-कारणम्। चारु-

श्चासौ चूतश्च चारुचूतः 'कर्मधारयः', चारुचूतस्य कलिकाश्चारुचूतकलिकाः 'तत्पुरुषः', चारुचूतकलिकानां निकरः चारुचूतकलिकानिकरः 'तत्पुरुषः', एकश्चासौ हेतुश्चैकहेतुः 'कर्मधारयः', चारुचूतकलिकानिकर एव एकहेतुः चारुचूतकलिकानिकरैकहेतुः 'कर्मधारयः'। तदित्यव्ययपदं सप्तम्यर्थवाचकं तस्मिन् मधुरमिति वा। यथा सुरभिसहकारमञ्जरीकृतभोजनः पुंस्कोकिलो मधुरस्वरवतां पंक्तावुपविशति, तथाऽहं स्तोकग्रन्थोऽपि त्वत्प्रभावात् तव स्तवं कुर्वाणः प्रवीणपंक्तिगतो भविष्यामि। इति षष्ठवृत्तार्थः॥६॥

* * *

हेतुमुक्त्वा स्तवकरणे यो गुणस्तमाह – त्वत्संस्तवेनेत्यादि

व्याख्या - हे नाथ! त्वत्संस्तवेन शरीरभाजां पापं क्षणात् क्षयमुपैतीत्यन्वयः। 'उपैति' इति क्रियापदम्। किं कर्तृ? 'पापम्' अष्टविधकर्म। 'उपैति' गच्छति। कं कर्मतापन्नम्? 'क्षयं' नाशम्। केषाम्? 'शरीरभाजां' प्राणिनाम्। शरीरं भजन्तीति शरीरभाजस्तेषां 'तत्पुरुषः'। केन? 'त्वत्संस्तवेन' भवत्स्तवनेन । तव संस्तवस्त्वत्संस्तवस्तेन 'तत्पुरुषः' । पापं किंलक्षणम्? 'भवसन्ततिसन्निबद्धं' जन्मकोटिसमर्जितम् । भवानां सन्ततिर्भवसन्ततिः 'तत्पुरुषः', भवसन्तत्या सन्निबद्धं भवसन्ततिसन्निबद्धं 'तत्पुरुषः'। कस्मात्? 'क्षणात्' घटिकाषष्ठांशेन, स्तोककालादित्यर्थः। अमुमेवार्थं दृष्टान्तेन दृ(द्र)ढयति इव-यथा शार्वरमन्धकारं सूर्यांशुभिन्नं सत् क्षयमुपैति। 'उपैति' इति क्रियापदम्। किं कर्तृ? 'अन्धकारं' तमः। कं कर्मतापन्नम्? 'क्षयं' नाशम्। 'उपैति' प्रयाति । अन्धकारं किंलक्षणम्? 'शार्वरं' कृष्णपक्षान्तरात्रिसंभवम्। शर्वर्यां भवं शार्वरम्। पुनः किंलक्षणं अन्धकारम्? 'आक्रान्तलोकं' व्याप्तविश्वम्। आक्रान्तो लोको येन तद् 'बहुव्रीहिः'। पुनः किंलक्षणमन्ध-

कारम्? 'अलिनीलं' मधुकरकुलकृष्णम्। अलिवन्नीलमलिनीलं 'तत्पुरुषः'। पुनः किंभूतमन्धकारम्? 'अशेषं' सकलम्। न विद्यते शेषो यत्र तद् 'बहुव्रीहिः'। न तु स्तोकं, पापस्यापि विशेषणमेतत्। पुनः किंभूतमन्धकारम्? 'सूर्यांशुभिन्नं' सहस्रकरैर्विदारितम्। सूर्यस्यांशवः सूर्यांशवः 'तत्पुरुषः', सूर्यांशुभिर्भिन्नं सूर्यांशुभिन्नं 'तत्पुरुषः'। कथम्? 'आशु' शीघ्रम्। यथा तिमिरनाशहेतुः सूर्योदयः, तथा दुरितनाशहेतुर्जिनस्तवः। इति सप्तमवृत्तार्थः॥७॥

❊ ❊ ❊

स्तवारम्भकारणं दृ(द्र)ढयन्नाह - मत्वेतीत्यादि

व्याख्या - हे नाथ ! इदं तव स्तवनं मया आरभ्यते कर्मोक्तिः इत्यन्वयः। 'आरभ्यते' इति क्रियापदम्। केन कर्त्रा? 'मया'। 'आरभ्यते' करणायोद्यम्यते। किं कर्मतापन्नम्? 'संस्तवनं' स्तोत्रम्। कस्य? 'तव' भवतः। संस्तवनं किंभूतम्? 'इदम्'। मया कथंभूतेनापि? 'तनुधियाऽपि' स्वल्पमतिनाऽपि। तनुः धीर्यस्य स तनुधीस्तेन 'बहुव्रीहिः'। किं कृत्वा? 'मत्वा' अवबुध्य। कथम्? 'इति'। किम्? पूर्वोक्तयुक्त्या स्तवकरणं दुष्करं पापहरं चेति। इदं संस्तवनं सतां चेतो हरिष्यति कर्त्रोक्तिः। 'हरिष्यति' इति क्रियापदम्। किं कर्तृ? 'संस्तवनम्'। किं कर्मतापन्नम्? 'मनः'। केषाम्? 'सतां' सज्जनानाम्। कस्मात्? 'प्रभावात्' महिम्नः। कस्य? 'तव'। सन्त एव परगुणग्रहणे लम्पटाः, यतः -

> **''मनसि वचसि काये पुण्यपीयूषपूर्णा-**
> **स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
> **परगुणपरमाणून् पर्वतीकृत्य नित्यं**
> **निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥१॥''** - मालिनी
>
> - (नीतिशतके श्लो. ७०)

न खलाः । उक्तं च –

''सीसं धुणिअं हिययं, चमक्किअं पुलइयं च अंगेहिं ।

तहवि हु खलस्स वाणी, परगुणगहणे न निस्सरिआ ॥१॥'' - आर्या

नन्विति निश्चये उदबिन्दुर्नलिनीदलेषु मुक्ताफलद्युतिमुपैति। 'उपैति' इति क्रियापदम्। कः कर्ता? 'उदबिन्दुः' वारिच्छटा। उदकस्य बिन्दुरुदबिन्दुः 'तत्पुरुषः'। उदकशब्दस्योद इति निपातः। 'उपैति' उपगच्छति। कां कर्मतापन्नाम्? 'मुक्ताफलद्युतिं' मौक्तिकच्छायाम्। मुक्ताफलस्य द्युतिर्मुक्ताफलद्युतिस्तां 'तत्पुरुषः'। केषु? 'नलिनीदलेषु' पद्मिनीपत्रेषु । नलिनीनां दलानि नलिनीदलानि तेषु 'तत्पुरुषः'। यथा पद्मिनीपत्रस्थजलबिन्दुर्मुक्ताफलच्छायां धत्ते, तथा तव स्तवोऽपि त्वत्प्रभावादुत्तमचित्तानन्दकारकः। इत्यष्टमवृत्तार्थः॥८॥

❊ ❊ ❊

अथ सर्वज्ञनामग्रहणमेव विघ्नहरमाह- आस्तामित्यादि

व्याख्या - हे अष्टादशदोषनिर्नाशन ! तव स्तवनमास्तामित्यन्वयः। 'आस्ताम्' इति क्रियापदम् । किं कर्तृ? 'स्तवनं' स्तोत्रम्, गुणरहस्योत्कीर्तनमिति यावत्। 'आस्तां' दूरे तिष्ठतु। स्तवनं किंभूतम्? 'अस्तसमस्तदोषं' निर्मूलितनिखिलदूषणम्। समस्ताश्च ते दोषाश्च समस्तदोषाः 'कर्मधारयः', अस्ताः समस्तदोषा येन तद् 'बहुव्रीहिः'। कस्य? 'तव' भवतः। त्वत्सङ्कथाऽपि जगतां दुरितानि हन्तीत्यन्वयः। 'हन्ति' इति क्रियापदम्। का कर्तृ(र्त्री)? 'त्वत्सङ्कथाऽपि' त्वत्सम्बन्धी संलापोऽपि, त्वद्विषयिणी पूर्वभवसम्बन्धवार्ताऽपीति यावत् । तव सङ्कथा त्वत्सङ्कथा 'तत्पुरुषः'। 'हन्ति' निर्नाशयति। कानि कर्मतापन्नानि? 'दुरितानि' पापानि विघ्नान् वा । केषाम्? 'जगतां' लोकानाम् । उक्तं च -

''चिरसंचियपावपणा-सणीइ भवसयसहस्समहणीए।

चउवीसजिणविणिग्गय, कहाइ वोलंतु मे दिअहा ॥१॥'' - आर्या

दृष्टान्तमाह-सहस्रकिरणो दूरे आस्ताम् इत्यन्वयः। 'आस्ताम्' इति क्रियापदम्। कः कर्ता? 'सहस्रकिरणः' सूर्यः। सहस्रं किरणा यस्य स 'बहुव्रीहिः'। कथम्? 'दूरे'। प्रभैव पद्माकरेषु जलजानि विकाशभाञ्जि कुरुते इत्यन्वयः। 'कुरुते' इति क्रियापदम्। का कर्त्री? 'प्रभा' छाया। 'कुरुते' विधत्ते। कथम्? 'एव' निश्चयेन। कानि कर्मतापन्नानि? 'जलजानि' पद्मानि। जले जायन्त इति जलजानि 'तत्पुरुषः'। किंभूतानि? 'विकाशभाञ्जि' स्मेराणि। विकाशं भजन्त इति विकाशभाञ्जि तानि 'तत्पुरुषः'। केषु? 'पद्माकरेषु' सरस्सु। पद्मानामाकरो येषु ते पद्माकरास्तेषु 'बहुव्रीहिः'। यदि सूर्योदयात् पूर्वप्रवर्तिनी प्रभा पद्मविकाशिनी भवति, तदा सूर्यस्य किमुच्यते?, तथा अर्हद्गुणोत्कीर्तनरूपं स्तवनं दूरे आस्तां, जिननामग्रहणसङ्कथैव सर्वदुरितनाशिनी। इति नवमवृत्तार्थः ॥९॥

* * *

अथ जिनस्तुतिफलमाह – नात्यद्भुतमित्यादि

व्याख्या - हे 'भुवनभूषण!' हे विश्वमण्डन!। भुवनानां भूषणं भुवनभूषणं तस्य सम्बोधने हे भुवनभूषण! 'तत्पुरुषः'। हे 'भूतनाथ'! हे भूतप्रभो!। भूतानां नाथो भूतनाथस्तस्य सम्बोधनं हे भूतनाथ! 'तत्पुरुषः'। अथवा हे 'भुवनभूषणभूत!' भूतशब्द उपमानवाचकः हे विश्वमण्डनसमान!। भुवनस्य भूषणं भुवनभूषणं 'तत्पुरुषः', भुवनभूषणमिव भुवनभूषणभूतस्तस्य सम्बोधनं हे भुवनभूषणभूत! 'तत्पुरुषः'। हे 'नाथ'! हे प्रभो!। भूतैर्गुणैर्भवन्तमभिष्टुवन्तो भवतस्तुल्याः भवन्तीत्यन्वयः कर्त्रोक्तिः। 'भवन्ति' इति क्रियापदम्। के कर्तारः? 'जनाः'। 'भवन्ति' स्युः। जनाः किं कुर्वन्तः? 'अभिष्टुवन्तः' स्तुवन्तः। कं कर्मतापन्नम्? 'भवन्तं' त्वाम्। जनाः किंलक्षणाः? 'तुल्याः' समानाः। कस्य? 'भवतः' तव। कैः? 'गुणैः' ज्ञानादिभिर्गुणैः। किंभूतैः? 'भूतैः'

जातैः। कस्याम्? 'भुवि' पृथिव्याम्। एतन्नात्यद्भुतं-नातिचित्रम्। अतिशायेनाद्भुतमत्यद्भुतं 'तत्पुरुषः'। अत्र व्यतिरेकमाह-ननु-निश्चितं वा-अथवा किं कार्यं-किं प्रयोजनं भवति तेन स्वामिना? अपि तु न किमपि । क्व? 'इह भुवि' जनमध्ये। तेन केन? आश्रितं भूत्या आत्मसमं न करोतीत्यन्वयः, कर्त्रोक्तिः। 'करोति' इति क्रियापदम्। कः कर्ता? 'यः' स्वामी। कथम्? 'न'। कं कर्मतापन्नम्? 'आश्रितं' सेवकम्। कया? 'भूत्या' ऋद्ध्या। किंभूतम्? 'आत्मसमं' निजतुल्यम्। आत्मनः (ना) सम आत्मसमः 'तत्पुरुषः'। अहमपि तीर्थङ्करं स्तुवन् तद्ध्यानैकमनास्तीर्थकृद्गोत्रार्जको भविताऽस्मीति कवेराशयः। इति दशमवृत्तार्थः॥१०॥

* * *

दृष्ट्वेत्यादि

व्याख्या - जनस्य चक्षुरन्यत्र तोषं नोपयातीत्यन्वयः कर्त्रोक्तिः। 'उपयाति' इति क्रियापदम्। किं कर्तृ? 'चक्षुः' लोचनम्। 'नोपयाति' न लभते। कस्य? 'जनस्य' लोकस्य। कं कर्मतापन्नम्? 'तोषं' तुष्टिम्। क्व? 'अन्यत्र' परस्मिन्। किं कृत्वा? 'दृष्ट्वा' अवलोक्य। कं कर्मतापन्नम्? 'भवन्तं' त्वाम्। भवन्तं कीदृशम्? 'अनिमेषविलोकनीयम्'। न निमेषेण विलोक्यते-दृश्यते इति अनिमेषविलोकनीयस्तं 'तत्पुरुषः'। अथवा विलोक्यते इति विलोकनीयः, निमेषेण विलोकनीयो निमेषविलोकनीयः 'तत्पुरुषः', न निमेषविलोकनीयः अनिमेषविलोकनीयः 'तत्पुरुषः'। अतिशायिरूपवन्तं भवन्तं पश्यन्तो नेत्रनिमीलनमपि नरा न कुर्वन्तीत्यर्थः। अत्रार्थेऽर्थान्तरन्यासमाह-दुग्धसिन्धोः पयः पीत्वा जलनिधेः क्षारं जलं अशितुं क इच्छेत् इत्यन्वयः कर्त्रोक्तिः। 'इच्छेत्' इति क्रियापदम्। कः कर्ता? 'कः' प्राणी। 'इच्छेत्' अभिलषेत्। किं कर्तुम्? 'अशितुम्' आस्वादयितुम्। किं कर्मतापन्नम्? 'जलं' पानीयम्।

किंभूतं जलम्? 'क्षारं' दुष्टास्वादम्। कस्य? 'जलनिधेः' लवणसमुद्रस्य। जलं निधीयतेऽस्मिन्निति जलनिधिस्तस्य 'तत्पुरुषः'। किं कृत्वा? 'पीत्वा' आस्वाद्य। किं कर्मतापन्नम्? 'पयः' जलम्। पयः कीदृशम्? 'शशिकरद्युति' चन्द्रकिरणरश्मि। शशोऽस्यास्तीति शशी, शशिनः कराः शशिकराः 'तत्पुरुषः' शशिकरवद् द्युतिर्यस्य तत् (तद्) 'बहुव्रीहिः', उज्ज्वलमित्यर्थः। कस्य? 'दुग्धसिन्धोः' क्षीरसागरस्य। दुग्धस्य सिन्धुः दुग्धसिन्धुः तस्य 'तत्पुरुषः'। न कश्चिदिच्छेदित्यर्थः। इति एकादशमवृत्तार्थः ।।११।।

* * *

भगवतो रूपातिशयतां दर्शयन्नाह – यैरित्यादि

व्याख्या - अहमेवं मन्ये-भवद्देहनिष्पत्तये येऽणवः प्रवृत्तास्ते तावन्त एव, यदाह-हे 'त्रिभुवनैकललामभूत !' जगत्त्रितयाद्वितीयतिलकोपम !। नकारान्तो ललामशब्दो नपुंसकलिङ्गोऽस्ति। भूतशब्द इवार्थे। त्रयाणां भुवनानां समाहारस्त्रिभुवनं 'द्विगुः' एकं च तल्ललाम चैकललाम 'कर्मधारयः', त्रिभुवने एकललाम त्रिभुवनैकललाम 'तत्पुरुषः', त्रिभुवनैकललामेव त्रिभुवनैकललामभूतस्तस्य सम्बोधनम् ('तत्पुरुषः')। तेऽपि अणवस्तावन्त एव वर्तन्ते कर्त्रोक्तिः इत्यन्वयः। 'वर्तन्ते' इति क्रियापदम् (अध्याहार्यम्)। के कर्तारः? 'अणवः'। किंविशिष्टा अणवः? 'तावन्तः (एव)' तत्प्रमाणा एव। नान्ये सन्तीत्यर्थः। कथम्? 'खलु' निश्चये। अणवः किंभूताः? 'ते'। ते के ? यैः परमाणुभिस्त्वं निर्मापितः कर्मोक्तिः इत्यन्वयः। 'निर्मापितः' इति क्रियापदम्। कैः कर्तृभिः ? 'परमाणुभिः'। परमाश्च ते अणवश्च परमाणवस्तैः 'कर्मधारयः'। 'निर्मापितः' निष्पादितः। परमाणुभिः किंभूतैः? 'यैः'। पुनः किंविशिष्टैः परमाणुभिः? 'शान्तरागरुचिभिः'। शान्तश्चासौ रागश्च शान्तरागः 'कर्मधारयः',

शान्तरागस्य रुचिर्येषु ते शान्तरागरुचयस्तैः शान्तरागरुचिभिः ('बहुव्रीहिः')। उपशमरसनिष्पन्नैरित्यर्थः। अथवा हे 'शान्तराग!' हे वीतराग!। शान्तो रागो यस्मिन् स शान्तरागस्तस्य सम्बोधनं 'बहुव्रीहिः'। हे 'रुचिभिः परम'! कान्तिभिरुत्तम!। अणुभिरिति कर्तृपदम्। अणुभिः परमाणुभिरित्यर्थः। कः कर्मतापन्नः? 'त्वं' भवान्। कथमेवं ज्ञायते ? यद्-यस्मात् ते समानमपरं रूपं नास्ति कर्त्रोक्तिः इत्यन्वयः। 'अस्ति' इति क्रियापदम्। किं कर्तृ? 'रूपम्'। 'अस्ति' विद्यते। कथम्? 'न'। कीदृशं रूपम्? 'समानं' तुल्यम्। कस्य? 'ते' भवतः। कथम्? 'यद्' इति यस्मात् कारणात्। हीति निश्चयेन। कस्याम्? 'भुवि' पृथिव्याम्। रूपं कथंभूतम्? 'अपरम्' अन्यत्। इति द्वादशमवृत्तार्थः ॥१२॥

* * *

अनेन रुपस्यातिशायिता दर्शिता। साम्प्रतं भगवन्मुखं वर्णयति-वक्त्रमित्यादि

व्याख्या - द्वौ क्वशब्दावत्यन्तासङ्गतिवाचकौ भवतः। यतो हे सौम्यवदन ! ते-तव वक्त्रं-मुखं क्व वर्तते? तथा निशाकरस्य-चन्द्रस्य, निशां करोतीति निशाकरस्तस्य 'तत्पुरुषः', बिम्बं मण्डलं क्व वर्तते?। यत् त्वन्मुखस्येन्दोश्च साम्यमुच्यते तत्र महदन्तरं पश्यामि। कथंभूतं वक्त्रम्? 'सुरनरोरगनेत्रहारि' सुरा-वैमानिकाः नरा-मानवाः उरगा - भवनवासिनस्तेषां नेत्राणि-लोचनानि तानि (तेषां) हारि-रञ्जनशीलम्। उरसा गच्छन्तीत्युरगाः 'तत्पुरुषः'। सुराश्च नराश्चोरगाश्च सुरनरोरगाः 'द्वन्द्वः' सुरनरोरगाणां नेत्राणि सुरनरोरगनेत्राणि 'तत्पुरुषः', सुरनरोरगनेत्राणि हरतीत्येवंशीलं सुरनरोरगनेत्रहारि 'तत्पुरुषः'। पुनः किंलक्षणं वक्त्रम्? 'निःशेषनिर्जितजगत्त्रितयोपमानं' निःशेषेण-सामस्त्येन निर्जितानि-पराभूतानि जगत्त्रितयोपमानानि कमलदर्पणचन्द्रादीनि येन (तत्)।

जगतां त्रितयं जगत्त्रियं 'तत्पुरुषः', जगत्त्रितयस्योपमानानि जगत्त्रितयोपमानानि 'तत्पुरुषः', निर्गतः शेषादिति निःशेषः 'तत्पुरुषः', निःशेषेण निर्जितानि निःशेषनिर्जितानि 'तत्पुरुषः', निःशेषनिर्जितानि जगत्त्रितयोपमानानि येन तद् 'बहुव्रीहिः'। बिम्बं कथंभूतम्? 'कलङ्कमलिनं' मृगशशाकश्मलम् (?)। कलङ्केन मलिनं कलङ्कमलिनं 'तत्पुरुषः'। यच्चन्द्रमण्डलं वासरे-दिवसे पाण्डुपलाशकल्पं जीर्णपक्वं पाण्डुरवर्णपत्रसदृशं भवति। पाण्डु च तत् पलाशं च पाण्डुपलाशं 'कर्मधारयः', पाण्डुपलाशस्य कल्पं पाण्डुपलाशकल्पं 'तत्पुरुषः'। तेन त्वन्मुखस्योपमानचन्द्रो न घटते। इति त्रयोदशमवृत्तार्थः ॥१३॥

* * *

अथ गुणव्याप्तिमाह – सम्पूर्णेत्यादि

व्याख्या - हे 'त्रिजगदीश्वर'! हे त्रिभुवननाथ!। त्रयाणां जगतां समाहारस्त्रिजगत् 'द्विगुः,' त्रिजगतः ईश्वरः त्रिजगदीश्वरस्तस्य सम्बोधनं 'तत्पुरुषः'। तव गुणाः क्षमावैराग्यादयः कर्तृभूतास्त्रिभुवनं-त्रिजगत् त्रयाणां भुवनानां समाहारस्त्रिभुवनं 'द्विगुः' कर्म लङ्घयन्ति। लङ्घनं लङ्घिः लङ्घिं कुर्वन्तीति लङ्घयन्ति-अतिक्रामन्ति, आत्रिलोकी तिष्ठन्तीत्यर्थः। गुणाः किंविशिष्टाः? 'सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः' आश्विनपूर्णिमासम्बन्धी शशाङ्कः-चन्द्रस्तस्य कलाकलापः-करनिकरस्तद्वच्छुभ्राः - धवलाः। सम्पूर्णं मण्डलं यस्य स सम्पूर्णमण्डलः 'बहुव्रीहिः', शशोऽङ्के यस्य स शशाङ्कः 'बहुव्रीहीः', सम्पूर्णमण्डलश्चासौ शशाङ्कश्च सम्पूर्णमण्डलशशाङ्कः 'कर्मधारयः', कलानां कलापः कलाकलापः 'तत्पुरुषः', सम्पूर्णमण्डलशशाङ्कस्य कलाकलापः सम्पूर्णमण्डलशशाङ्ककलाकलापः 'तत्पुरुषः', सम्पूर्णमण्डलशशाङ्ककलाकलापवत् शुभ्राः

सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्राः 'तत्पुरुषः'। विश्वव्याप्तौ हेतुं दर्शयति-ये गुणा एकम्-अद्वितीयं नाथं संश्रिता-आश्रिताः। कः पुरुषो यथेष्टं-स्वेच्छया, इष्टमनतिक्रम्य यथेष्टम् 'अव्ययीभावः', सञ्चरतःपरिभ्रमतस्तान् गुणान् निवारयति-निषेधयति? अपि तु न कश्चित्। त्रिजगदपि भवद्गुणग्रहणतत्परं दृश्यते, तथा च समर्थे प्रभौ सेवाश्रितानां सर्वत्रास्खलितप्रचारो युक्त एव। इति चतुर्दशमवृत्तार्थः ॥१४॥

* * *

अथ भगवद्वीतरागतामाह – चित्रमित्यादि

व्याख्या - हे सकलविकारन्यक्कारपर ! यदि ते - तव मनः-अन्तःकरणं मनागपि - अल्पमात्रमपि त्रिदशाङ्गनाभिः-देवीभिः, त्रिदशानामङ्गनास्त्रिदशाङ्गनास्ताभिः 'तत्पुरुषः', विकारमार्गं-कामोत्पथं, विकारस्य मार्गो विकारमार्गस्तं 'तत्पुरुषः', न नीतं -न प्रापितम्। द्विकर्मकोऽयं धातुः। 'अत्र' अस्मिन्नर्थे। 'किं चित्रं' किमाश्चर्यम्? अपि तु न किमपि। अत्र दृष्टान्तमाह-कदाचित्-कस्मिंश्चित् क्षणे चलिताचलेन-कम्पितान्यपर्वतेन, चलिता अचला येन स चलिताचलस्तेन 'बहुव्रीहिः', कल्पान्तकालमरुता-प्रलयसमयपवनेन, कल्पस्यान्तः कल्पान्तः 'तत्पुरुषः', कल्पान्तश्चासौ कालश्च कल्पान्तकालः 'कर्मधारयः', कल्पान्तकालस्य मरुत् कल्पान्तकालमरुत् तेन 'तत्पुरुषः', कर्तृभूतेन मन्दराद्रिशिखरं-मेरुशृङ्गं, मन्दरश्चासावद्रिश्च मन्दराद्रिः 'कर्मधारयः', मन्दराद्रेः शिखरं मन्दराद्रिशिखरं 'तत्पुरुषः' कर्मपदं किं चलितं-स्वस्थानात् किं धूतम्? अपि तु न। यथा युगान्ते सर्वपर्वतानां क्षोभो भवति न तु मेरोः, तथा देवीभिरिन्द्रचन्द्रगोपीन्द्ररुद्रादयो देवाः क्षोभिताः, न जिनेन्द्रः। इति पञ्चदशमवृत्तार्थः ॥१५॥

अथ भगवतो दीपेनोपमानिर्गममाह – निर्धूमेत्यादि

व्याख्या - हे त्रिभुवनैकदीप ! त्वमपरः- अपूर्वो दीपः- कज्जलध्वजोऽसि-वर्तसे, यतो दीपो धूमवान् सवर्तिस्तैलेनोद्द्योतको गृहमात्रप्रकाशो वातेन विध्याता चैकस्थानस्थः स्यात्, त्वमपूर्वदीपः, यतः किंविशिष्टः? 'निर्धूमवर्तिः'। धूमश्च वर्तिश्च धूमवर्ती 'द्वन्द्वः', धूमवर्तिभ्यां निर्गतो निर्धूमवर्तिः 'तत्पुरुषः'। धूमो द्वेषः वर्तिः कामदशा ताभ्यां रहित इत्यर्थः। त्वं किंभूतः? 'अपवर्जिततैलपूरः' त्यक्ततैलपूरः। तैलस्य पूरः तैलपूरः 'तत्पुरुषः', अपवर्जितस्तैलपूरो येन सः 'बहुव्रीहिः'। त्यक्तस्नेहप्रकरः। अन्यच्च - हे नाथ ! - हे स्वामिन्! त्वं कृत्स्नं-सम्पूर्णं पञ्चास्तिकायात्मकं जगत्त्रयं - विश्वत्रयं, जगतां त्रयं जगत्त्रयं (तत्) 'तत्पुरुषः' इदं - प्रत्यक्षगतं प्रकटीकरोषि-केवलोद्द्योतेन प्रकाशयसि। प्रकटं करोषीति प्रकटीकरोषि। अन्यच्च - त्वं जातु - कदाचित् चलिताचलानां-कम्पितगिरीणां, चलिता अचला यैस्ते चलिताचलास्तेषां 'बहुव्रीहिः', मरुतां-वातानां, भगवत्पक्षे मरुतां - देवानां न गम्यो-न वशः, असीति शेषः। त्वं कीदृशः? 'जगत्प्रकाशः' जगदुद्द्योतको वा। जगत्सु प्रकाशो यस्मात् स 'बहुव्रीहिः'। इति षोडशमवृत्तार्थः॥१६॥

* * *

अथ सूर्येणौपम्यनिरासमाह – नास्तमित्यादि

व्याख्या - हे 'मुनीन्द्र' ! मुनीनामिन्द्रो मुनीन्द्रस्तस्य सम्बोधनं 'तत्पुरुषः'। हे मुनीन्द्र ! - हे मुमुक्षुप्रभो ! त्वमसि-भवसि । त्वं कीदृशः? 'सूर्यातिशायिमहिमा' सूराधिकमहत्त्वः सूर्यमतिशेते इत्येवंशीलं सूर्यातिशायी 'तत्पुरुषः', सूर्यातिशायी महिमा यस्य स 'बहुव्रीहिः'। तथा यतोऽस्तं - तिरोधानं त्वं कदाचित् नोपयासि-नोपगच्छसि। सूरः सन्ध्यासमये अस्तं याति, त्वं तु सदा प्रकाशरूपः। तथा त्वं

राहुगम्यः, राहोर्गम्यो राहुगम्यः 'तत्पुरुषः' नासि। रविर्ग्रहणकाले राहुगम्यो भवति, न त्वम्। तथा त्वं सहसा - सद्यो युगपद्-एककालं जगन्ति-त्रीणि भुवनानि स्पष्टीकरोषि-प्रकाशयसि। अस्पष्टं स्पष्टं करोषीति स्पष्टीकरोषि। रविः पुनः भुवनैकदेशं क्रमेण प्रकाशयति। तथा त्वं अम्भोधरोदरनिरुद्धमहाप्रभावो नासि। अम्भोधरा-मेघास्तेषामुदरं-कुक्षिस्तेन निरुद्धः-अपनीतो महान् प्रभावः- प्रतापो यस्य सः। अम्भो धरन्तीत्यम्भो-धराः 'तत्पुरुषः', अम्भोधराणां उदरं अम्भोधरोदरं 'तत्पुरुषः', अम्भोध-रोदरेण निरुद्धोऽम्भोधरनिरुद्धः 'तत्पुरुषः', महांश्चासौ प्रभावश्च महाप्र-भावः 'कर्मधारयः', अम्भोधरोदरनिरुद्धो महाप्रभावो यस्य स 'बहु-व्रीहिः'। रविस्तद्विपरीतो भवति, अतः सूर्यातिशायिमहिमा त्वमसि। इति सप्तदशमवृत्तार्थः ।।१७।।

❊ ❊ ❊

अथेन्दोरुपमाननिरासमाह — नित्योदयमित्यादि

व्याख्या - हे देववृन्दवन्द्य ! तव मुखाब्जं-वदनकमलं, मुखमेवाब्जं मुखाब्जं 'कर्मधारयः', अपूर्वशशाङ्कबिम्बं, शशोऽङ्के यस्य स शशाङ्कः 'बहुव्रीहिः', शशाङ्कस्य बिम्बं शशाङ्कबिम्बं 'तत्पुरुषः', अपूर्वं च तत् शशाङ्कबिम्बं चापूर्वशशाङ्कबिम्बं 'कर्मधारयः', तव मुखकमलेन्दुमण्डलं विभ्राजते-भाति । किंभूतं मुखाब्जमपूर्वशशाङ्कबिम्बम्? 'नित्योदयं' शाश्वतशोभोल्लासम्। चन्द्रबिम्बं तु प्रातरस्तमेति। नित्यमुदयो यस्य तन्नित्योदयं 'बहुव्रीहिः'। पुनः किंभूतं मुखाब्जमपूर्व० ? 'दलितमोहम-हान्धकारं' दलितं-ध्वस्तं मोहः-अज्ञानं मोहनीयकर्म वा स एव महान्ध-कारं-महातमो येन (तत्)। महच्च तदन्धकारं च महान्धकारं 'कर्मधारयः', दलितं मोहमहान्धकारं येन तद् 'बहुव्रीहिः'। पुनः मुखाब्जमपूर्व० किंलक्षणम्? 'न गम्यं' न वशम्। कस्य ? 'राहुवदनस्य'। राहोर्वदनं

राहुवदनं तस्य 'तत्पुरुषः'। दुर्वादिवादस्यागोचरमित्यर्थः। तथा मुखाब्जमपूर्व० (किंभूतम्?) 'वारिदानां' वारि ददतीति वारिदास्तेषां 'तत्पुरुषः', मेघवद् दुष्टाष्टकर्मणां न गम्यं न वशम्। तानि जिनमुखेक्षणात् क्षयं यान्ति। चन्द्रबिम्बं राहोर्मेघानां च गम्यं स्यात् इति। पुनः किंभूतं मुखाब्जमपूर्व०? 'अनल्पकान्ति' गुरुतरद्युति। न अल्पा अनल्पा 'तत्पुरुषः', अनल्पा कान्तिर्यस्य तद् 'बहुव्रीहिः'। कृष्णपक्षे क्षीणतेजस्तस्मादल्पप्रभं चन्द्रबिम्बम्। मुखाब्जमपूर्व० किं कुर्वत्? 'विद्योतयत्' प्रकाशयत्। किं कर्मतापन्नम्? 'जगत्' विश्वम्। शशिबिम्बं तु खण्डेऽप्यसमर्थम्। अथ नित्यं-सदा उल्लसत् अयः - शुभभाग्यं यस्य तन्नित्योदयं 'बहुव्रीहिः', सदोल्लसच्छुभभागधेयमित्यर्थः। अतश्चन्द्रमण्डलादत्यद्भुतं भवद्वक्त्रम्। इत्यष्टादशवृत्तार्थः ॥१८॥

❊ ❊ ❊

रात्रौ चन्द्रस्य दिवा रवेर्भगवतो मुखचन्द्रे सति निरर्थकत्वं वर्णयति – किमित्यादि

व्याख्या - हे नाथ ! शर्वरीषु - रजनीषु शशिना-चन्द्रेण, शशोऽस्यास्तीति शशी तेन ('तत्पुरुषः') वा- अथवा अह्नि-दिवसे विवस्वता-सूर्येण किं कार्यं भवति? अपि तु न किमपि। केषु सत्सु? 'तमस्सु' अन्धकारेषु सत्सु। कथंभूतेषु तमस्सु? 'युष्मन्मुखेन्दुदलितेषु' भवद्वदनचन्द्रविनाशितेषु। मुखमेवेन्दुः मुखेन्दुः 'कर्मधारयः', युष्माकं मुखेन्दुः युष्मन्मुखेन्दुः 'तत्पुरुषः', युष्मन्मुखेन्दुना दलितानि युष्मन्मुखेन्दुदलितानि तेषु 'तत्पुरुषः'। अत्र दृष्टान्तमाह-'जीवलोके' भूपीठे। जीवानां लोको जीवलोकस्तस्मिन् 'तत्पुरुषः'। जीवलोके कथंभूते? 'निष्पन्नशालिवनशालिनि' निष्पन्नैः-पाकं प्राप्तैः शालिवनैः-कलमादिकेदारैः शालते-शोभते इत्येवंशीलस्तस्मिन्। शालीनां वनानि शालिवनानि 'तत्पुरुषः',

निष्पन्नानि च तानि शालिवनानि च निष्पन्नशालिवनानि 'कर्मधारयः', निष्पन्नशालिवनैः शालते इत्येवंशीलो निष्पन्नशालिवनशाली तस्मिन् 'तत्पुरुषः'। (जलधरैः किंभूतैः?) 'जलभारनम्रैः' सलिलभारनमनशीलैः। जलस्य भारो जलभारः 'तत्पुरुषः', जलभारेण नम्राः जलभारनम्रास्तैः 'तत्पुरुषः'। एवंविधैर्जलधरैः - मेघैः, जलं धरन्तीति जलधरास्तैः 'तत्पुरुषः', कियत् कार्यं स्यात्? न किमपीत्यर्थः। यथा तृणवल्लीधान्यादिषु निष्पन्नेषु मेघाः केवलं क्लेशहेतुत्वान्निष्फला एव, तथा त्वन्मुखेन्दुना ध्वस्तदुरिततिमिरत्वात् शैत्यसन्तापपीडापहारित्वाच्च चन्द्रसूर्याभ्यां न कोऽप्यर्थः। आगमेऽप्येवो (वमु) क्तम्-

'चंदाइच्चगहाणं, पहा पयासेइ परिमियं खित्तं ।
केवलिअं पुण नाणं, लोआलोअं पयासेइ ॥१॥' - आर्या

इत्येकोनविंशतितमवृत्तार्थः ॥१९॥

❊ ❊ ❊

अथ भगवद्ज्ञानेनान्यदेवान् क्षिपति – ज्ञानमित्यादि

व्याख्या - हे लोकालोकप्रकाश ! ज्ञानं यथा-येन प्रकारेण त्वयि-भवति विभाति। ज्ञानं-यथावस्थितार्थपरिच्छेदको बोधः। 'विभाति' शोभते। ज्ञानं कीदृशम्? 'कृतावकाशं' कृतोऽवकाशो येन तत् कृतावकाशं 'बहुव्रीहिः', विहितप्रकाशं धर्माधर्मादीनां, नैवं (नैव) तथा-तेन प्रकारेण ज्ञानं विभाति। केषु? 'हरिहरादिषु' नारायणमहेशादिषु। हरिश्च हरश्च हरिहरौ 'द्वन्द्वः', हरिहरावादौ येषां ते हरिहरादयस्तेषु 'बहुव्रीहिः'। हरिहरादिषु किंभूतेषु? 'नायकेषु' लोकैर्देवत्वेन स्थापितेषु। अत्रार्थेऽर्थान्तरन्यासमाह - तेजोधाम यथा-येन प्रकारेण महत्त्वं - महिमानं याति-प्राप्नोति। केषु? 'स्फुरन्मणिषु' महारत्नेषु इन्द्रनीलादिषु। स्फुरन्तश्च ते मणयश्च स्फुरन्मणयस्तेषु 'कर्मधारयः'। तथा च काचशकले-काचखण्डे,

काचस्य शकलं काचशकलं तस्मिन् 'तत्पुरुषः', नैव तेजो महत्त्वं याति। काचशकले कीदृशेऽपि? 'किरणाकुलेऽपि' रश्मिव्याप्तेऽपि। किरणैराकुलं किरणाकुलं तस्मिन् 'तत्पुरुषः'। काचशकलतुल्या हरिहरादयः, कथं तथा (दा?) तत्र ज्ञानं भवेत्?। इति विंशतितमवृत्तार्थः ॥२०॥

❊ ❊ ❊

अथ निन्दास्तुत्योर्मिश्रतामाह – मन्य इत्यादि

व्याख्या - हे सकलदेवोत्तम ! यन्मया हरिहरादय एव दृष्टाः, हरिश्च हरश्च हरिहरौ 'द्वन्द्वः', हरिहरावादी येषां ते (हरि०) 'बहुव्रीहिः', विष्णुमहेशादयो दृष्टाः- विलोकिताः तद् वरं मन्ये-प्रधानं जानामि। येषु-सुरेषु दृष्टेषु-विलोकितेषु हृदयं-चित्तं त्वयि-भवद्विषये तोषं-प्रमोदमेति-प्राप्नोति। यतस्तैर्हि तव मुद्राऽपि नाभ्यस्ता, ज्ञानं दूरे अस्तु । भवता त्वया वीक्षितेन-विलोकितेन किं जातम्?। येन कारणेनान्यः - अपरः कश्चिद् देवो भवान्तरेऽपि - अन्यजन्मन्यपि, एकस्माद् भवादन्यो भवो भवान्तरं तस्मिन् 'तत्पुरुषः', भुवि-लोके मनो न हरति-मानसं न गृह्णाति। यतः सर्वगुणो भवान् तथा भव्यानां चित्तहरणं कुरुते अन्ये देवा रागद्वेषविसंस्थुलत्वादज्ञानविकलत्वाच्च न मनोहरणं कुर्वते। इत्येकविंशतितमवृत्तार्थः ॥२१॥

❊ ❊ ❊

साम्प्रतं सर्वजननीषु भगवज्जनन्या अतिशायितां वर्णयति - स्त्रीणामित्यादि

व्याख्या - हे चतुर्दशस्वप्नसूचित ! स्त्रीणां-नारीणां शतानि बहुवचनत्वात् कोटाकोटिसंख्याः- पुत्रान्-सुतान् जनयन्ति-प्रसुवते। कथम्? 'शतशः'। शतं वारानिति शतशः। तासु मध्ये अन्या-अपरा जननी-माता त्वदुपमम्-त्वत्समं, तवोपमा यस्य स त्वदुपमस्तं 'बहुव्रीहिः',

सुतं-नन्दनं न प्रसूता- नाजीजनत्। त्वां पुत्रं मरुदेवैव प्रसूता। अत्रोपमामाह-सर्वा दिशो-निखिलाः काष्ठाः, सर्वाश्च ता दिशश्च सर्वादिशः 'कर्मधारयः', सर्वा इति पृथक् पदं वा, भानि-नक्षत्राणि दधति-धारयन्ति। प्राच्येव दिग्-पूर्वैवाशा सहस्ररश्मिं - सूर्यं, सहस्रं रश्मयो यस्य स सहस्ररश्मिस्तं 'बहुव्रीहिः' जनयति-प्रसूते। जनिं करोतीति जनयति नामधातुः। सहस्ररश्मिं कथंभूतम्? 'स्फुरदंशुजालं' चञ्चत्करकलापम्। स्फुरन्तश्च ते अंशवश्च स्फुरदंशवः 'कर्मधारयः', स्फुरदंशूनां जालं यत्र स स्फुरदंशुजालस्तं 'बहुव्रीहिः'। यथा ऐन्द्री दिक् सूरोदये हेतुः, तथा त्वज्जन्मनि मरुदेवी जननी हेतुः। इति द्वाविंशतितमवृत्तार्थः ॥२२॥

❊ ❊ ❊

अथ भगवतः परमपुंस्त्वेन स्तुतिमाह — त्वामामनन्तीत्यादि

व्याख्या - 'हे मुनीन्द्र !' मुनीनामिन्द्रो मुनीन्द्रस्तस्य सम्बोधनं 'तत्पुरुषः'। मुनयो - ज्ञानिनस्त्वां परमं पुमांसमामनन्ति-भणन्ति। त्वां किंभूतम्? 'अमलं' सकलद्वेषमलरहितम्। न विद्यते मलो यत्र सोऽमलस्तं 'बहुव्रीहिः'। त्वां किंभूतम्? 'आदित्यवर्णम्'। आदित्यवद् वर्णो यस्य स आदित्यवर्णस्तं 'बहुव्रीहिः'। कथम्? 'पुरस्तात्' अग्रे। कस्य? 'तमसः' दुरितस्य अन्धकारस्य वा। त्वां-भवन्तं सम्यगुपलभ्य-प्राप्य मुनयो मृत्युं कृतान्तभयं जयन्ति-स्फेटयन्ति। अन्यच्च शिवपदस्य-मोक्षस्थानस्य, शिवस्य पदं शिवपदं तस्य 'तत्पुरुषः', अन्यः-त्वत्तोऽपरः शिवः- प्रशस्तो निरुपद्रवो वा मार्गो नास्ति। मुक्तिकारणं त्वमेव, अतः श्रयणीयः। इति त्रयोविंशतितमवृत्तार्थः ॥२३॥

❊ ❊ ❊

अथ सर्वदेवतामयं भगवन्तं स्तौति- त्वामव्ययमित्यादि

व्याख्या - हे सर्वदर्शिन् ! सन्तो - विचक्षणास्त्वामेवंविधं प्रवदन्ति-

प्रकर्षेण ब्रुवते। त्वां किंविशिष्टम्? 'अव्ययं', न विद्यते व्ययो यस्य सोऽव्ययस्तं 'बहुव्रीहिः', सर्वकालस्थितिकस्वभावम्। पुनस्त्वां किंभूतम्? 'विभुम्', विभाति परमैश्वर्येणेति विभुस्तं विभुम्। द्वितीयोऽर्थो भण्यते-विभवति-कर्मोन्मूलने समर्थो भवतीति विभुस्तं विभुम्, अथवा विभुम्-इन्द्रादिप्रभुम्। पुनस्त्वां किंभूतम्? 'अचिन्त्यं', चिन्तनार्हश्चिन्त्यः, न चिन्त्योऽचिन्त्यस्तं 'तत्पुरुषः', अध्यात्मिकैरपि चिन्तितुमशक्यम्। तथा त्वां किंभूतम्? 'असङ्ख्यं', न विद्यते सङ्ख्या यस्य सोऽसङ्ख्यस्तं 'बहुव्रीहिः', गुणैरपि अपरिमेयमित्यर्थः। पुनस्त्वां किंभूतम्? 'आद्यम्' आदौ भव आद्यस्तमाद्यम्, अथवा चतुर्विंशतिजिनेष्वाद्यस्तमाद्यं-प्रथमं तीर्थङ्करं तस्य तीर्थस्यादिकरत्वादाद्यस्तमाद्यं-प्रथमम्। पुनस्त्वां किंभूतम्? 'ब्रह्माणं' बृहति-अनन्तानन्देन वर्धते इति ब्रह्मा तम्। पुनस्त्वां किंभूतम्? 'ईश्वरं' नाथम्। पुनस्त्वां किंभूतम्? 'अनन्तं', न विद्यतेऽन्तो यस्य सोऽनन्तस्तं 'बहुव्रीहिः', मुक्तिपदप्राप्तत्वात् मृत्युरहितम्। पुंनस्त्वां किंभूतम्? 'अनङ्गकेतुम्', अनङ्गे केतुरनङ्गकेतुस्तं 'तत्पुरुषः', कामनाशनम्। पुनस्त्वां किंभूतम्? 'योगीश्वरं', योगो विद्यते येषां ते योगिनः, योगिनामीश्वरो योगीश्वरस्तं 'तत्पुरुषः', योगिनां - मनोवचःकायजितां ज्ञातचतुर्ज्ञानिनां वा ईश्वरं-नाथम्। पुनस्त्वां किंभूतम्? 'विदितयोगम्'। विदितो योगो येन यस्य वा स विदितयोगस्तं 'बहुव्रीहिः'। विदितो-ज्ञातो ध्यानिभिर्मनोवाक्कायसंवररूपोऽष्टांगरूपो वा योगो यस्य स विदितयोगस्तम्। पुनस्त्वां किंभूतम्? 'अनेकम्'। न एकोऽनेकस्तं 'तत्पुरुषः', ज्ञानेन सर्वगतत्वात्। पुनस्त्वां किंभूतम्? 'एकं' जीवद्रव्याद्यपेक्षया। पुनस्त्वां किंभूतम्? 'ज्ञानस्वरूपं', ज्ञानमेव स्वरूपं यस्य स ज्ञानस्वरूपस्तं 'बहुव्रीहिः', क्षायिककेवलचिन्मयम्। पुनस्त्वां किंभूतम्? 'अमलं' निर्मलम्। न विद्यते रागादिमलो यत्र सोऽमलस्तं 'बहुव्रीहिः', अष्टादशदोषरहितम्। पञ्चदश उक्तयो वाऽत्र पृथक्तया ज्ञेयाः। इति चतुर्विंशतितमवृत्तार्थः ॥२४॥

इदानीं बुद्धमहेशविधातृविष्णुरूपपुरुषचतुष्टयस्वरूपं भगवतोऽवदर्शयति बुद्धेत्यादि

व्याख्या - हे 'विबुधार्चित !' हे शक्रमहित !। विबुधैरर्चितो विबुधार्चितस्तस्य सम्बोधनं 'तत्पुरुषः'। त्वमेव बुद्धोऽसि। कस्मात्? पदार्थेषु 'बुद्धिबोधात्' मतिप्रकाशात्। बुद्धेर्बोधो बुद्धिबोधस्तस्मात् 'तत्पुरुषः'। 'त्वं शङ्करोऽसि' शिवो भवसि। शं करोतीति शङ्करः 'तत्पुरुषः'। कस्मात्? 'भुवनत्रयशङ्करत्वात्' जगत्त्रयसुखोत्पादकत्वात्। भुवनानां त्रयं भुवनत्रयं 'तत्पुरुषः', शङ्करस्य भावः शङ्करत्वं, भुवनत्रयस्य शङ्करत्वं भुवनत्रयशङ्करत्वं तस्मात् 'तत्पुरुषः'। हे धीर! त्वं धाताऽसि-स्रष्टा भवसि। कस्मात्? 'विधानात्' निष्पादनात् । कस्य? 'शिवमार्गविधेः' मोक्षमार्गविधेः। शिवस्य मार्गः शिवमार्गः 'तत्पुरुषः', शिवमार्गस्य विधिः शिवमार्गविधिस्तस्य तत्पुरुषः हे ! भगवन् ! व्यक्तं-प्रकटं त्वमेव पुरुषोत्तमोऽसि-पुरुषोत्कृष्टो भवसि। पुरुषेषूत्तमः पुरुषोत्तमः 'तत्पुरुषः' इति पञ्चविंशतितमवृत्तार्थः ।।२५।।

* * *

तुभ्यमित्यादि

व्याख्या - हे नाथ ! तुभ्यं - भवते नमोऽस्तु । तुभ्यं किंभूताय? 'त्रिभुवनार्तिहराय' विश्वत्रयीपीडानाशकाय। त्रयाणां भुवनानां समाहारस्त्रिभुवनं 'द्विगुः' त्रिभुवनस्य आर्तिः त्रिभुवनार्तिः 'तत्पुरुषः', त्रिभुवनार्तिं हरतीति त्रिभुवनार्तिहरस्तस्मै 'तत्पुरुषः'। तुभ्यं कथंभूताय? 'क्षितितलामलभूषणाय' क्षितितलस्य-भूपीठस्यामल-भूषणाय - निर्मलालङ्काराय। क्षितेस्तलं क्षितितलं 'तत्पुरुषः', न विद्यते मलो यत्र तदमलं ('बहुव्रीहिः'), अमलं च तद् भूषणं चामलभूषणं 'कर्मधारयः', क्षितितलस्यामलभूषणं क्षितितलामलभूषणं तस्मै 'तत्पुरुषः'। तुभ्यं नमोऽस्तु । तुभ्यं किंलक्षणाय?

'परमेश्वराय'। परमश्चासावीश्वरश्च परमेश्वरः तस्मै 'कर्मधारयः'। कस्य? 'त्रिजगतः'। त्रयाणां जगतां समाहारस्त्रिजगत् तस्य 'द्विगुः'। त्रैलोक्यप्रकृष्टनाथायेत्यर्थः। हे जिन ! तुभ्यं नमोऽस्तु। तुभ्यं किंलक्षणाय? 'भवोदधिशोषणाय' भव एवोदधिर्भवोदधिः 'कर्मधारयः', भवोदधेः शोषणं यस्मिन् स भवोदधिशोषणस्तस्मै 'बहुव्रीहिः'। संसारसागरसन्तापनाय। इति षड्विंशतितमवृत्तार्थः ॥२६॥

* * *

पुनर्युक्त्या गुणान् स्तौति – को विस्मयोऽत्रेत्यादि

व्याख्या - हे 'मुनीश !' मुनीनां ईशो मुनीशस्तस्य सम्बोधनं 'तत्पुरुषः'। नामेति कोमलामन्त्रणे। यदि निरवकाशतया-सर्वाङ्गव्यापकतया, निर्गतोऽवकाशो यस्मादिति निरवकाशः ('बहुव्रीहिः'), निरवकाशस्य भावो निरवकाशता तया, अशेषैः-सर्वैः, न विद्यते शेषो येषु ते अशेषास्तैः 'बहुव्रीहिः', गुणैस्त्वं संश्रितः-आश्रितः। अत्रार्थे को विस्मयः? किं कौतुकमस्ति? अन्यच्च दोषैः- दूषणैः स्वप्नान्तरेऽपि -स्वप्नावस्थायामपि। एकस्मात् स्वप्नादन्यः स्वप्नः स्वप्नान्तरं तस्मिन् 'तत्पुरुषः', कदाचिदपि-कस्मिंश्चिदपि क्षणे नेक्षितोऽसि-न विलोकितोऽसि। अत्रापि को विस्मयः? - किमाश्चर्यम्?। यतो गरुडदर्शनाद् भुजगा इव सूर्येक्षणात् तमश्चया इव दूरे नश्यन्ति, तथा त्वत्तो दोषा नेशुः। किंभूतैर्दोषैः? 'उपात्तविविधाश्रयजातगर्वैः' विविधाश्च ते आश्रयाश्च विविधाश्रयाः, उपात्ताश्च ते विविधाश्रयाश्च उपात्तविविधाश्रयाः उभयत्र 'कर्मधारयः', उपात्तविविधाश्रयैर्जातः उपात्तविविधाश्रयजातः ('तत्पुरुषः'), उपात्तविविधाश्रयजायतो गर्वो येषां ते उपात्तविविधाश्रयजातगर्वास्तैः 'बहुव्रीहिः'। उपात्ताः- प्राप्ता ये विविधा-नानारूपा आश्रया-निलयास्तैर्जात-उत्पन्नो गर्वो येषां ते तैः। वयं सर्वजनप्रियाः, गुणास्तु स्तोकजनाश्रया एवेति रूपो दर्पो येषाम्। इति सप्तविंशतितमवृत्तार्थः ॥२७॥

अथ वृत्तचतुष्टयेन प्रातिहार्यचतुष्कमाह – उच्चैरशोकेत्यादि

व्याख्या - हे सेवकजनकल्पवृक्ष ! भवतः-तव रूपमाभाति-शोभते। कथम्? 'उच्चैः' अतिशयेन। रूपं किंलक्षणम्? 'अशोकतरुसंश्रितम्'। न विद्यते शोको यत्र सोऽशोकः 'बहुव्रीहिः', अशोकश्चासौ तरुश्चाशोकतरुः 'कर्मधारयः', अशोकतरौ संश्रितं अशोकतरुसंश्रितं 'तत्पुरुषः'। पुनः किंलक्षणं रूपम्? 'उन्मयूखम्'। (उद्-) ऊर्ध्वं मयूखा- किरणा यस्य तद् 'बहुव्रीहिः'। रूपं किंभूतम्? 'अमलं' निर्मलं मलस्वेदादिरहितम्। न विद्यते मलो यत्र तदमलं 'बहुव्रीहिः'। कथम्? 'नितान्तं' निरन्तरम्। दृष्टान्तमाह-इव यथा रवेः-सूर्यस्य बिम्बं-मण्डलमाभाति। बिम्बं किंलक्षणम्? 'पयोधरपार्श्ववर्ति' मेघसमीपस्थम्। पयो धरतीति पयोधरः 'तत्पुरुषः', पयोधरस्य पार्श्वं 'तत्पुरुषः', पयोधरपार्श्वं वर्तते इत्येवंशीलं पयोधरपार्श्ववर्ति 'तत्पुरुषः'। बिम्बं कथंभूतम्? 'स्पष्टोल्लसत्किरणं' प्रकटोद्यत्प्रभम्। उल्लसन्तश्च ते किरणाश्च उल्लसत्किरणाः 'कर्मधारयः', स्पष्टा उल्लसत्किरणा यस्मिन् तद् 'बहुव्रीहिः'। बिम्बं किंलक्षणम्? 'अस्ततमोवितानं' ध्वस्तान्धकारप्रकरम्। तमसो वितानं तमोवितानं 'तत्पुरुषः', ध्वस्तं तमोवितानं येन तद् 'बहुव्रीहिः'। सूरमण्डलसमानं भगवद्रूपं, मेघतुल्यो नीलदलोऽशोकः। इत्यष्टाविंशतितमवृत्तार्थः ॥२८॥

* * *

सिंहेत्यादि

व्याख्या - हे तीर्थनाथ ! तव-भवतो वपुः-देहो विभ्राजते-शोभते। वपुः किंलक्षणम्? 'कनकावदातं', कनकवदवदातं कनकावदातं 'तत्पुरुषः', हेमगौरम्। कस्मिन्? 'सिंहासने' सुवर्णनिष्पन्नासने। सिंहासने किंविशिष्टे? 'मणिमयूखशिखाविचित्रे' रत्नकान्तिचूलाचारुणि। मणीनां मयूखाः मणिमयूखाः 'तत्पुरुषः', मणिमयूखानां शिखाः मणिमयूख-

शिखाः 'तत्पुरुषः', मणिमयूखशिखाभिर्विचित्रं तस्मिन् 'तत्पुरुषः'। दृष्टान्तमाह इव-यथा सहस्ररश्मेः, सहस्रं रश्मयो यस्य स सहस्ररश्मिस्तस्य 'बहुव्रीहिः' सूर्यस्य बिम्बं मण्डलं विभ्राजते। कस्मिन्? 'तुङ्गोदयाद्रिशिरसि' उन्नतपूर्वाचलशृङ्गे। उदयस्य अद्रिः उदयाद्रिः 'तत्पुरुषः', तुङ्गश्चासावुदयाद्रिश्च तुङ्गोदयाद्रिः 'कर्मधारयः', तुङ्गोदयाद्रेः शिरः तुङ्गोदयाद्रिशिरस्तस्मिन् 'तत्पुरुषः'। बिम्बं कथंभूतम्? 'वियद्विलसदंशुलतावितानं' वियति-आकाशे विलसन्तो-द्योतमाना येंऽशवः-करास्त एव लतावितानं-वल्लिविस्तारो यस्य तद्। विलसन्तश्च तेंऽशवश्च विलसदंशवः 'कर्मधारयः', लतानां वितानं लतावितानं 'तत्पुरुषः', विलसदंशव एव लतावितानं विलसदंशुलतावितानं 'कर्मधारयः', वियति विलसदंशुलतावितानं यस्य तद् 'बहुव्रीहिः'। इत्येकोनत्रिंशत्तमवृत्तार्थः ॥२९॥

❋ ❋ ❋

कुन्देत्यादि

व्याख्या - हे पारगत ! तव-भवतो वपुः-शरीरं विभ्राजते-चकास्ते। वपुः किंलक्षणम्? 'कलधौतकान्तं' चामीकररुचिरम्। कलधौतवत् कान्तं कलधौतकान्तं 'तत्पुरुषः'। पुनः किंविशिष्टं वपुः? 'कुन्दावदातचलचामरचारुशोभम्'। चलानि च तानि चामराणि च चलचामराणि 'कर्मधारयः', कुन्दवदवदातानि कुन्दावदातानि 'कर्मधारयः', कुन्दावदातानि च तानि चलचामराणि च कुन्दावदातचलचामराणि 'कर्मधारयः', कुन्दावदातचलचामरैश्चार्वी कुन्दावदातचलचामरचार्वी 'तत्पुरुषः', कुन्दावदातचलचामरचार्वी शोभा यस्य तद् 'बहुव्रीहिः'। कुन्दावदातानि-कुन्दवद् विशदानि चलचामराणि-चपलवालव्यजनानि तैः चारुशोभं-मनोज्ञशोभम्। दृष्टान्तमाह-इव-यथा सुरगिरेः, सुराणां गिरिः सुरगिरिस्तस्य 'तत्पुरुषः'

मेरोः शातकौम्भं, शातकुम्भस्येदं शातकौम्भं-सौवर्णं तटं -शिखरं विभ्राजते। कथम्? 'उच्चैः' अतिशयेन। पुनः किंलक्षणं तटम्? 'उद्यच्छशाङ्कशुचिनिर्झरवारिधारम्'। निर्झराणां वारीणि निर्झरवारीणि 'तत्पुरुषः', निर्झरवारीणां धारा निर्झरवारिधाराः 'तत्पुरुषः', शशोऽङ्के यस्य स शशाङ्कः 'बहुव्रीहिः', उद्यच्चासौ शशाङ्कश्चोद्यच्छशाङ्कः, 'कर्मधारयः', उद्यच्छशाङ्कवत् शुचयः उद्यच्छशाङ्कशुचयः उद्यच्छशाङ्कशुचयो निर्झरवारिधारा यत्र तद् 'बहुव्रीहिः'। उद्यत्-उद्गच्छन् यः शशाङ्कः-चन्द्रस्तद्वत् शुचयो-धवला निर्झरवारिधारा-निर्झरजलधारा यत्र। अत्र मेरुतटसमं श्रीनाभेयशरीरं, निर्झरजलधारासमा चामरश्रेणिः। इति त्रिंशत्तमवृत्तार्थः॥३०॥

❊ ❊ ❊

छत्रेत्यादि

व्याख्या - हे पवित्रचारित्र! तव-भवतः छत्रत्रयं, छत्राणां त्रयं छत्रत्रयं 'तत्पुरुषः' आतपवारणत्रितयं विभाति-चकास्ते। छत्रत्रयं किंलक्षणम्? 'शशाङ्ककान्तं' चन्द्रमनोहरम्। शशोऽङ्के यस्य स शशाङ्कः 'बहुव्रीहिः', शशाङ्कवत् कान्तं शशाङ्ककान्तं 'तत्पुरुषः'। छत्रत्रयं पुनः किंलक्षणम्? 'स्थितं' निविष्टम्। कथम्? 'उच्चैः' ऊर्ध्वं, मुर्ध्नि स्थितमित्यर्थः। छत्रत्रयं पुनः किंलक्षणम्? 'स्थगितभानुकरप्रतापम्' आच्छादितसूर्यकरानुभावम्। भानोः करा भानुकराः 'तत्पुरुषः', भानुकराणां प्रतापो भानुकरप्रतापः 'तत्पुरुषः', स्थगितो भानुकरप्रतापो येन तद् 'बहुव्रीहिः'। पुनः किंविशिष्टं छत्रत्रयम्? 'मुक्ताफलप्रकरजालविवृद्धशोभम्'। मुक्ताफलानां प्रकरो मुक्ताफलप्रकरः 'तत्पुरुषः', मुक्ताफलप्रकरस्य जालं मुक्ताफलप्रकरजालं 'तत्पुरुषः' मुक्ताफलप्रकरजालेन विवृद्धा मुक्ताफलप्रकरजालविवृद्धाः 'तत्पुरुषः', मुक्ताफलप्रकरजालविवृद्धा शोभा यस्य तद् 'बहुव्रीहिः'। मुक्ताफलप्रकरस्य-मुक्ताफलसमूहस्य जालेन-

रचनाविशेषेण विवृद्धा-वृद्धिं प्राप्ता शोभा-प्रभा यस्य तत्। छत्रत्रयं किं कुर्वत्? 'प्रख्यापयत्' निवेदयत्। किं कर्मतापन्नम्? 'परमेश्वरत्वं' प्रकृष्टप्रभुत्वम्। परमश्चासावीश्वरश्च परमेश्वरः 'कर्मधारयः', परमेश्वरस्य भावः परमेश्वरत्वं तत्। कस्य? 'त्रिजगतः' त्रिभुवनस्य। त्रयाणां जगतां समाहारस्त्रिजगत् तस्य 'द्विगुः'। इत्येकत्रिंशत्तमवृत्तार्थः॥३१॥

❋ ❋ ❋

अथातिशयद्वारेण जिनं स्तौति – उन्निद्रेत्यादि

व्याख्या - हे 'जिनेन्द्र !' जिनानामिन्द्रो जिनेन्द्रस्तस्य सम्बोधनं 'तत्पुरुषः'। तव भवतः पादौ-चरणौ यत्र भूमौ पदानि-गमने अवस्थानरूपाणि धत्ते-बिभ्रते। 'डु धाञ् धारणपोषणयोः' (पा. धा. १०९२) इति धातुः। तत्र-धरापीठे विबुधा-देवाः पद्मानि-कमलानि परिकल्पयन्ति-निर्मापयन्तीत्यर्थः । कथंभूतौ पादौ? 'उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूखशिखाभिरामौ' उन्निद्राणि-विकस्वराणि हेम्नः - सुवर्णस्य नवानि-नूतनानि नवसंख्याकानि वा पङ्कजानि-कमलानि तेषां पुञ्जः-समूहस्तस्य कान्तिः- द्युतिस्तया पर्युल्लसन्ती-समन्तादुल्लसन्ती या नखानां मयूखशिखाः- किरणचूलास्ताभिरभिरामौ-रुचिरौ। नवानि च तानि पङ्कजानि च नवपङ्कजानि 'कर्मधारयः', हेम्नो नवपङ्कजानि हेमनवपङ्कजानि 'तत्पुरुषः', उन्निद्राणि च तानि हेमनवपङ्कजानि च उन्निद्रहेमनवपङ्कजानि 'कर्मधारयः', उन्निद्रहेमनवपङ्कजानां पुञ्जः उन्निद्रहेमनवपङ्कजपुञ्जः 'तत्पुरुषः', उन्निद्रहेमनवपङ्कजपुञ्जस्य कान्तिरुन्निद्रहेमनवपङ्कजपुञ्जकान्तिः 'तत्पुरुषः', नखानां मयूखा नखमयूखाः 'तत्पुरुषः', नखमयूखानां शिखा नखमयूखशिखाः 'तत्पुरुषः', पर्युल्लसन्तश्च ता नखमयूखशिखाश्च पर्युल्लसन्नखमयूखशिखाः 'कर्मधारयः', उन्निद्रहे-

मनवपङ्कजपुञ्जकान्त्या पर्युल्लसन्नखमयूखशिखाः उन्निद्रहेमनवपङ्कज-पुञ्जकान्तिपर्युल्लसन्नखमयूखशिखाः 'तत्पुरुषः', उन्निद्रहेमनवपङ्कजपु-ञ्जकान्तिपर्युल्लसन्नखमयूखशिखाभिरभिरामौ उन्निद्रहेमनवपङ्कजपुञ्जकान्तिपर्यु-ल्लसन्नखमयूखशिखाभिरामौ 'तत्पुरुषः'। इति द्वात्रिंशत्तमवृत्तार्थः ॥३२॥

❊ ❊ ❊

अथ संक्षिपति – इत्थमित्यादि

व्याख्या - हे 'जिनेन्द्र !' जिनानामिन्द्रो जिनेन्द्रस्तस्य सम्बोधनं 'तत्पुरुषः'। इत्थं पूर्वोक्तप्रकारेण यथा धर्मोपदेशनविधौ-धर्मव्याख्याक्षणे, धर्मस्योपदेशनं धर्मोपदेशनं 'तत्पुरुषः', धर्मोपदेशनस्य विधिर्धर्मोपदेश-नविधिस्तस्मिन् 'तत्पुरुषः', तव विभूतिः - अतिशयरूपा समृद्धिरभूत्-जाता तद्वत् अपरस्य-ब्रह्मादिसुरस्य नाभूत्। अत्र दृष्टान्तमाह दिनकृतः सूर्यस्य, दिनं करोतीति दिनकृत् तस्य 'तत्पुरुषः', प्रहतान्धकारा-ध्वस्तध्वान्ता, प्रहतमन्धकारं यया सा प्रहतान्धकारा 'बहुव्रीहिः', यादृग् - यादृशी प्रभा-द्युतिर्वर्तते 'विकाशिनोऽपि' विकाशोऽस्यास्तीति विकाशी तस्य उदितोद्योतस्यापि 'ग्रहगणस्य' ग्रहाणां गणो ग्रहगणस्तस्य 'तत्पु-रुषः', भौमादेस्तादृक्-तादृशी प्रभा कुतः कस्माद् भवति? । अपि तु नैव । इति त्रयस्त्रिंशत्तमवृत्तार्थः ॥३३॥

❊ ❊ ❊

अथ गजभयहरं जिनं स्तौति – श्च्योतन्मदेत्यादि

व्याख्या - हे गजपतिगते ! भवदाश्रितानां-त्वच्चरणस्थितानां भवन्त-माश्रिता भवदाश्रितास्तेषां 'तत्पुरुषः', एवंविधानां नराणामिति शेषः, भयं-भीतिर्नो भवति - न स्यात्। किं कृत्वा? 'दृष्ट्वा' वीक्ष्य। कं कर्मतापन्नम्? । 'इभं' गजम्। किंभूतमिभम्? 'ऐरावताभं' महाकायत्वा-

दैरावणसमम्। ऐरावतवदाभा यस्य स एरावताभस्तं 'बहुव्रीहिः'। पुनः किंलक्षणमिभम्? 'उद्धतम्' अविनीतम्। इभं किं कुर्वन्तम्? 'आपतन्तं सन्मुखमागच्छन्तम्। पुनः किंलक्षणमिभम्? 'श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धकोपं' गण्डौ नेत्रे करो मेढ्रं गुदमिति सप्तसु स्थानेषु श्च्योतता-क्षरता मदेनाविलाः कलुषा विलोलाः चञ्चलाः कपोलमूले-गण्डप्रदेशे मत्ताः-क्षीबाः सन्तो 'मतवाला' इति लोकप्रसिद्धिः (द्धाः?) (भ्रमन्तः-) भ्रमणशीला ये भ्रमरास्तेषां नादेन-कठोरध्वनिना विवृद्धः- पुष्टिं गतः कोपः क्रोधो यस्य स तम्। श्च्योतंश्चासौ मदश्च श्च्योतन्मदः 'कर्मधारयः', श्च्योतन्मदेनाविलाः श्च्योतन्मदाविलाः 'तत्पुरुषः', कपोलयोर्मूले कपोलमूले 'तत्पुरुषः', कपोलमूलयोर्मत्ताः कपोलमूलमत्ताः 'तत्पुरुषः', भ्रमन्तश्च ते भ्रमराश्च भ्रमद्भ्रमराः 'कर्मधारयः', कपोलमूलमत्ताश्च ते भ्रमद्भ्रराश्च कपोलमूलमत्तभ्रमद्भ्रमराः 'कर्मधारयः', विलोलाश्च ते कपोलमूलमत्तभ्रमद्भ्रमराश्च विलोलकपोलमूलमत्तभ्रमद्भ्रमराः 'कर्मधारयः', श्च्योतन्मदाविलाश्च ते विलोलकपोलमूलमत्तभ्रमद्भ्रमराश्च श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमराः 'कर्मधारयः', श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमराणां नादः श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादः 'तत्पुरुषः', श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादेन विवृद्धः श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धः 'तत्पुरुषः', श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धः कोपो यस्य सः श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रमद्भ्रमरनादविवृद्धकोपस्तं 'बहुव्रीहिः'। इति चतुस्त्रिंशत्तमवृत्तार्थः ॥३४॥

❊ ❊ ❊

अथ सिंहभयहरं जिनं स्तौति – भिन्नेभेत्यादि

व्याख्या - हे पुरुषसिंह ! 'हरिणाधिपोऽपि' हरिणानामधिपो हरिणा-

धिपः 'तत्पुरुषः' सिंहोऽपि ते-तव क्रमयुगाचलसंश्रितं - चरणयुग्मपर्वत-कृतवासं, क्रमयोर्युगं क्रमयुगं 'तत्पुरुषः', क्रमयुगमेवाचलः क्रमयुगा-चलः 'कर्मधारयः', क्रमयुगाचलं संश्रितः क्रमयुगाचलसंश्रितः 'तत्पु-रुषः' एवंविधं पुरुषं नाक्रामति-न ग्रहणायोद्यतते, न हन्तुमुद्धावतीत्यर्थः। पुरुषं किंभूतम्? 'क्रमगतं' क्रमयोर्गतः क्रमगतः तं 'तत्पुरुषः', फालप्राप्तमित्यर्थः। हरिणाधिपः किंलक्षणः? 'बद्धक्रमः' बद्धः-कीलितः क्रमः - पराक्रमो यस्याथवा बद्धाः क्रमाः - पादविक्षेपरूपा येन स बद्धक्रमः 'बहुव्रीहिः'। हरिणाधिपः किंविशिष्टः? 'भिन्नेभकुम्भगलदु-ज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः' भिन्नाभ्यां (-पाटिताभ्यां) हस्तिशिरः- पिण्डाभ्यां गलता-पतता उज्ज्वलेन-श्वेतवर्णेन शोणिताक्तेन-रुधिरखरण्टितेन मुक्ताफलप्रकरेण-मौक्तिकसमूहेन भूषितो-मण्डितो भूमिभागो येन सः। एतेन भद्रद्विपहन्तृत्वान्महाबलिष्ठत्वं सूचितम्। भिन्नश्चासाविभश्च भिन्नेभः 'कर्मधारयः' भिन्नेभस्य कुम्भौ भिन्नेभकुम्भौ 'तत्पुरुषः', उज्ज्वलं च तत् शोणितं च उज्ज्वलशोणितं 'कर्मधारयः', गलच्च तद् उज्ज्वलशोणितं च गलदुज्ज्वलशोणितं 'कर्मधारयः', भिन्नेभकुम्भाभ्यां गलदुज्ज्वलशोणितं भिन्नेभकुम्भगलदुज्ज्वलशोणितं 'तत्पुरुषः', भिन्ने-भकुम्भगलदुज्ज्वशोणितेनाक्तः भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तः 'तत्पु-रुषः', मुक्ताफलानां प्रकरः मुक्ताफलप्रकरः 'तत्पुरुषः' भिन्नेभकुम्भग-लदुज्ज्वलशोणिताक्तश्चासौ मुक्ताफलप्रकरश्च भिन्नेभकुम्भगलदुज्ज्वल-शोणिताक्तमुक्ताफलप्रकरः 'कर्मधारयः', भिन्नेभकुम्भगलदुज्ज्वलशो-णिताक्तमुक्ताफलप्रकरेण भूषितो भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमु-क्ताफलप्रकरभूषितः 'तत्पुरुषः', भूमेर्भागो भूमिभागः 'तत्पुरुषः', भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषितो भूमिभागो येन स भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः 'बहु-व्रीहिः'। इति पञ्चत्रिंशत्तमवृत्तार्थः ॥३५॥

अथ दावानलभयहरं जिनं स्तौति - कल्पान्तेत्यादि

व्याख्या - हे कर्मक्षयैकक्षयकृशानो ! त्वन्नामकीर्तनजलं-त्वदभिधानस्तवननीरं, तव नाम त्वन्नाम 'तत्पुरुषः', त्वन्नाम्नः कीर्तनं त्वन्नामकीर्तनं 'तत्पुरुषः', त्वन्नामकीर्तनमेव जलं त्वन्नामकीर्तनजलं 'कर्मधारयः', 'अशेषं' न विद्यते शेषो यत्र सोऽशेषस्तं 'बहुव्रीहिः', विद्युत्पातादिभेदात् सकलं दावानलं-वनवह्निम्, दावश्चासावनलश्च दावानलस्तं 'कर्मधारयः' शमयति-विध्यापयति। किंभूतं दावानलम्? 'कल्पान्तकालपवनोद्धतवह्निकल्पं' कल्पान्तकालपवनेन - युगान्तसमयवातेन उद्धतः - उत्कटो यो वह्निः-अग्निस्तेन कल्पं-सदृशम्। कल्पस्यान्तः कल्पान्तः 'तत्पुरुषः', कल्पान्तश्चासौ कालश्च कल्पान्तकालः 'कर्मधारयः', कल्पान्तकालस्य पवनः कल्पान्तकालपवनः 'तत्पुरुषः', कल्पान्तकालपवनेनोद्धतः कल्पान्तकालपवनोद्धतः 'तत्पुरुषः', कल्पान्तकालपवनोद्धतश्चासौ वह्निश्च कल्पान्तकालपवनोद्धतवह्निः 'कर्मधारयः', कल्पान्तकालपवनोद्धतवह्निना कल्पः तं 'तत्पुरुषः'। पुनः किंभूतं दावानलम्? 'ज्वलितं' प्रदीप्तम्। पुनः किंविशिष्टम्? 'उज्ज्वलं' रक्तम्। पुनं किंलक्षणं दावानलम्? 'उत्स्फुलिङ्गम्' उल्लसद्वह्निकणम्। उद्-ऊर्ध्वं स्फुलिङ्गा यस्य स उत्स्फुलिङ्गस्तं 'बहुव्रीहिः'। दावानलं किं कुर्वन्तम्? 'सन्मुखमापतन्तम्' अभिमुखमागच्छन्तम्। इवोत्प्रेक्षते। विश्वं-जगत् जिघत्सुं-जिग्रसिषुमिव 'घसृ(स्लृ) अदने' (पा. धा. ७१५) इति धातुः, अशेषं-सामान्येन सर्वदिग्व्यापकं वा। त्वन्नामस्मरणं दावानलं स्फेटयति। इति षट्त्रिंशत्तमवृत्तार्थः ॥३६॥

* * *

अथ भुजङ्गमभयं दलयन्नाह — रक्तेक्षणमित्यादि

व्याख्या - हे नागपतिसेव्य ! यस्य पुंसः-पुरुषस्य हृदि-चित्ते

त्वन्नामनागदमनी त्वन्नामैव नागदमनी-औषधिविशेषः जाङ्गुलीविद्या वा, तव नाम त्वन्नाम 'तत्पुरुषः', त्वन्नामैव नागदमनी त्वन्नामनागदमनी 'कर्मधारयः', वर्तते इति शेषः, स पुमान् 'निरस्तशङ्कः' निरस्ता शङ्का येन स 'बहुव्रीहिः' निर्भयः सन् 'क्रमयुगेन' क्रमयोर्युगं क्रमयुगं तेन 'तत्पुरुषः' निजचरणयुगलेन 'फणिनं' फणा विद्यन्ते यस्य स फणी तं 'बहुव्रीहिः' सर्पं आक्रामति-घर्षति रज्जुवत्। क्रमयुगग्रहणेन विशेषं द्योतयति। सामान्योऽपि सर्पः पादाहतः कुप्यति, दुष्टदन्दशूकस्य तु का वार्ता?। किंभूतं फणिनम्? 'रक्तेक्षणं' रक्ते ईक्षणे यस्य स तं 'बहुव्रीहिः', ताम्रनेत्रम्। (पुनः) किंभूतं फणिनम्? 'समदकोकिलकण्ठ-नीलम्'। कोकिलस्य कण्ठः कोकिलकंण्ठः 'तत्पुरुषः', सह मदेन वर्तते यः स समदः 'बहुव्रीहिः', समदश्चासौ कोकिलकण्ठश्च समदकोकिल-कण्ठः 'कर्मधारयः', समदश्चासौ कोकिलश्च समदकोकिलः 'कर्मधा-रयः', समदकोकिलस्य कण्ठः समदकोकिलकण्ठः 'तत्पुरुषः' इति वा, समदकोकिलकण्ठवन्नीलः समदकोकिलकण्ठनीलः 'तत्पुरुषः', मत्तपिकगलकालम्। फणिनं पुनः किंभूतम्? 'क्रोधोद्धतं' कोपोत्कटम्। क्रोधेनोद्धतः क्रोधोद्धतस्तं 'तत्पुरुषः'। पुनः किंलक्षणं फणिनम्?। 'उत्फणं' ऊर्ध्वीकृतस्फटम्। उद्-ऊर्ध्वं फणा यस्य स उत्फणस्तं 'बहुव्रीहिः'। फणिनं किं कुर्वन्तम्? 'आपतन्तं' सन्मुखं धावन्तम्। इति सप्तत्रिंशत्तमवृत्तार्थः ॥३७॥

❊ ❊ ❊

अथ रणभयं निरस्यन्नाह – वल्गत्तुरङ्गेत्यादि

व्याख्या - हे देवाधिदेव ! त्वत्कीर्तनात्-त्वन्नामग्रहणात्, तव कीर्तनं त्वत्कीर्तनं तस्मात् 'तत्पुरुषः' आजौ-सङ्ग्रामे बलवतामपिशक्तानामपि, बलं विद्यते येषां ते वलवन्तस्तेषां 'बहुव्रीहिः', भूपतीनां राज्ञां, भुवः

पतयो भूपतयस्तेषां 'तत्पुरुषः' बलं-कटकमाशु-शीघ्रं भिदां-भेदमुपैति-प्रयाति, प्रलयं यातीत्यर्थः। बलं किंभूतम्? 'वल्गत्तुरङ्गगजगर्जितभीमनादं' वल्गतां-युद्ध्यमानानां तुरङ्गाणां गजानां च गर्जितानि तैर्भीमा-रौद्रा नादाः-सिंहनादा यत्र तत्। तुरङ्गाश्च गजाश्च तुरङ्गगजाः 'द्वन्द्वः',वल्गन्तश्च ते तुरङ्गगजाश्च वल्गत्तुरङ्गगजाः 'कर्मधारयः', वल्गत्तुरङ्गगजानां गर्जितानि वल्गत्तुरङ्गगजगर्जितानि 'तत्पुरुषः' अथवा वल्गन्तश्च ते तुरङ्गाश्च वल्गत्तुरङ्गाः 'कर्मधारयः', गजानां गर्जितानि गजगर्जितानि 'तत्पुरुषः' वल्गत्तुरङ्गाश्च गजगर्जितानि च वल्गत्तुरङ्गगजगर्जितानि 'द्वन्द्वः' भीमाश्च ते नादाश्च भीमनादाः 'कर्मधारयः', वल्गत्तुरङ्गगजगर्जितैर्भीमनादा यत्र तद् 'बहुव्रीहिः'। दृष्टान्तमाह- इव यथा तमः - अन्धकारं भिदामुपैति-भेदं गच्छति। तमः किंलक्षणम्? 'उद्यद्दिवाकरमयूखशिखापविद्धं' उद्गच्छत्सुरकराग्रप्रेरितम्। दिवा करोतीति दिवाकरः 'तत्पुरुषः', दिवेति शब्दोऽव्ययमध्येऽस्ति, उद्यंश्चासौ दिवाकरश्चोद्यद्दिवाकरः 'कर्मधारयः', उद्यद्दिवाकरस्य मयूखाः उद्यद्दिवाकरमयूखाः 'तत्पुरुषः', उद्यद्दिवाकरमयूखानां शिखा उद्यद्दिवाकरमयूखशिखाः 'तत्पुरुषः', उद्यद्दिवाकरमयूखशिखाभिरपविद्धं उद्यद्दिवाकरमयूखशिखापविद्धं 'तत्पुरुषः'। इत्यष्टत्रिंशत्तमवृत्तार्थः ॥३८॥

* * *

अत्रापि सङ्ग्रामभयं निरस्यन्नाह – कुन्ताग्रेत्यादि

व्याख्या - हे जिनेश्वर ! जना युद्धे-सङ्ग्रामे जयं लभन्ते-प्राप्नुवन्ति। जनाः किंलक्षणाः? 'त्वत्पादपङ्कजवनाश्रयिणः' त्वत्पादकमलकाननभाजः। तव पादौ त्वत्पादौ 'तत्पुरुषः', पङ्के जायन्ते स्मेति पङ्कजानि 'तत्पुरुषः', पङ्कजानां वनं पङ्कजवनं 'तत्पुरुषः', त्वत्पादावेव पङ्कजवनं त्वत्पादपङ्कजवनं 'कर्मधारयः', त्वत्पादपङ्कजवनमाश्रयन्त इत्येवंशीला-